A.C. Joshi Library
P.U. Chandigarh

MSS No. 370C Subject Religion

Name of MSS श्रीमद् भागवत, भावार्थ दीपिका सहित

Author

Period Folios 149

Script Devnagri Source Prithipal Singh

Missing Folios

श्री·
भा·तृ·
टी·
१

ॐश्रीगणेशायनमः ॐनमोभगवतेवासुदेवाय ॐनमःकमलदलविपुलनयनाभिरामायश्रीरामायनमः तृ
तीयेत्त्रयस्त्रिंशदध्यायैः सर्गवर्णने ईशेच्छयागुणक्षोभात्सर्गोब्रह्मांडसंभवः तत्रतुप्रथमेध्यायेवंधून्हित्वाग
तात्सुयः निर्गतस्योद्धवेनादौसंवादः तत्तत्कृच्यते अथयत्तृतीयस्कंधव्याख्या भगवद्ब्रह्मसंप्रोक्तंसंक्षिप्तंवर्णितःपु
रा प्राहभगवतेशेषप्रोक्तंविस्तरतःपुनः द्वेधाहिभागवतसंप्रदायप्रवृत्तिःएकतःसंक्षेपतःश्रीनारायणब्रह्मना
रदादिद्वारेणअन्यतस्तुविस्तरतः शेषसनत्कुमारसांख्यायनादिद्वारेणतत्रद्वितीयेश्रीनारायणब्रह्मसंवादेनसंक्षे

श्रीशुकउवाच ॐएवमेतत्पुरापृष्टोमैत्रेयोभगवान्किल
क्षत्त्रावनेप्रविष्टेनत्यक्त्वास्वगृहमृद्धिमत् १

यतः चतुःश्लोक्याश्रीभागवतंनिरूपितं तदेवब्रह्मनारदसंवादेनदशलक्षणतयाकिंचिद्विस्तरेणोक्तं तदेवशे
षोक्तमतिविस्तरतोवक्तुंतृतीयस्यारम्भः तत्रतृतीयेप्रथमंतत्तुमैत्रेयसंवादश्चतुर्भिरध्यायैस्ततोष्टभिःसविसर्गःस
र्गप्रपंचः ततोविसर्गप्रस्तावेनसप्तभिर्वराहावतारः ततएकेनविसर्गसमाहारः तत्प्रसंगेनचतुर्भिःकपिलावतारः
ततोनवभिःकपिलाख्यानमितित्रयस्त्रिंशताध्यायैस्तृतीयस्कंधप्रवृत्तिः तत्रद्वितीयांतेपरिमाणंचकालस्यकल्पलक्ष
णविग्रहं यथापुरस्ताद्व्याख्यास्येपाद्मंकल्पमथोशृणुइति प्रतिज्ञातमर्थंविस्तरेणनिरूपयितुमितिह्यासप्रसंगे। १
ति एवमितिद्वाभ्यांऋद्धिमत् सर्वसंपद्भिःसंपन्नम् १

किंचातिश्लाघ्यं त्यागानंदमित्याह यदैव प्रसिद्धं गृहं वः पांडवानां मंत्रकृतं दौत्यकर्तासन् कौरवेंद्रो दुर्योध
नः तस्य गृहं हित्वानाहूत एव प्रविवेश तत्र हेतुः आत्मसात्कृतम् आत्मीयत्वेन गृहीतं २ अत्र संसर्गाभावभू
व ३ वरीयसि श्रेष्ठे अल्पस्यार्थस्योदयो यस्मात्तस्मात्तथाभूतो न भवति साधुवादेन सतामनुमोदनेन ३

यदा चायं मंत्रकृद्वो भगवानखिलेश्वरः कौरवेंद्रगृहं हित्वा प्रविवेशात्मसात्कृतं २ राजोवाच
कुत्र क्षत्तुर्भगवता मैत्रेयेणास संगमः कदा वा सह संवाद एतद्वर्णय नः प्रभो ३ न ह्यल्पार्थो
दयस्तस्य विदुरस्यामलात्मनः तस्मिन्वरीयसि प्रश्नः साधुवादोपबृंहितः ४ सूत उ० स एवमृ
षिवर्योयं पृष्टो राज्ञा परीक्षिता प्रत्याह तं सुबहुवित्प्रीतात्मा श्रूयतामिति ५ शुक उ० यदा तु रा
जा स्वसुतानसाधून्पुष्णन्नधर्मेण विनष्टदृष्टिः भ्रातुर्यविष्ठस्य सुतान्विबंधून्प्रवेश्य लाक्षाभव
नेददाह ६ ॥

उपबृंहितः संवर्धितः यद्वा साधोर्मैत्रेयस्य वादेनोत्तरेश्लाघित इत्यर्थः ४ ५ त्यागानंदस्यापि गृहस्य त्यागे
हेतुत्वेन कौरवापराधानाह यदेत्येकादशभिः एतेषां च सतदा तत्राख्यादित्येकादशे क्रियासंबंधः
यविष्ठस्य कनिष्ठस्य पांडोः विबंधून् पितृहीनान् ६

श्री॰ भा॰ त॰ टी॰ २ 2

कुरुदेवस्ययुधिष्ठिरस्यदेव्याः द्रौपद्याः आत्मनःस्नुषायाःस्वीयैरस्त्रभिः स्वकुचकुंकुमानिरिपुस्त्रीणांवा
तदुक्तंवधेनहरंत्याः ७ सत्यावलंबस्य सत्याश्रयस्य वनात्प्रत्यागतस्य समयेनएवंकृतेनदायंयाचमान
स्य यत् यदानप्रदात् तमोमोहंजुषमाणः पुत्रंसेवमानः अविवेकीवा ८ यानिवचनानिद्रोणभीष्मा
दीनां अमृतायनानि अमृतस्रावीणि राजाधृतराष्ट्रः दुर्योधनोवा उरुबहुनमेने हतोनष्टःपुण्यले

यदासभायांकुरुदेवदेव्याः केशाभिमर्शंसुतकर्मगर्ह्यं नवारयामासनृपःस्नुषायाःस्वास्रै
र्हरंत्याःकुचकुंकुमानि ७ द्यूतेत्वधर्मेणजितस्यसाधोः सत्यावलंबस्यवनागतस्य नयाचतो
दात्समयेनदायंतमोजुषाणोयदजातशत्रोः ८ यदाचपार्थप्रहितःसभायांजगद्गुरुर्यानिज
गादकृष्णः नतानिपुंसाममृतायनानिराजोरुमेनेक्षतपुण्यलेशः ९ यदोपहूतोभवनंप्रविष्टो
मंत्रायपृष्टःकिलपूर्वजेन अथाहतन्मंत्रदृशांवरीयान्यन्मंत्रिणोवैदुरिकंवदंति १०

शोयस्यसः नस्वावकीर्तिधर्मादिहेतुः किंतुराज्यप्राप्तिमात्रहेतुः पुण्यलेशप्रवासीत्तस्यापिनष्टत्वान्नादृ
तवानित्यर्थः ९ इदानींविदुरस्यैवकृतंपराभवंदर्शयतिषड्भिः यदापूर्वजेनमंत्रायचोपहूतोंतर्गृहेप्रवि
ष्टोमंत्रेपृष्टःसन् अथानंतरंतदाह किमंत्रिणांघापियहैदुरिकंविदुरवाक्यमितिप्रसिद्धंवदंति १० २

2A

तदेवाह्यजातशत्रोरितित्रिभिः तवआगः अपराधं सहमानदायंप्रतियच्छदेहि यत्रापराधे अनुजैः सह
वर्तमानोवृकोदररूपः आदिः क्रोधेनसमन्वर्तते यद्यस्मात्वमन्यर्थेविभेषि ११ ममताहशाः पुत्रावहवः
ति संतीगर्वमाहृत्याइत्याह पार्थोस्तमुकुंदः आत्मीयत्वेनगृहीतवान् सचदेवस्तत्रापिभगवान्नतुप्राकृतः

॥ अजातशत्रोः प्रतियच्छदायंतितित्ततोदुर्विषहंतवागः सहानुजोयत्र
वृकोदरादिः समन्त्कषायत्वमलंविभेषि १२ पार्थास्तदेवोभगवान्मुकुं
दोगृहीतवान्सतितिदेवदेवः आस्तेस्वपुर्यांयदुदेवदेवोविनिर्जिताशेष
न्नदेवदेवः १२

किंच सहत्तितिदेवैर्विप्रैः देवैश्चेंद्रादिभिर्वर्तमानः यतोसौतत्रैवविप्रादेवाश्चेत्यर्थः सस्वपुर्यामेव
सुखमास्तेनत्वनन्यत्रगतः किंच यदुदेवानांदेवः श्रेष्ठः यतोसौतत्रैवयदुप्रवीराइत्यर्थः किंच न्नदेवेषु
मंडलेश्वरेषुदीव्यति प्रकाशतइतिन्नदेवदेवाराजानः विनिर्जिताअशेषान्नदेवदेवायेनयतोसौतत्रैव
सर्वराजानः अतः पार्थाणांदेयंदेहीति १२

दुर्य्योधनस्त्वां मन्यतइतिचेत् अतआह सएषमूर्त्तोदोषएवगृहान्प्रविष्टआस्ते दोषत्वेहेतुः पुरुषद्विट् श्रीकृष्ण
द्वेष्टा कोसौ यंत्वमपत्यमत्यापुष्णासि नत्वपत्यमसौ नपतंत्यस्मादितिह्यपत्यंप्राहुः गताश्रीर्यस्मात्तंस्त्वा-
मित्याक्रोशति अतएनमशैवममंगलमाशुत्यज कथंपुत्रस्त्याज्यस्तत्राह कुलस्यकौशलाय त्यजेदेकंकु
लस्यार्थे इतिहिन्यायः १२ इत्यूचिवान् एवमुक्तवान् असौक्षत्ता सतांस्पृहणीयंशीलंयस्यसः कर्णदुः

सएषदोषः पुरुषद्विडास्तेगृहान्प्रविष्टोयमपत्यमत्या पुष्णासिकृष्णाद्विमुखोगतश्रीस्त्यजाश्वशै
वंकुलकौशलाय १२ इत्यूचिवांस्तत्रसुयोधनेनप्रवृद्धकोपस्फुरिताधरेण असत्कृतःसत्स्पृहणी
यशीलः क्षत्तासकर्णानुजसौबलेन १३ कएनमत्रोपजुहावजिह्मंदास्याः सुतंयद्बलिनैवपुष्टः
तस्मिन्प्रतीपः परकृत्यआस्तेनिर्वास्यतामाशुपुराच्छ्वसानः १४

शासनशकुनिसहितेनदुर्य्योधनेनासत्कृतः १३ तिरस्कारमाह कइति दासीसुतोयाज्ञानानर्हः जिह्मश्च
कुटिलः जिह्मतामाह यस्यबलिनाअन्नेनपुष्टस्तस्मिन्नेवप्रतीपः प्रतिकूलः परेषांकार्येवर्त्तते अतःपुरा ३
न्निर्वास्यतां श्वसानःश्वसन् जीवमात्रशेषइत्यर्थः पाठांतरेश्मशानवदमंगलः १४

3A

अत्युल्बणैः करिणीयोर्वाणवत्सविषाद्भिः पुरुषवाक्यैर्मर्मस्वताडितोपि गतव्यथः तत्र हेतुः मायांउरुवद्धमा
नयत अहो मायामाहात्म्यमिति तामेव तत्र हेतुं मन्यमानः तन्निस्मारणात्सर्वं स्वयमेव अयात् निर्जगा-
म किं कृत्वा पतेन्नूनं मरिष्यतीति किं धनुषेति तस्य द्वारि धनुर्निधाय यद्वा भीमादिभिः संगत्य अस्मदादि
भिर्योत्स्यतीति माशंकेदिति धनुर्निधापनं ९ अतो निर्गतस्य तीर्थाटनप्रकारमाह स इत्यष्टभिः स गजा-

स इत्थमत्युल्बणकर्णबाणैर्भ्रातुः पुरो मर्मसु ताडितोपि स्वयं धनुर्द्वारि निधाय मायां गतव्यथो
याउरु मन्यमानः ९ स निर्गतः कौरवपुण्यलब्धो गजाह्वयात्तीर्थपदः पदानि अन्वाक्रमत्पुण्य
चिकीर्षयोर्व्यां स्वधिष्ठितो यानि सहस्रमूर्तिः १० पुरेषु पुण्योपवनाद्रिकुंजेष्वपंकतोयेषु सरित्स
ह्वयान्निर्गतः सन् तीर्थपादीयस्य तस्य हरेः पदानि रःसु अनंतलिंगैः समलंकृतेषु चचार तीर्थायतने
तेषु ततः १०

षु पुण्यचिकीर्षया अन्वाक्रमत्पर्यटत कौरवाणां पुण्यैर्लब्धः इति तेषां भाग्यमेव तेन रूपेणाग
तमिति सूचितं उर्व्यां सहस्रमूर्तिः ब्रह्मरुद्राद्यनेकमूर्तिः सन् तीर्थपात् यानि अधिष्ठाय स्थितः १०
पुण्यानि यान्युपवनादीनि तेषु कुंजलतादिगूढस्थानं अपंकानि तोयानि येषां तेषु सरित्सरःसु च तीर्थे व्या
यतनेषु तेषु च कीदृशेषु अनंतस्य लिंगैः मूर्तिभिः समलंकृतेषु अनन्यः एकाकी ११ ॥

४ त्वानितरतरमेमरर्पैः ।

श्री· भा·त· टी· ३ ५

किंच गांपर्यटन्व्रतानिचेरे अचरत् मेध्यापवित्राविविक्ता असंकीर्णा वृत्तिर्जीविका यस्य सदाप्लुतः प्रतितीर्थं स्नातः अधःशयनंयस्य अवधूतः असंस्कृतदेहः अवधूतवेशो वल्कलादिधारी अतएवस्वैरलक्षितः १९ ए कस्यैवंचक्रं सैन्यंयस्यास्तां एकमेवराजचिह्नंश्वेतातपत्रंयस्यास्तां अजितेनश्रीकृष्णेनसहायेन २० तत्रप्रभासेपरस्परस्पर्धयानिमित्तभूतया सुहृदांकौरवाणांविनष्टिंविनाशमशृणोत् परस्परनाशेदृष्टांतः वेणुजंवह्नि

गांपर्यटन्मेध्यविविक्तवृत्तिः सदाप्लुतोधःशयनोवधूतः अलक्षितःस्वैरवधूतवेशोव्रतानिचेरेहरि
तोषणानि १९ इत्थंव्रजन्भारतमेववर्षंकालेनयावद्गतवान्प्रभासं तावच्छशासक्षितिमेकचक्रामे
कातपत्रामजितेनपार्थः २० तत्राथशुश्रावसुहृद्विनष्टिंवनंयथावेणुजवह्निसंश्रयं संस्पर्धयादग्ध
मथानुशोचन्सरस्वतींप्रत्यगियायतूष्णीं २१ तस्यांत्रितस्योशनसोमनोश्च पृथोरथाग्नेरसितस्य
वायोः तीर्थंसुदासस्यगवांगुहस्ययच्छ्राद्धदेवस्यसआसिषेवे २२ अन्यानिचेहद्विजदेवदेवैःकृतानिना
नायतनानिविष्णोः प्रत्यंगमुख्यांकितमंदिराणियद्दर्शनात्कृष्णमनुस्मरंति २३

संश्रयतेघट्टनंतत् यथादग्धंभवतितथाप्रत्यक् उद्गमाभिमुखं २१ त्रितादीनामेकादशतीर्थानितत्तन्नाम्नाप्रसिद्धान्यासेवितवान् २२ द्विजदेवैः ऋषिभिः देवैश्चकृतानि अंगमंगंप्रतिवर्तंत इति प्रत्यंगानि आयुधानि तेषुमुख्यंचक्रंतेनांकितानि मूर्धन्यहेमकुंभेषुचिह्नितानिमंदिराणि

येषु तानि नानायतनानि विष्णोरायतनानि स्थानानि मूर्तीश्च आसिषेवे
चक्रांकितमंदिरवत्वां २३ दर्शनात्

५

प्रतिव्रज्य प्रतिक्रम्य यावदुद्धवः प्राप्तः तावदयमपि यमुनामुपेत्य २४ स विदुरः प्राक्तनयं एवं विशिष्टं नी
तिशास्त्रपारगं तेरे प्राप्तेन येनीतिशास्त्रं येन तं प्रतीतं प्रख्यातं स्वानां ज्ञातीनां भद्रमपृच्छत् प्रश्ने हेतुः भ
गवतः प्रजानां पोष्याणां २४ प्रथमं तावद्रामकृष्णयोः कुशलं पृच्छति कच्चिदिति प्रश्नः स्वनाभो भवः स्वना
भ्यः पाद्मो ब्रह्मा तस्यानुवृत्त्या प्रार्थनया इह अवतीर्णौ कुशलमासाते वर्तेते कृतक्षणौ दत्तावसरौ सर्वेषां

ततस्त्वतिव्रज्य सुराष्ट्रमृद्धं सौवीरमत्स्यान्कुरुजांगलांश्च कालेन तावद्यमुनामुपेत्य तत्रोद्धवं भा
गवतं ददर्श २४ स वासुदेवानुचरं प्रशांतं बृहस्पतेः प्राक्तनयं प्रतीतं आलिंग्य गाढं प्रणयेन भ
द्रं स्वानामपृच्छद्भगवत्प्रजानां २५ कच्चित्पुराणौ पुरुषौ स्वनाभ्यपाद्मानुवृत्त्येह किलावतीर्णौ
आसात उर्व्याः कुशलं विधाय कृतक्षणौ कुशलं शूरगेहे २६ कच्चित्कुरूणां परमः सुहृन्नो भामः
स आस्ते सुखमंग शौरिः यो वै स्वसॄणां पितृवद्ददाति वरान्वदान्यो वरतर्पणेन २७

कृतोत्सवौ वा इति वा तयोर्नित्यकुशलत्वेपि उक्तविशेषणविशिष्टौ शूरसेनस्य गृहे कच्चिदासाते इति प्रश्नः २६ सुहृ
न्नो कुशलं पृच्छति नवभिः भामः श्यालः शौरिः वसुदेवः यद्वा भामो भगिनीभर्ता कुंती वसुदेवस्य भगिनी अतो दे
वकीपाण्डोर्भगिनीति लोकव्यवहारः वरान् अर्थान् वदान्यः श्रेष्ठदारः वराणां तत्पत्नीनां तर्पणेन संतोषणेन सह २७

श्री॰ भा॰ त॰ टी॰ ५

वरूथाधिपतिः सेनानीः आदिसर्गे पूर्वजन्मनि स्मरं कामं सन्तं अभिलेभे पुत्रं लब्धवती २७ सात्वतादीनामधि-
पः उग्रसेनः आतपत्रनेत्रः श्रीकृष्णः नृपासनाशां राज्याभिलाषं परिहृत्य प्राणभयेन दूरात् स्थितमित्यर्थः २८
हे सौम्य हरेः सुतः तेन सदृक्षः सदृशः साधु सुखमास्ते गुहं स्वामिकार्तिकेयं अग्रे पूर्वजन्मनि यो भवान्यागर्भे ऽ

कच्चिद् वृष्ण्याधिपतिर्यदूनां प्रद्युम्न आस्ते सुखमंग वीरः यं रुक्मिणी भगवतोऽभिलेभे आराध्य
विप्रान् स्मरमादिसर्गे २९ कच्चित्सुखं सात्वतवृष्णिभोजदाशार्हकाणामधिपः स आस्ते यम्
अभ्यषिंचच्छतपत्रनेत्रो नृपासनाशां परिहृत्य दूरात् कच्चिद्धरेः सौम्यसुतः सदृक्ष आस्तेऽग्रणी रथिनां
साधु सांबः असूत यं जांबवती व्रताढ्या देवं गुहं योंविकया धृतोऽग्रे ३० क्षेमं स कच्चिद्युयुधान आस्ते यः
फाल्गुनाल्लब्धधनूरहस्यः लेभेंजसाधोक्षजसेवयैव गतिं तदीयां यतिभिर्दुरापां ३१ कच्चिद्बुधः स्व-
स्त्यनमीव आस्ते श्वफल्कपुत्रो भगवत्प्रपन्नः यः कृष्णपादांकितमार्गपांसुष्वचेष्टत प्रेमविभिन्न-

तस्तं ३० युयुधानः सात्यकिः क्षेमं कुशलमास्ते फाल्गुनादर्जुनात् लब्धं धनुर्वेदरहस्यं येन तदीयामधोक्षजसं-
बंधिनीं ३१ श्वफल्कपुत्रोऽक्रूरः बुधो विद्वान् अतो भगवंतं प्रपन्नः अस्तु अतः अनमीवो निष्पापः भक्तो
लिंगो योऽचेष्टत अलुठत प्रेम्णा विभिन्नं विदीर्णं धैर्यं यस्य स्वस्ति क्षेमं आस्ते ३२

५

5A

देवकनामायोभोजः तस्यपुत्र्यादेवक्याः विस्रःप्रजापुत्रोयस्याः तस्यादेवमातुरदितेरिवकच्चिद्भद्रं यज्ञ
वितानरूपमर्थंत्रयीयथाप्रकाशकतयाबिभर्त्तितथादधार ३३ सात्वतानामुपासकानांकामान्दोग्धिपूरय
तीतिकामधुकः भगवतेदेत्तः यंशब्दस्यशास्त्रस्ययोनिंकारणं आमनंतिवेदाः उतःमनोमयंमनस्तःप्रव
र्तकं तत्कृतः सत्वस्यातःकरणस्यचतुर्विधस्यतुरीयंतत्वंचतुर्थमधिदैवं चित्ताहंकारबुद्धिमनसांमध्येतः

कच्चिद्भद्रंदेवकभोजपुत्र्याविस्रप्रजायाइवदेवमातुः यावैस्वगर्भेणदधारदेवं
त्रयीयथायज्ञवितानमर्थं ३३ अपिस्विदास्तेभगवान्सुखंवोयःसात्वतांकाम
दुघोनिरुद्धः यमामनंतिस्महशब्दयोनिंमनोमयंसत्वतुरीयतत्वं ३४

करणभेदानांक्रमेणवासुदेवसंकर्षणप्रद्युम्नानिरुद्धाअधिष्ठातारः मनसश्चशब्दयोनित्वंप्रसिद्धं मनःपू
र्वरूपंवागुत्तररूपमितितथा अन्योंतर आत्मामनोमयइतिप्रस्तुत्य तस्ययजुरेवशिरः ऋक् दक्षिणःप
क्षः सामोत्तरःपक्षइत्यादिश्रुतेः तथाचशिक्षायां आत्माबुद्ध्यासमेत्यार्थान्मनोयुंक्तेविवक्षया मनःका
याग्निमाहंतिसप्रेरयतिमारुतं मारुतस्तूरसिचरन्मंद्रंजनयतिस्वरमित्यादि ३४

द्रँ

श्री॰
भा॰त॰
टी॰
९
6

अपिस्वित्किंस्वित् अनेवस्वस्तिचरंति निजस्यदेहादिव्यतिरिक्तस्य आत्मनोदेवंश्रीकृष्णंअनन्यदृष्ट्या प्र
कांतभक्तिभावेनयेसम्यगनुव्रताअनुसृताः हृदीकस्यसत्यभामायाआत्मजस्यचारुदेष्णस्यगदस्यादियेषां
तेपि ३५ इदानींकृष्णस्यपृच्छतिषड्भिः अपिस्वदोर्भ्यांस्वबाहुवद्वर्तमानाभ्यां विजयोच्युताभ्यांअर्जुनकृष्णा
भ्यांधर्ममार्गेण धर्मोयुधिष्ठिरः सतंधर्ममर्यादांपरिपाति यस्यसभायांविजयानुदृष्टाजयधपरम्परया अर्जु

अपिस्विदास्तेचनिजात्मदैवमनन्यवृत्त्यासमनुव्रताये हृदीकसत्यात्मजचारुदेष्णगदादयः स्व
स्तिचरंतिसौम्य ३५ अपिस्वदोर्भ्यांविजयाच्युताभ्यांधर्मेणधर्मःपरिपातिसेतुं दुर्योधनोतप्यत
यत्सभायांसाम्राज्यलक्ष्म्याविजयानुवृत्त्या ३९ किंवाकृताघेष्वघमत्यमर्षीभीमोहिवदीर्घतमंव्यमुं
चत् यस्याङ्घ्रिपातंरणभूर्नसेहेमार्गंगदायाश्चरतोविचित्रं ३२ कच्चिद्यशोधारथयूथपानांगां
डीवधन्वोपरतारिरास्ते अलक्षितोयच्छरकूटगूढोमायाकिरातोगिरिशस्तुतोषु ३८ न

नसेवयेतिवा एवंभूतंयस्यैश्वर्यमित्यर्थः ३९ कृताघेषुकृतापकारेषुकुरुषुस्वकर्तृमन्युंदीर्घतमंवहु
कालानुचिंतितं अविवदत्यमर्षीभीमः किंव्यमुंचन्नोवा गदयाविचित्रविविधंमार्गंचरतः ३२ रथयूथ
पानामध्येयशोधाः कीर्तिधारी यद्वा स्वीयानांतेषांकीर्तिप्रदः उपरताअरयोयस्मात्यस्यशरकूटे ९
नवाणसमूहेनगूढआच्छन्नः ३७

6A

उतस्वित् किंस्वित् यमौनजलसरदे देवौ रेमाते क्रीडतः इत्यर्थः माद्र्यास्तनावपि एथायास्तनयोपुत्रैर्हृतौ स
पर्णाविवरेमाते किंकृत्वा परात् दुर्योधनात् स्वरिक्थंस्वीयंराज्यं उद्धायाच्छिद्य वज्रिवज्रात् इंद्रस्य वज्रवात्
स्वरिक्थमस्मत्तेगरुडइवेति यद्वा सुपर्णाविवेति यदि देवौ गरुडौ वास्मत मानयेतां तर्हिंतद्वत् अस्तिर्णीवे
तिमणीवादिगणत्वात्सीधिः ३९ एथायाः किंतु ऊशोलएच्छेयं यतः तस्याः पांडुनाविना प्राणधारणमेव

यमावुतस्वित्तनयौ एथायाः पार्थैर्हृतौ पत्समिव दत्तिर्णीव रेमात उद्धायमध्ये स्वरिक्थंपरात्सुपर्णावि
ववज्रिवज्रात् ३९ अहो एथापि म्रियते र्भकार्थे राजर्षिवर्येणविनापितेन यस्त्वेकवीरोधिरथ्यो।
विजिग्ये धनुर्द्वितीयः ककुभश्चतस्रः ४० सौम्यानुशोचेतमधः पतंतं भ्रात्रेपरेतायविदुद्रुहेयः नि
र्यापितो येन सुहृत्सुपुर्या अहं स्वपुत्रान्समनुव्रतेन ४१

आश्चर्यमेवेत्याह अहो इति म्रियते जीवति नचात्मा
श्चर्यं यतोर्भकार्थे म्रियते न भोगार्थं तथापि चाश्चर्यमेवेत्याह तेन तथाभूतेन विना तदेवाह यस्त्विति धनुर्द्वि
तीयं सहायो यस्य एथा अर्भकार्थे जीवतीति युक्तमेवेत्याह ४० हे सौम्य तं धृतराष्ट्रं जीवंतमनुशोचामि तत्किमधः
पतंतं तत्र हेतुः परेताय मृताय भ्रात्रे पांडवे तमस्त्रहो देणायो विदुद्रुहे द्रोहं कृतवान् किंच जीवतोपि भ्रातुः ममापि
कृतवानित्याह येन सह ज्ञाताहं स्वपुत्रैः सकाशान्निर्यापितः विवासितः ४१

श्री° भा° टी° अहो खलु विस्मयो जानतोपि न स्वैवं ज्ञोऽस्मीति तं यतस्त्वं साधुरपि दुःखं प्रापितोसीत्यत आह सोहं हरेः प्रसादा
त्तस्य पदवीमाहात्म्यं प्रपन्नो जातविस्मयः अत्र भूतलेनान्योपलक्ष्यः गूढः सन्नहं विचरामि कथंभूतस्य
मर्त्यविडंबनेन प्रच्छन्नैश्वर्याच्छादकेन मानुष्यानुकरणेन नृणां दृशाश्रितदृष्टीः चालयतः भ्रामयतः ४१ ननु हरेः
७ किमेवं लीलया येन स्वभक्तानां वनवासादिक्लेशो भवति स्वस्य च देहत्यैव यन्नो घ्यमादिपराभवः तत्रहर्तेषामपरा
7 धानंतरमेव हननं नापराधोपेक्षेत्यत आह नूनं निश्चितं त्रिभिर्मदैरुत्पथानां शत्रूणां वधा हेतोः प्रपन्नाना

सोहं हरेर्मर्त्यविडंबनेन दृशो नृणां चालयतो विधातुः नान्योपलक्ष्यः पदवीं प्रसादाच्चरामि पश्य
न्गतविस्मयोत्र ४२ नूनं नृपाणां त्रिमदोत्पथानां महीं मुहुश्चालयतां चमूभिः वधात्प्रपन्नार्तिजि
४ हीर्षयेशोप्युपेक्षते तांश्च भगवान्कुरूणां ४३ अजस्य जन्मोत्पथनाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसां
मार्तिजिहीर्षया ईशः अपि समयमपवद्धं तस्य \\ नन्वन्यथा कोर्हति देहयोगं परो गुणानामुत कर्मतंत्रं ४४
मर्वोपि कुरूणामसहत्वमुपेक्षते तदानीमेव तेषां वधे सर्वज्ञ एव राज वधो न स्यादित्याशयेनार्थः विद्यामदोधन
मदलब्धवाभिजनो मदः एतैर्मदा मदा यानीत पवदिसतां दमा इति त्रयो मदाः ४३ सर्वज्ञ इत्थं यथार्थ्यमेव भग
वतो जन्मकर्माणि नान्यथेति कैमुत्यन्यायेनाह अजस्यापि जन्म अकर्तुरपि कर्माणि पुंसां ग्रहणाय कर्मसु प्रव
त्तये अन्यथा न चेदेवं तर्हि भगवतो जन्मादिकथा तावदास्तां को वान्योपि गुणानां परो गुणातीतो देहयोगं क

सविस्मयो वार्हतीति ४४ ॥

७

7A

तस्मादेवंभूताचिंत्यमायाविनोदकस्यकथांकथयेत्याह तस्यप्रपन्नायेऽखिललोकपालास्तेषामन्येषांच
स्वीयेऽनुशासनेस्थितानामर्थाय प्रयोजनाय यदुषुजातस्यतीर्थंसंसारतारिणीकीर्तिर्यस्येति ४५ इतितृतीये
प्रथमोध्यायः १ द्वितीयेकृष्णविश्लेषादनुशोचन्नुद्धवः तत्तेवालचरित्राणिकृष्णस्यावर्णयच्छ्वसन् १

तस्यप्रपन्नाखिललोकपानामवस्थितानामनुशासनेस्वे अर्थाययजातस्ययदुषुजस्य
वार्त्तांसखेकीर्तयतीर्थकीर्तेः ४५ इतितृतीयेप्रथमोध्यायः १ श्रीशुकउ॰ इतिभागवतः
एष्टः तत्राप्रावार्त्तांप्रियाश्रयां प्रतिवक्तुंनचोत्सेहेऽौत्कंठ्यात्स्मारितेश्वरः १ यःपंचहा
यनोमात्राप्रातराशाययाचितः तन्नैच्छद्रचयन्यस्यसपर्यांवाललीलया २ सकथं
सेवयातस्यकालेनजरसंगतः एष्टोवार्त्तांप्रतिब्रूयाद्भर्तुःपादावनुस्मरन् ३

तदेवंप्रियवार्त्तांएष्टस्योद्धवस्य श्रीकृष्णविरहोत्कंठ्यावेशेन प्रतिवचनासामर्थ्यमाहत्रिभिः इतीतिस्मारि
तईश्वरोयस्य १ एतदेवकैमुत्यन्यायेनप्रपंचयतिद्वाभ्यां यःपंचवर्षोवाललीलयेति कृष्णंकंविस्मरेक
ल्पयतिकल्पितैरेवसाधनैः परिचर्यांकुर्वन्प्रातर्भोजनार्थंप्रार्थितोपितद्भोजनंनैच्छत २ जरसंवृद्धत्वंगतः ३

श्री· श्रीकृस्नांघ्रिसुधया साधुनिर्वृतः तस्यामेव तीव्रेणाविवशत्वापादकेन भक्तियोगेन भृशं निमग्नश्च ४ पुल
भा·टी· कैरुद्भिन्नानि उज्जृंभितानि सर्वाण्यंगानि यस्य मीलंत्या दृशा शुचः अश्रूणि मुंचन् तेन विदुरेण पूर्णार्थः
८ कृतार्थो लक्षितः यतो भगवति यः स्नेहस्य प्रसरः प्रवाहस्तस्मिन्संप्लुतो निमग्नः ५ भगवानेव लोकः तस्मान्नृलो

समुहूर्तमभूत्तूस्णीं कृस्नांघ्रिसुधया भृशं तीव्रेण भक्तियोगेन निमग्नः साधुनिर्वृतः
४ पुलकोद्भिन्नसर्वांगो मुंचन्मीलद्दृशा शुचः पूर्णार्थो लक्षितस्तेन स्नेहप्रसरसं
प्लुतः ५ शनकैर्भगवल्लोकान्नृलोकं पुनरागतः विमृज्य नेत्रे विदुरं प्रत्याहोद्धव
उत्स्मयन् ६ श्रीउद्धव उवाच कृस्नद्युमणिनिम्लोचे गीर्णेष्वजगरेण ह किन्नु नः
कुशलं ब्रूयां गतश्रीषु गृहेष्वहम् ७

कं देहानुसंधानं उत्स्मयन् यदुकुलसंहारादि भ
गवच्चरित्रं स्मरणेन विस्मयं प्राप्नुवन् ६ श्रीकृस्नविरहेण संतप्यमानः प्रत्याह श्रीकृस्न एव द्युमणिः सू
र्यः तस्य निम्लोचे अस्तमये सति अजगरेण कालमहासर्पेण गीर्णेषु लिंगितेषु नो गृहेषु तत्प्रख्यापनेषु बं ८
धनेषु किन्नु ब्रूयां अतः शोचनाह ७ नि

दुर्भगो भाग्यहीनः ये संवसंतोपि श्रीहरिमयमिति न विदुः यथा क्षीरसमुद्रे जातमुडुपं तत्रस्था मीनाः के
वलं कमनीयः कश्चिज्जलचर इत्येवं विदुः न तु अमृतमय इति तद्वत् यथा जले प्रतिबिंबितं चंद्रं यथेति ८
भाग्यहीनत्वादेव न विदुः न तु ज्ञानसामग्र्यभावादित्याह इंगितं चित्तस्थं जानंतीति तथा पुरु अतिश
येन प्रौढाः निपुणाः एकस्मिन्नेव स्थाने आरमंतीति तथा एवंभूता अपि भूतानामावासमीश्वरं संतं सात्व

दुर्भगो बत लोकोयं यदवो नितरामपि ये संवसंतो न विदुर्हरिं मीना इवोडुपं ८ इंगितज्ञाः पु
रुप्रौढा एकारामाश्च सात्वताः सात्वतामृषभं सर्वे भूतावासममंसत ९ देवस्य मायया स्पृष्टा ये
चान्यदसदाश्रिताः भ्राम्यते धीर्न तद्वाक्यैरात्मन्युप्तात्मनो हरौ १० प्रदर्श्यातप्ततपसामवितृप्तदृ
शां नृणां आदायांतरधाद्यस्तु स्वबिंबं लोकलोचनं ११

तामृषभं सात्वतां श्रेष्ठममन्यंत ९ ये याद
वा देवमायया व्याप्ता यादवोयमस्मद्बंधुरिति वदंति ये च शिशुपालादयोः सदेवान्यदहं रमाश्रिता निंदंति ते
षां वाक्यैरात्मनि हरौ उप्तात्मनो निक्षिप्तचित्तस्य मादृशस्य बुद्धिर्न भ्राम्यते मोहं न प्राप्यते अस्येतत्स्वरूपमेवेत्यर्थः
१० कोसौ हरिरित्यपेक्षायामाह प्रदर्श्येति न तप्तं तपो यैः अतो अवितृप्ता दृशो येषां तेषां स्वबिंबं मूर्तिं एतावं
तं कालं दर्शयित्वा योंतर्हितवान् लोकस्य लोचनमादाय आक्षिप्य तादृशस्यान्यस्य विलोकनीयस्याभावा

श्री·
भा·टी·
५
9

तदेवबिंबंवर्णयतित्रिभिः यन्मर्त्यलीलास्व औपयिकंयोगपं स्वस्यापिविस्मयजनकं यतःसौभगर्द्धेः।
सौभाग्यातिशयस्यपरंपदंपराकाष्टा भूषणानांभूषणान्यंगानियस्मिन् १२ दृशांस्वस्त्ययनेपरमानंद
करं त्रिभुवनस्थोलोकः प्राणिमात्रं अथइदानीमिदंबिंबे अर्वाक्कृतोअर्वाचीनसंसारनिर्माणे मनुष्या-
निर्माणेवा यत्कौशलंनैपुण्यंतत् कार्त्स्न्येनगतमुपदीणाम् नातःपरंकौशलमस्तीत्येवंमेने तन्म

यन्मर्त्यलीलौपयिकंस्वयोगमायाबलंदर्शयतागृहीतं विस्मापनंस्वस्यचसौभगर्द्धेःपरंप
दंभूषणभूषणांगं १२ यद्धर्मसूनोर्वतराजसूयेनिरीक्ष्यदृक्स्वस्त्ययनंत्रिलोकः कार्त्स्न्येनचा
द्येहगतंविधातुरर्वाक्सृतौकौशलमित्यमन्यत् १३ यस्यानुरागप्लुतहासरासलीलावलोक
प्रतिलब्धमाना व्रजस्त्रियोदृग्भिरनुप्रवृत्तधियोवतस्थुःकिलकृत्यशेषाः १४

तैर्विधातुःसृज्यत्वाभावेपिलोकस्यदृष्टिरिवियुक्ता १३ अनुरागेणप्लुतोव्याप्तोहासः रासोविनोदः ली
लावलोकस्तैः स्वकृतहासायनंतरं प्रतिलब्धोमानोयाभिःतादृग्भिःसह अनुप्रवृत्तागच्छंततमेवा ५
नुगताधियोयासांताः असमापितकृत्यापवतस्थुः १४
क.तैरोयोयासांता:४

१८

एवंभूतविश्वप्रदर्शने कारणमाह स्वीयान्येव शांतानि वरूपाणि तत्र शांतरूपेषु इतरैः पीड्यमानेष्वनु
कंपितः कृतानुकम्प आत्मा यस्य अजोपि जातः आविर्भूतः महाभूतरूपेण नित्यसिद्ध एव अग्निर्यथाका
ष्ठेष्वाविर्भवति तद्वत् अजस्य जन्मनिर्देशः महान्महत्तत्वमंशः कार्यलेशो यस्याव्यक्तस्य तन्महदंशांत
युक्त इति १५ ननु जनोसौ परावराणामीशः पारतंत्र्यप्रतीतेस्तत्राह द्वाभ्यां मामप्येतद्दुर्वितर्क्यं दुर्घटं च खेद

॥ स्वशांतरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकंपितात्मा परावरेशो महदंशयुक्तो ह्यजोपि जा
तो भगवान्यथाग्निः १५ मां खेदयत्येतदजस्य जन्मविडंबनं यद्वसुदेवगेहे व्रजे च वासोरि
भयादिव स्वयं पुराद्व्यवात्सीद्यदनंतवीर्यः १६ दुनोति चेतः स्मरतो ममैतद्यदाह पादावभि
वंद्य पित्रोः तातांब कंसादुरुशंकितानां प्रसीदतं नो कृतनिष्कृतीनां १७

यति तदेवाह वसुदेवगेहे बंधनागारे यज्जन्म नो विडंबनमनुकरणं न तु नृसिंहवदकस्मादाविर्भावः
कंसभयादिव निलीय व्रजे वासश्च कालयवनादिरिपुभयादिव पुरान्मथुरायाः व्यवात्सीत् अपलायत १६
एतच्च हरेः चरित्रं स्मरतो मम चेतः कथंभूतं दुनोति व्यथयति तदेव दर्शयति यदाहेति हे तात हे अंब एवं
प्रसीदतं प्रसादं कुरुतं न कृतानिष्कृतिः शुश्रूषणानि यैस्तेषां नः अस्माकमिति बहुवचनेन रामाद्यभिप्रायं १७

श्री॰ भा॰ टी॰ १० 10

ननु तर्हि अनीश्वरपर्वकिं न स्यात् तत्र तु श्रद्धामात्रमेतत् तत्राह त्रिभिः कोवा अंघ्रिसरोजयो रेणुस्तमपि विजिघ्रन् से
वमानः विस्मरेत् ईशितेश अकुपात् विस्फुरद्भुविटपः भ्रूलतासपर्व कृतातसेन १८ नु च तस्य स्वरत्वं साधनीयं
भवद्भिरपि दृष्टत्वादित्याह दृष्टेति यां सिद्धिं सम्यग्योगेन प्राप्तुमिच्छंति १९ आह वेणुं हे पार्थ्यास्तैः स्तान् इच्छा
पाः संतः २० तदेवं परमेश्वर्ये सत्यपि यदु श्रेष्ठसेनानुवर्तित्वं तत्तु नरस्मानत्वं तं व्यथयतीत्याह स्वयंत्वयपर्वं २

कोवा अमुष्यांघ्रिसरोजरेणुं विस्मरेत ईशितेश पुमान् विजिघ्रन् योविस्फुरद्भ्रूविटपेन भूमेर्भारं कृतांतेन तिर
स्वकार १८ दृष्टा भवद्भिर्ननु राजसूये चैद्यस्य कृष्णं द्विषतोपि सिद्धिः यां योगिनः संस्पृहयंति सम्यग्योगेन
कस्तद्विरहं सहेत १९ तथैव चान्ये नरलोकवीरा य आहवे कृष्णमुखारविंदं नेत्रैः पिबंतो नयनाभिराम पा
र्थाह्वस्ताः पदमापुरस्य स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः बलिं हरद्भिश्चि
रलोकपालैः किरीटकोटीडितपादपीठः २१

तः तस्य तत्कैंकर्यं नो अस्मान् विप्लापयतीत्युत्तरेणान्वयः न सा
म्यातिशयौ यस्य यमपेक्ष्यान्यस्य साम्यमतिशयश्च नास्तीत्यर्थः तत्र हेतवः त्रयाणां पुरुषाणामीशः स्वाराज्य
लक्ष्म्या परमानंदस्वरूपसंपत्त्यैव प्राप्तसमस्तभोगः बलिं करं अर्हणां वा हरद्भिः समर्पयद्भिः चिरकालीनैः लो॰ १०
कपालैः किरीटाग्रेणाईडितं पादपीठं यस्य प्रणमतां किरीटसंघट्टनध्वनिरेव स्तुतित्वेनोत्प्रेक्षते २१

10A

अंगाविदुर भृत्तान्भृत्यान् उग्रसेनेयत्किंकरवंतदेवाह परमेष्ठिधिष्ण्ये राजासने निषण्णं आसीनं स्वयंति
ष्ठत् हेदेवावधारयेतिन्यबोधयत विज्ञापितवान् २२ एवमनुवृत्तिः कुपथैः वेतिसूचयन्नपकारिष्वपि॥
तस्यकृपालुतांदर्शयन्नाह अहोआश्चर्यंदयालुतायाः हंतुमिच्छयापिस्तनयोः संभृतंकालकूटंविषंयम
पाययत् बकीपूतना असाध्वीदुष्टापि धात्र्याययशोदाया उचितांगतिंलेभे भक्तवेशमात्रेणापिसद्गतिंदत्त

ततस्यैकैंकर्यमलंभृतान्नोविग्लापयत्यंगयदुग्रसेनं तिष्ठन्निषण्णंपरमेष्ठिधिष्ण्ये न्यबोधयद्देवनि
धारयेति २२ अहोबकीयंस्तनकालकूटंजिघांसयापाययदप्यसाध्वी लेभेगतिंधात्र्युचितांततो
न्यंकंवादयालुंशरणंव्रजेम २३ मन्येसुरान्भागवतांस्त्र्यधीशेसंरंभमार्गाभिनिविष्टचित्तान् येसं
युगेचरंततार्क्ष्यपुत्रमंसेसुनाभायुधमापतन्तम् २४

वानित्यर्थः ततोन्यंकंवाव्रजेम २३ ननुभाग
वतानेवभगवाननुगृह्णातीतिप्रसिद्धं सत्यं असुरानप्यहंभागवतानेवमन्ये यतोभागवताश्चतेपिभग
वद्ध्यानाभिनिवेशेनभगवंतमपरोक्षंपश्यंतीत्याह संरंभः क्रोधावेशः तेनमार्गेणाभिनिविष्टंचित्तंयेषांता
न्असुरान् एवयेसंग्रामेतार्क्ष्यः कश्यपः तस्यपुत्रंगरुडं अंसेस्कंधेसुनाभायुधश्चक्रायुधोहरिर्यस्तं अचक्षतअप
श्यन् तस्मात्तेषुअनुग्रहोयुक्तएवेत्यर्थः वक्ष्यतिच तस्मात्केनाप्युपायेनमनः कृष्णेनिवेशयेदिति २४

श्री॰ भा॰ टी॰ ॥

इदानीं तस्यांतर्धानप्रकारं वक्तुमादितआरभ्य तच्चरितं संक्षेपतः कथयति वसुदेवस्य भार्यायां जातः भोजेंद्रः कंसः तस्य बंधनागारे अस्याः पृथिव्याः शं सुखं स्वयं चिकीर्षुः अजेन च याचितः सन् पित्रा हेतुभूतेन नंदव्रजं इतः गतः समाः संवत्सरान् गूढार्चिः गुप्ततेजाः २६ व्याहरन् आक्रीडन् कूजद्भिः द्विजैः पक्षिभिः संकुलि

वसुदेवस्य देवक्यां जातो भोजेंद्रबंधने चिकीर्षुर्भगवानस्याः शमजेनाभियाचितः २५ ततो नंदव्रजमितः पित्रा कंसाद्विबिभ्यता एकादश समास्तत्र गूढार्चिः सबलोऽवसत् २६ परीतो वत्सपैर्वत्सांश्चारयन्व्याहरद्विभुः यमुनोपवने कूजद्द्विजसंकुलितांघ्रिपे २७ कौमारीं दर्शयंश्चेष्टां प्रेक्षणीयां व्रजौकसां रुदन्निव हसन्मुग्धबालसिंहावलोकनः २८ स एव गोधनं लक्ष्म्या निकेतं सितगोवृषं चारयन्ननुगान्गोपान्रणद्वेणुररीरमत् २९ प्रयुक्तान्भोजराजेन मायिनः कामरूपिणः लीलया व्यनुदत्तांस्तान्बालः क्रीडनकानिव ३०

तांघ्रिपाः वृक्षा यस्मिन् २७ रुदन्निवेति इवशब्दस्य यथायोगं सर्वत्राप्यन्वयः मुग्धो बालश्चासौ सिंहश्च तद्वद्दर्शनं लोकनं यस्य २८ स एवाधिकं वयः प्राप्तः सन् लक्ष्म्याः शोभादिसंपदो निकेतनं सितागोवृषा यस्मिन् नानावर्णगोसंघे रणान्मार्दंकुर्वन् वेणुर्यस्य सः अरीरमत् रमयामास २९ अनुदत् जघान क्रीडनकान् तृणादिनिर्मितान्सिंहादीन्

११ टि॰ ॥ वै

विपन्नान्मृतान् गोपान् गावश्च तिगाश्चोत्थाप्य तदेवतोयं प्रकृतिस्थितं निर्विषं ३१ इंद्रस्यज्ञाभंगेनकृता
गवांसृजैवगोवसः तेनगोपराजेनंदं विन्नस्यचेतिचकारादिंद्रस्यमानभंगंकुर्वन् उरुभारस्यातिसम्
द्धस्य ३२ कोपाद्वर्षति गोत्रः पर्वतपवलीलातपत्रेतेन देभद्र ३३ मृष्टमुज्वलेस्त्रीणांमंडलेमंडयतीति

विपन्नान्विषपानेननिशल्यभुजगाधिपं उत्थाप्यापाययज्ञावस्तत्तोयंप्रकृतिस्थितं ३१ अया
जयज्ञोमखेनगोपराजेद्विजोत्तमैः विन्नस्यचोरुभारस्यचिकीर्षन्सद्व्ययंविभुः ३२ वर्षतींद्रेव्र
जः कोपाद्भग्नमानेतिविह्वलः गोत्रलीलातपत्रेणत्रातोभद्रानुगृह्णता ३३ शरच्छशिकरैर्मृष्टमा
नयन्व्रजनीमुखं गायन्कलपदंरेमेस्त्रीणांमंडलमंडनः ३४ इतितृतीयेद्वितीयः २ उद्धवउ
ततः सआगत्यपुरंस्वपित्रोश्चिकीर्षयाशंबलदेवसंयुतः निपात्यतुंगाद्रिपुयूथनाथंहतंव्यक
र्षद्व्यसुमोजसोर्व्यां १ सान्दीपनेः सकृत्प्रोक्तंब्रह्माधीत्यसविस्तरं तस्मैप्रादाद्वरंपुत्रंमृतंपंचज

तया ३४ इतितृतीयेद्वितीयः २ तृतीयेमथुरामेत्यव्रजात्कंसवधादिकं यत्कृतंद्वारकायांचकृष्णेनतदवा
णयत् आगत्यपुरं पित्रोः सुखस्यचिकीर्षयेत्यर्थः तुंगाद्राजमंचात् रिपुयूथानांनाथंकंसं व्यसोःअपि
निकर्षणांपित्रोः सुखार्थं १ ब्रह्मवेदं सविस्तरंषडंगादिसहितं पंचजनोदरविदारणद्वारा उत्पन्नमानीयस

श्री॰ भीष्मककन्यया रुक्मिण्या ये राजानः समाहूताः ह्रस्वमार्षं समाहूता इति पाठे आकृष्टा इत्यर्थः केन साध-
भा॰ त॰ नेन श्रियो लक्ष्म्याः सवर्णेन समानेन रूपेण यद्यपि तया केवलं श्रीकृष्ण एवाहूतः न सर्वे तथापि तस्या-
१२ लावण्यं तेषामागमने हेतुरिति त एवाहूता इत्युच्यते यथा मिषतां मूर्ध्नि पदं दधत् तया सह गांधर्ववृत्त्याय
12 रस्य रसमयरूपया वधूभूषया भवितुमिच्छया जहार कथंभूते स्वभागं लक्ष्मीशत्वात्तया स्वात्मन्यर्पितत्वात्सु-
पर्णः सुपतनः यद्वा सुपर्ण इव स्वभागं सुधामित्यर्थः यद्वा श्रियः रुक्मिण्याः समानं वर्णद्वयं वाचकं

॥ समाहूता भीष्मककन्यया ये श्रियः सवर्णेन बुभूषयैषां गांधर्ववृत्त्या मिष-
तां स्वभागं जह्रे पदं मूर्ध्नि दधत्सुपर्णः ३ ककुद्मिनो विद्धनसो दमित्वा स्वयं-
वरे नाग्निजितीमुवाह तद्भग्नमानानपि गृध्यतोऽज्ञाञ्जघ्नेऽक्षतः शस्त्रभृतः ४

यस्य सः श्रियः सवर्णेन रुक्मिणी तेन समाहूताः शिशुपालादयः किमर्थं भीष्मककन्यया सह तेषां बुभूषया
भूतिर्भवत्वित्येतदर्थं तत्र शिशुपालस्याह्वानं वरत्वेन बुभूषया जरासंधादीनां तद्विवाहोत्सवेन पोषं पूर्व-
वत् ३ ककुद्मतो वृषभान् विद्धनासिकान् विद्धनासिकान् कृत्वेति वा तैर्वृषभैः सह मनेन च भग्नो मानो येषां त- १२
यापितान् गृध्यतः कामयमानान् अंशुप्रवात्तान् शस्त्रभृतो रातिः तच्छस्त्रैरक्षत एव जघान ४ ॥

12A

यदाआदित्याःकुंडलेदातुंस्वर्गंगतः तदाप्रभुःस्वतंत्रोपिग्राम्यः स्त्रीपरतंत्रइव प्रियायाःसत्यभामायाः
प्रियंविधातुमिच्छुः पुतरुंपारिजातं आनीतवान् यदर्थे पत्निमिन्द्रेकृतसंयु वज्रीस्त्रीप्रेरितोयोद्धुमन्वधाव
त् स्वकार्यसाधकेनतेनपुंद्वेषमसत्स्थापुरुषपवेल्याह क्रीडामृगइत्ययंवज्री ५ सुनाभेनचक्रेणउंघितेहतं हतं। न्म
भौमेदृष्ट्वा तस्यमात्राधारिण्याभूम्याआमंत्रितःप्रार्थितःसन् तस्यतनयायभगदत्तायहृतशेषंराज्यंदत्वा ९ त

प्रियंप्रभुर्ग्राम्यइवप्रियायाविधित्सुरार्छत्कृतरुंयदर्थे वज्र्याद्रवत्संसगणोरुषांधःक्रीडामृगो
नूनमयंवधूनां ५ सुतंमृधेखंवपुषाग्रसंतंदृष्ट्वासुनाभोन्मथितंधरित्र्या आमंत्रितस्तत्तनयाय
शेषंदत्वातदंतःपुरमाविवेश ९ तत्राहृतास्तानरदेवकन्याःकुजेनदृष्ट्वाहरिमार्तबंधुं उत्थाय
सद्योजगृहुःप्रहर्षव्रीडानुरागप्रहितावलोकैः ७ आसांमुहूर्तएकस्मिन्नानागारेषुयोषितां
सविधिंजगृहेपाणीननुरूपःस्वमायया ८ तास्वपत्यान्यजनयदात्मतुल्यानिसर्वतः एकैकस्यांद

पारप्रकृतेर्हिदुत्कृष्टया ९

तोविविधंभवितुमिच्छया ९

शंतःपुरेकुजेनभौमेनया आहृतास्ताः प्रहर्षश्चव्रीडाच अनुरागश्चतैःप्रहिताःप्रेरिताःयेअवलोकाःतैर्ज
गृहुःस्वीकृतवत्यः ७ आसांयोषितांपाणीन् तत्तदनुरूपःसन् सविधिंविवाहोचितप्रकारसहितंयथा
भवति ८ सर्वतःसर्वैःगुणैःस्वतुल्यानि प्रकृतेर्मायायाविविधंभवतेविस्तारःतदिच्छया यद्वा प्रकृतेर्हि

न्यान

श्री· भा·त· १३

13

कालःकालयवनःरुंधतश्चाहएवतः मुचकुंदभीमादिभिःनिमित्तमात्रैःस्वयमेवाजीघनत् घातितवा
न्तेषांतेनस्वपुंसांतेजः प्रभावेकीर्तिवादत्तवान् १० शंबरद्विविधबल्वलानपिकांश्चित्प्रद्युम्नरामादि
भिःघातयत् अघातयत् घातयन्नितिवापाठः दंतवक्रादीन्स्वयमवधीत् नृपानघातयदित्यनुषंगः ॥

कालमागधसाल्वादीननीकैरुंधतःपुरं अजीघनत्स्वयंदिव्यंस्वपुंसांतेजआदिशत् १० शं
बरंद्विविदंबाणंमुरंबल्वलमेवच अन्यांश्चदंतवक्रादीनवधीत्कांश्चघातयत् ११ अथते
भ्रातृपुत्राणांपक्षयोःपतितान्नृपान् चचालभूःकुरुक्षेत्रंयेषामापततांबलैः १२ सकर्णदुःशा
सनसौबलानांकुमंत्रपाकेनहृतश्रियायुषं सुयोधनंसानुचरंशयानंभग्नोरुमुर्व्यांननन्दप
श्यन् १३ कियान्भुवोयंक्षपितोरुभारोयद्द्रोणभीष्मार्जुनभीममूलैः अष्टादशाक्षौहि
णीकोमदंशैरास्तेबलंदुर्विषहंय

कथंभूतान्कुरुक्षेत्रमापततांगच्छतां येषांबलैःसैन्यैःभूःस
र्वांपिचचालचकंपे सकर्णः हृताश्रीःआयुश्चयस्यभग्नेऊरूयस्यतं उर्व्यांशयानंपश्यन्नपि ननननन्दतोषंन
प्राप १३ अनभिनंदनप्रकारमेवाह कियानिति द्रोणादिभिर्मूलैःकारणभूतैःयदितियः अष्टादशाक्षौहि
णीयुक्तः कुरुसमाघं क्षपितउरुभारोभुवःअयंकियानल्पइत्यर्थः यस्मान्मदंशैःप्रद्युम्नादिभिःहेतुभूतैः

१३

13A

नचान्योऽन्यउपायः प्रभवति किंत मधुनायम्रामदः सर्वतोमदः तेनाताम्रविलोचनानामेषांविवादेया
दाभविष्यतितदाइयानेवैषांवधोपायः अतः अन्योनास्ति एकात्मानोपिमय्युद्यतेसतिस्वयमेवविवादेनां
तर्दधीरन्नित्यर्थः १५ एवंश्लोकद्वयेनोक्तंक्रमेणसंचिंत्यस्वराज्येस्थापयित्वा १६ धृतःरक्षितः १७ अनुजैः

मिथोयदैषांभविताविवादोमध्वामदाताम्रविलोचनानां नैषांवधोपायइयानतोन्योमय्युद्यतें
तर्दधतेस्वयंस्म १५ एवंसंचिंत्यभगवान्स्वराज्येस्थाप्यधर्मजं नंदयामाससुहृदःसाधूनांव
र्त्मदर्शयन् १६ उत्तरायांधृतःपूरोर्वंशःसाध्वभिमन्युना सवैद्रौण्यस्त्रसंछिन्नःपुनर्भगवता
धृतः १७ अयाजयद्धर्मसुतमश्वमेधैस्त्रिभिर्विभुः सोपिक्ष्मामनुजैरक्षन्रेमेकृष्णमनुव्रतः १८ भ
गवानपिविश्वात्मालोकवेदपथानुगः कामान्सिषेवेद्वार्वत्यामसक्तःसांख्यमास्थितः स्निग्ध
स्मितावलोकेनवाचापीयूषकल्पया चरित्रेणानवद्येनश्रीनिकेतेनचात्मना २० इमंलोकममुं
चैवरमयन्सुतरांयदून् रेमेक्षणदयादत्तक्षणस्त्रीक्षणसौहृदः २१//

सक्त १८ सांख्यंप्रकृतिपुरुषवि
वेकं १९ स्निग्धोयःस्मितसहितोवलोकस्तेन पीयूषकल्पयासुधयातुल्यया पाठांतरेसुधाप्रवाहरूपया
आत्मनादेहेन २० क्षणदयाराज्या दत्तःक्षणःअवसरउत्सवोवायासांस्त्रीणांतासुक्षणसौहृदंयस्यसः

गृहमेधेषु गृहधर्मेषु कामभोगोपायेषु विरागः औदासीन्यं जातमित्यर्थः २२ यदा स्वाधीनेष्वपि भगवतो वि
रागः तदा दैवाधीनेषु को विस्रंभेत विश्वासं प्रीतिं वा कुर्यात् योगेन वै योगेश्वरं श्रीकृष्णमनुव्रतः २१ शे

तस्यैवं रममाणस्य संवत्सरगणान्बहून् गृहमेधेषु योगेषु विरागः समजायत २२ दैवाधीने
षु कामेषु दैवाधीनः स्वयं पुमान् को विस्रंभेत योगेन योगेश्वरमनुव्रतः २३ पुर्यां कदाचित्
क्रीडद्भिर्यदुभोजकुमारकैः कोपिता मुनयः शेपुर्भगवन्मतकोविदाः २४ ततः कतिपयैर्मा
सैर्वृष्णिभोजांधकादयः ययुः प्रभासं संहृष्टा रथैर्देवविमोहिताः २५ तत्र स्नात्वा पितृन्देवान्
षींश्चैव तदंभसा तर्पयित्वाथ विप्रेभ्यो गावो बहुगुणा ददुः २६ हिरण्यं रजतं शय्यां वासां
स्यजिनकंबलान् हयान्रथानिभान्कन्या धरां वृत्तिकरीमपि २७ अन्नं चोरुरसं तेभ्यो दत्वा भ
गवदर्पणं गोविप्रार्थासवः शूराः प्रणेमुर्भुवि मूर्द्धभिः २८ इति श्रीभागवते तृतीये तृतीयः ३

दुः शापं ददुः भगवतो मतेऽभिप्राये कोविदा अभिज्ञाः २४ २५ वयः शीलादिबहुगुणोपेता या गावस्ताः
२६ कन्याश्च वृत्तिकरीं जीविकां पर्याप्तां भगवदर्पणं यथा भवति गोविप्रार्थाश्च असवो येषाम् २७ २८ ३ १४
ति श्रीभावार्थदीपिकायां तृतीये तृतीयोऽध्यायः ३

14A चतुर्थ्येवंबंधुनिधनेऽप्राप्तात्मज्ञानलब्धये उद्धवस्योपदेशेनततामैत्रेयमागतं तैर्ब्राह्मणैरनुज्ञात्वा वारुणीं
पैष्टीमदिरां १ वारुण्येवमैरेयं तस्यदोषेण निम्लोचति अस्तंगच्छतिसति मर्दनकदने २ उपस्पृश्यसर
स्वत्यामाचम्य ३ अहंचोक्तः एवमेवद्वारकायां ४ तदभिप्रेतंजलसंहारादिकं ५ कृतंकेतंकृतावासंयस्य ि

उद्धवउ॰ अथतेतदनुज्ञाताभुक्त्वापीत्वाचवारुणीं तयाविभ्रंशितज्ञानाडुरुक्तैर्मर्मपस्पृशः १
तेषांमैरेयदोषेणविषमीकृतचेतसां निम्लोचतिरवावासीद्वेणूनामिवमर्दनं २ भगवा
न्स्वात्ममायायागतिंतामवलोक्यसः सरस्वत्यामुपस्पृश्यवृक्षमूलउपाविशत ३ अहंचोक्तोभ २ उद्धवमुपस्पृष्टवान्
गवताप्रपन्नार्तिहरेणह बदरींत्वंप्रयाहीतिस्वकुलंसंजिहीर्षणा ४ अपितदभिप्रेतंजानन्न पा४
हमरिंदम पृष्ठतोन्वगमंभर्तुःपादविश्लेषणाक्षमः ५ अद्राक्षमेकमासीनंविचिन्वन्दयि
तंपतिं श्रीनिकेतंसरस्वत्यांकृतकेतमकेतनं ६ श्यामावदातंविरजंप्रसन्नारुणलोचनं दो
र्भिश्चतुर्भिर्विदितंपीतकौशांबरेणच ७ वामऊरावधिश्रित्यदक्षिणांघ्रिसरोरुहं अपाश्रितार्भ

केतनमनाश्रयं ९ विरजंविरजसं विदितंलक्षितं कौशंकौशेयं ७ अधिश्रित्यउपरिस्थापयित्वाअपाश्रितः पृ
ष्ठतोवष्टब्धः अर्भकः बालः कोमलोऽश्वत्थोयेनतं त्यक्तंपिप्पलंविषयसुखंयेन तथापि आकृशं आनंदसंपूर्णं ८

द्वैपायनःसुहृत्सखाचयस्यसः स्वगुरुपुत्रत्वात्पराशरशिष्योमैत्रेयइत्यर्थः ९ प्रमोदेनभावेनचानताकंधराय
सपाठांतरे प्रमोदस्यभारेण अनुरागेणसहहासोयस्यां तयासमीक्षयाविश्रमयन्विगतश्रमंकुर्वन् १० तेमन
सीप्सितंअहंअंतःस्थितोवेदवेद्मि ददामिदेतः विश्वसृजांवसूनांचमिलितानां सत्रे हेवसोइति पुराश्र्वजन्मनि
त्वंवसुरभूः तदामत्सिद्धिकामेनत्वयाहमिष्टः अतस्तत्साधनंददामिदास्यामि अन्यैर्मत्पराङ्मुखैः दुष्प्रापं ११
तस्मिन्महाभागवतोद्वैपायनसुहृत्सखः लोकाननुचरन्सिद्धआससादयदृच्छया ९ तस्यानुरक्त
स्यमुनेर्मुकुंदः प्रमोदभावानतकंधरस्य आशृण्वतोमामनुरागहाससमीक्षयाविश्रमयन्नुवाच १०
श्रीभगवानुवाच वेदाहमंतर्मनसीप्सितंतेददामियत्तद्दुरवापमन्यैः सत्रेपुराविश्वसृजांवसूनां
मत्सिद्धिकामेनवसोत्वयेष्टः ११ सएषसाधोचरमोभवानामासादितस्तेमदनुग्रहोयत् यन्मां
नृलोकान्रहउत्सृजंतंदिष्ट्याददृश्वान्विशदानुवृत्त्या १२ पुरामयाप्रोक्तमजायनाभ्येपद्मेनिष
ण्णायममादिसर्गे ज्ञानंपरंमन्महिमावभासंयत्सूरयोभागवतंवदंति १३
तस्यभावमभिनंदतिसएषभवोजन्मतेभवानांमध्येचरमः यद्यस्मिन् मदनुग्रहस्त्वयासादितः लब्धः यत्तस्मान्मां रहः
एकांतेविशदानुवृत्त्यापक्वात्मभक्त्याददृश्वानदृष्टवानसि एतत् दिष्ट्याभद्रंजातमित्यर्थः नृलोकान् नृशब्देन
जीवास्तेषांलोकान् उत्सृजंतंवैकुंठंगच्छंतमित्यर्थः १२ ददातीतियदुक्तंतदेवंनिर्दिशति पुराश्र्वस्मिन्नाद्येक

त्वेआदिसर्गे (सर्गौ) प्रक्रमे मममहिमालीलावभास्यतेयेनतत् १३

15A

इत्येवमादृतस्तस्मात्सावदमुक्तः प्रतिक्षणं कृपावलोकयवानुग्रहस्तस्य भाजनः पात्रभूतः पार्श्वंतरे प्रतिक्षण
मनुग्रहस्य पात्रमिति सचः अश्रूणि मुंचन् आबभाषे उक्तवानस्मि १४ न हि स्वाज्ञाननिवृत्तिमात्रकामो
हं किं तत्वनिषेवणोत्सुकः त्वयि चाघटमानाचरणं दृष्ट्वा मे मोहो भवति अतस्त्वं तत्वज्ञानं देहीति प्रार्थयति

इत्याहतोक्तः परमस्य पुंसः प्रतिक्षणानुग्रहभाजनोहं स्नेहोत्थरोमा स्खलिताक्षरस्तं मुंचन्नश्रु
वः प्रांजलिराबभाषे १४ कोन्वीश ते पादसरोजभाजां सुदुर्लभोर्थेषु चतुर्ष्वपीह तथापि नाहं प्र
वृणोमि भूमन्भवत्पदांभोजनिषेवणोत्सुकः १५ कर्माण्यनीहस्य भवोभवस्य ते दुर्गाश्रयो
थारिभयात्पलायनं कालात्मनो यत्प्रमदायुताश्रयः स्वात्मन्रतेः खिद्यति धीर्विदामिह १६

तमाह कोन्विति चतुर्षु धर्मादिषु तथापि तानहं न प्रवृणोमि १५ अघटमानाचरणं दर्शयति कर्माण्य
नीहस्य निःस्पृहस्य निष्क्रियस्य वा अभवस्याजन्मनो भवो जन्म कालात्मनः तवारिभयात् दुर्गाश्रयः प
लायनं च स्वात्मनि रतेर्यस्य तस्य स्त्रीभिर्गृहस्थाश्रम इति यत् एतस्मिन्विषये विदुषामपि धीः
संशयेन खिद्यति १६ [illegible]

श्री· भा·टी·
१९

किंच मंत्रेषु प्रसक्तेषु सत्सु मामाहूय वैश्रहो एच्छेः अपृच्छः अकुंठितः कालादिना अखंडः संततः सदात्मा से
शयादिरहितो बोधो विद्याशक्तिर्यस्य मुग्धवत् अतत्त्ववत् अप्रमत्तः अवहितः सन् १७ स्वात्मनः तव रहः रह
स्यं तत्त्वं तस्य प्रकाशकं कस्मै ब्रह्मणे सर्वनाम तत्वमार्षं नो अस्माकं ग्रहणाय अक्षिमं यदि योग्यं तर्हि वद भ हे

मंत्रेषु मां वा उपहूय यत्त्वमकुंठिताखंडसदात्मबोधः पृच्छेः प्रभो मुग्ध इवाप्रमत्तः तन्नो मनो मो
हयतीव देव १७ ज्ञानं परं स्वात्मरहःप्रकाशं प्रोवाच कस्मै भगवान्समग्रं अपि क्षमं नो ग्रहणा
य भर्तर्वदाञ्जसा यद्वृजिनं तरेम १८ इत्यावेदितहार्दाय मह्यं स भगवान्परः आदिदेशारविंदाक्ष
आत्मनः परमां स्थितिं १९ स एवमाराधिततीर्थपादादधीततत्त्वात्मविबोधमार्गः प्रणम्य पादौ
परिहृत्य देवमिहागतोऽहं विरहातुरात्मा २० सोऽहं तद्दर्शनाह्लादवियोगार्तियुतः प्रभोः गमिष्ये द
यितं तस्य बदर्याश्रममंडलम् २१

र्तः स्वामिन् यत् यतः वृजिनं संसारदुःखं अनायासेन तरि
ष्यामः १८ आवेदितो हार्दो हृदिस्थितोऽभिप्रायो येन तस्मै १९ आराधितः तीर्थपादो भगवान् स एव तीर्थं गुरुस्त
स्मात् अधीतः अधिगतः तत्त्वात्मविबोधस्य परमार्थज्ञानस्य मार्गो येन देवं परिहृत्य प्रदक्षिणीकृत्य २० तस्य
दर्शनेनाह्लादो वियोगेनार्तिः ताभ्यां युतो बदर्याश्रमस्थानं गमिष्यामि २१ १९

वि

16A

मृडुपर्णोपद्रव्याशनत्वंतीव्रंदुश्चरं दीर्घमाकल्पांतंतेपातेतपश्चरतुरित्यर्थः लोकभावनौलोकानुग्रहा
कारकौ २२ ज्ञानेनविवेकेन २३ विस्रंभात् विश्वासात् २४ यद्यस्मात् स्वभृत्यप्रयोजनसाधकाःसंत
श्चरंति नहितेषांकृतार्थानामन्यत्कृतमस्तीत्यर्थः २५ तत्वायसंराध्यइत्यव्ययीभावः भगवतेवस्मरणमात्रे

यत्रनारायणोदेवोनरश्चभगवान्नृषिः मृडतीव्रंतपोदीर्घंतेपातेलोकभावनौ २२ श्रुकउ॰ इत्युद्ध
वादुपाकर्ण्यसुहृदांदुःसहंवधं ज्ञानेनाशमयत्क्षत्ताशोकमुत्पतितंबुधः २३ सतंमहाभागव
तंव्रजंतंकौरवर्षभ विस्रंभादभ्यधत्तेदंमुख्यंकृष्णपरिग्रहे २४ विदुरउ॰ ज्ञानंपरंस्वात्मरहः
प्रकाशंयदाहयोगेश्वरईश्वरस्ते वक्तुंभवान्नोर्हतियद्धिविष्णोःभृत्याःस्वभृत्यार्थकृतश्चरंति
२५ उद्धवउ॰ ननुतेतत्वसंराध्यऋषिःकौशारवोंतिके साक्षाद्भगवतादिष्टोमर्त्यलोकंजि॰
हासता २६ श्रुकउ॰ इतिसहविदुरेणविश्वमूर्तेर्गुणकथयासुधयाप्लावितोरुतापः क्षणमि
वपुलिनेयमस्वसुस्तांसमुषितऔपगविर्निशांततोगात् २७

णातत्वापितत्वमुपदिष्टप्रायंकेवलम
संभावनादिनिवृत्तयेत्तानीकश्चिदाराध्यः मैत्रेयः नत्वहं ममांतिकएवतदुपदेशेतस्यादिष्टत्वादिति
२६ प्लावितश्चपनीतउरुतापोयस्य यमस्वसुर्यमनायाःपुलिनेतीरेतांनिशांक्षणमिवसमुषित औपग॰

सवतवाराध्योर

श्रीभा०टी० ३

श्री० भा० तृ० १७ 17

ब्रह्मशापेननिधनंप्राप्तेषु यद्यस्मात्त्रयाणांब्रह्मादीनामीशोहरिरपि आकृतिंमनुष्याकारंत्यक्तवान्
२८ ब्रह्मशापःअपदेशोमिषंयस्यतेनकालस्वशक्तिरूपेण अमोघंवाञ्छितंयस्य नतुब्रह्मशापःप्रभुः

राजोवाच निधनमुपगतेषुवृष्णिभोजेष्वधिरथयूथपयूथपेषुमुख्यः सतुकथमवशिष्ट
उद्धवोयद्धरिरपितत्यजआकृतिंत्र्यधीशः २८ श्रीशुकउ० ब्रह्मशापापदेशेनकालेनामोघवा
ञ्छितः संहृत्यस्वकुलंनूनंत्यक्ष्यन्देहमचिंतयत् २९ अस्माल्लोकादुपरतेमयिज्ञानंमदाश्रयं
अर्हत्युद्धवएवाद्धासंप्रत्यात्मवतांवरः ३० नोद्धवोण्वपिमन्न्यूनोयद्गुणैर्नार्दितःप्रभुः अतोम
द्वयुनंलोकंग्राहयन्निहतिष्ठतु ३१ एवंत्रिलोकगुरुणासंदिष्टःशब्दयोनिना बदर्याश्रममा
साद्यहरिमीजेसमाधिना ३२ विदुरोप्युद्धवाच्छ्रुत्वाकृष्णस्यपरमात्मनः क्रीडयोपात्तदे
हस्यकर्माणिश्लाघितानिच ३३ ॥ ॐनमोनमःॐम्

किंतुभगवदिच्छैवेत्यर्थः २९ मयिउपरतेसतिज्ञानमर्हति ज्ञानयोग्योभवति ३० मन्नःसकाशादीष
दपिन्यूनोनभवति यद्यस्माद्गुणैर्विषयैर्नक्षोभितः मद्वयुनंमद्विषयंज्ञानंलोकस्योपदिशन् ३१ ए १७
वमनेनाभिप्रायेण शब्दयोनिनावेदकर्त्राईजेपूजयामास ३२ ३३

17A

पश्चत्वात्मानं विक्लवात्मानं अधीरचित्तानां ३४ मनसेतितं चिंतितं ३५ कालिंद्याः सकाशात्सिद्धपदवि
दुरः कतिपयैर्दिनैः स्वः सरितं गंगां प्रापद्यत प्राप्तः ३६ इतित्तृतीये चतुर्थः ४ पंचमे भगवल्लीलां तत्रा
ष्टोमहामुनिः प्रोवाच महदादीनां सर्गं तेश्वहरेः स्तुतिं १ उक्तास्वतुर्भिरध्यायैः त्ततो मैत्रेयसंगमः सेवा

देहन्यासं च तस्यैवधीराणां धैर्यवर्धनं अन्येषां दुष्करतरं पशूनां विक्लवात्मनां ३४
आत्मानं च कुरुश्रेष्ठ कृष्णेन मनसेक्षितं ध्यायन्गते भागवते रुरोद प्रेमविह्वलः ३५
कालिंद्याः कतिभिः सिद्ध अहोभिर्भरतर्षभ प्रापद्यत स्वः सरितं यत्र मित्रासुतो मुनिः ३६
इतिश्रीभागवते महापुराणे तृतीयस्कंधे चतुर्थोध्यायः ४ शुक उवाच द्वारि
द्युनद्या ऋषभः कुरूणां मैत्रेयमासीनमगाधबोधम् क्षत्तोपसृत्या
च्युतभावशुद्धः पप्रच्छ सौशील्यगुणाभितृप्तः १

दः स्तुतयोः स्कंधद्वयेनाथनिगद्यते २ द्युनद्या गंगाया द्वारि हरिद्वारे आसीनं नत्वकर्मव्यग्रम् तत्र हेतुः अगा
धः अप्रतिच्छिन्नो बोधो यस्येति मैत्रेयस्य सौशील्यं आर्जवादि गुणाश्च करुणादयस्तैरभितृप्तः पाठांतरे त्त
तः सौशील्यादिभिरभितृप्तं संतुष्टं मैत्रेयम् १

श्री॰
भा॰ टी॰
१८
18

प्रश्नानेवाह स्वावायेति पंचदशभिः तैः कर्मभिः स्वस्वं चान्यस्य दुःखस्योपशमं चेत्यर्थः अथवान्यद्वानविंदेत
किं तदित्यपेक्षायां तस्यैव निर्देशः उपारमं चेति ततस्तैः कर्मभिः भूयः पुनः पुनः दुःखमेव विंदेत अत्रैवं वि
धेसंसारेनः अस्माकं यत युक्तं कर्तव्यं तत्सर्वज्ञो भवान् वदेत निरूपयत २ दैवात्प्राचीनकर्मणो निमि
त्तभूतात्कस्मात विमुखस्यातः अधर्मशीलस्य अतः सदुःखितस्य जनस्यानुग्रहाय भव्यानि मंगलानि भवंतः प

विदुरः स्वावायकर्माणि करोति लोको न तैः स्वस्वं चान्यदुपारमं वा विंदेत भूयस्तत एव दुःखं यदत्र युक्तं
भगवान्वदेन्नः १ जनस्य कृष्णाद्विमुखस्य दैवादधर्मशीलस्य सुदुःखितस्य अनुग्रहायेह चरंति नूनं भू
तानि भव्यानि जनार्दनस्य ३ तत्साधुवर्यादिश वर्त्म शंनः संराधितो भगवान्येन पुंसां हृदि स्थितो य
च्छति भक्तिपूते ज्ञानं सतत्वाधिगमं पुराणं ४ करोति कर्माणि कृतावतारो यान्यात्मतंत्रो भगवांस्त्र्य
\\ धीशः यथाससर्जाग्र इदं निरीहः संस्थाप्य वृत्तिं जगतो विधत्ते ५

रोपकारस्वभावा एवेत्यर्थः ३ तत्तस्माद्धे
साधुवर्य शं सुखं तद्रूपं वर्त्मनः आदिश कथय येन वर्त्मना संराधितो हृदि स्थितः सन् तत्वाधिगमं आत्मा
परोक्षं तत्सहितं पुराणं अनादि वेदप्रमाणकं ४ करोति कर्माणीत्यादीनां वर्णयेति पंचमश्लोके क्रियासं
बंधः यथा येन प्रकारेण कृतावतारः सन् त्र्यधीशस्त्रिगुणमायानियंता अतः स्वतंत्र एव यानि कर्माणि क

रामः
१८

18A

कर्मण्यैवविशेषतः पृच्छति यथेत्यादिना निरीहः निष्क्रियः निःस्पृहोवा संस्थाप्यसुस्थितंकृत्वावृत्तिंजी
विकां स्वेस्वीयेखेहृदयाकाशे निवेश्यसुप्यापयित्वानिवृत्तावृत्तयोयस्यगुहायांयोगमायांबहुधात्वस्मादि
रूपेण ६ मत्स्याद्यवतारभेदैः क्रीडन् यानियथाकर्माणिविधत्ते पुनर्विशेषंद्रष्टुमौत्सुक्यमाविष्करोति
सुश्लोकाः पुण्यकीर्तयस्तेषांमौलेर्विधिकेनोपरिविराजमानस्येत्यर्थः ७ लोकनाथोलोकाधिपतिः

यथापुनःस्वेखइदंनिवेश्यशेतेगुहायांसनिवृत्तवृत्तिः योगेश्वराधीश्वरएकएतदनुप्रविष्टोबहु
धायथासीत् ६ क्रीडन्विधत्तेद्विजगोसुराणांक्षेमायकर्माण्यवतारभेदैः मनोनतृप्यत्यपिशृ
ण्वतांनः सुश्लोकमौलेश्चरितामृतानि ७ यैस्तत्त्वभेदैरधिलोकनाथोलोकानलोकान्सहलोक
पालान् अचीक्लृपद्यत्रहिसर्वसत्वनिकायभेदोधिकृतःप्रतीतः ८ येनप्रजानामुतआत्मक
र्मरूपाभिधानांचभिदांव्यधत्त नारायणोविश्वसृगात्मयोनिरेतच्चनोवर्णयविप्रवर्य ९

अलोकान्लोकालोकपर्वताद्बहिर्भागान् अचीक्लृपत्कल्पयामास यत्रयेषुसर्वाणियानिसत्वानि तेषांनि
कायस्तेषांभेदः अधिकृतः तत्तत्कर्माधिकारी आश्रितइतिवा ८ उतापिचयेनप्रकारेण जीवानामात्म
स्वभावः तत्कृतंकर्म तत्कृतंरूपं तत्कृताअभिधानानांभेदंकृतवान् विश्वसृष्टास्वयमात्मयोनिः स्वतःसिद्धः ९

श्री· ननुमहाभारतेत्वयासर्वंश्रुतमेवतत्राह परेत्रैवर्णिकाःअवरेशूद्रादयः तेषांव्रतानिधर्माःमेमयाअभीक्ष्णंश्रु
भा·टी· नःपुनःतेषांश्रवणेन अलमप्रमत्ताःस्म तेषांतुच्छसुखावहत्वात् यतस्तत्रकृष्णस्यकथामृतोदः सूचितःतस्मादहंते
१९ तत्रत्वलेवबुद्धिहीनोस्मीत्यर्थः १४ तत्रहेतुःकइति तीर्थपदःश्रीकृष्णस्यअभिधानात् कथामृतात् सत्रेषुसमाजेषुसू
19 रिभिर्नारदादिभिः ११ महाभारतस्याप्येवंनात्यर्थमित्याह मुनिःकृष्णोवेदव्यासोभगवद्गुणान्मोक्षधर्मांतेनाराय

परावरेषांभगवन्व्रतानिश्रुतानिमेव्याससुखादभीक्ष्णं अतृप्नुमक्षुल्लसुखावहानांतेषामृतेकृष्णक
थामृतौघात् १४ कस्त्वनुयात्तीर्थपदोभिधानात्सत्रेषुवःसूरिभिरीड्यमानात् यःकर्णनाडींपुरुषस्यया
तोभवप्रदांगेहरतिंछिनत्ति ११ मुनिर्विवक्षुर्भगवद्गुणानांसखापितेभारतमाहकृष्णः यस्मिन्नृ
णीयाख्यानेवक्तुमिच्छुःसन्नर्थकामादि \\ णांग्राम्यसुखानुवादैर्मतिर्गृहीतानुहरेःकथायां १५

वर्णनेतद्धरिकथायांमतिप्रवेशार्थमेवेत्याह यस्मिन्निति नृणांमतिःग्राम्यसुखानुवादैः द्वारभूतैः नुनिश्चितं
हरेःकथायांगृहीतानीता तदुक्तमितिहाससमुच्चये कामिनोवर्णयन्कामांल्लोभंलुब्धस्यवर्णयन् नरःकिं
फलमाप्नोतिकूपेऽन्धमिवपातयन् लोकचिंतावतारार्थंवर्णयित्वात्रतेनतौ इतिहासैः पवित्रार्थैः पुनरत्रैवं १९
निंदितोह्यन्यथाघोरसंसारबंधहेतुर्जनस्यतौ वर्णयेत्सकथंविद्वान्महाकारुणिकोमुनिरिति १५

19A

श्रीहरिकथामतिप्रवेशस्यफलमाह साकथामतिर्वा अन्यत्रग्राम्यसुखे ततःकिमतआह हरेरिति १२ ए
वंभूतायांकथायांयेनरमंतेतान्शोचतिशोच्यायेतेषामपिशोच्यांश्च तत्राविदोभारततात्पर्यानभिज्ञानात् शो
च्यान् येपिज्ञातारोहरेःकथायांविमुखाःतान् शोच्यान् तेषामपिशोच्यान् इतियोज्य अनिमिषःकालोयेषा

साश्रद्दधानस्यविवर्धमानाविरक्तिमन्यत्रकरोतिपुंसः हरेःपदानुस्मृतिनिर्वृतस्यसमस्तदुःखात्य
यमाशुधत्ते १३ ताञ्छोच्यशोच्याननविदोनुशोचेहरेःकथायांविमुखानघेन क्षिणोतिदेवोनिमिष
स्तुयेषामायुर्वृथावादगतिस्मृतीनां १४ तदस्यकौषारवशर्मदातुर्हरेःकथामेवकथासुसारं उद्धृ
त्यपुष्पेभ्यइवार्तबंधोशिवायनःकीर्तयतीर्थकीर्तेः १५ सविश्वजन्मस्थितिसंयमार्थेकृतावता
रःप्रगृहीतशक्तिः चकारकर्माण्यतिपूरुषाणियानीश्वरःकीर्तयतानिमह्यं १६

मायुःक्षिपति। अत्रहेतुःवृथैववादगतिस्मृतयोवाग्देहमनोव्यापारायेषां १४ तस्माद्धेकौषारवअस्यविश्व
स्यशिवाय कथासुसारभूतांहरेःकथामेवोद्धृत्यनः कीर्तय यथापुष्पेभ्योमधुपःउद्धरतितद्वदुद्धृत्य १५
विशेषतःश्रीकृष्णकथाकथनीयेत्याशयेनाह सइति योविश्वसर्गाद्यर्थंएवंगृहीतशक्तिः सएवपुरु
षेषुकृतावतारःसन् पुरुषानतिक्रम्यवर्तमानानियानिचकार १६

श्री० भा० त० २० 20

पुंसांनिःश्रेयसमेवार्थः प्रयोजनंतेनहेतुनापृष्टः ७ बहुमानमेवाह साधितिपंचभिः अथोक्षजएवात्मास
नोयस्यात्मनः स्वस्यकीर्तिंचप्रसंगाद्वितन्वता १८ हरिर्यद्गृहीतःएतच्चित्रंनभवति यतःबादरायणवी
र्यजे १९ तर्हिकथंशूद्रत्वंकथंचलोकानुग्रहत्वंतत्राह माण्डव्यशापादिति भ्रातुर्विचित्रवीर्यस्यक्षेत्रेभु

शुकउवाच सएवंभगवान्पृष्टःक्षत्त्राकौशारविर्मुनिः पुंसांनिःश्रेयसार्थेनतमाहबहुमानयन्
७ मैत्रेयउ० साधुपृष्टंत्वयासाधोलोकान्साध्वनुगृह्णता कीर्तिंवितन्वतालोकेआत्मनोधोक्षजा
त्मनः १८ नैतच्चित्रंत्वयिक्षत्तर्बादरायणवीर्यजे गृहीतोनन्यभावेनयत्त्वयाहरिरीश्वरः १९ मां
डव्यशापाद्भगवान्प्रजासंयमनोयमः भ्रातुःक्षेत्रेभुजिष्यायांजातःसत्यवतीसुतात् २० भवा
न्भगवतोनित्यंसंमतःसानुगस्यच यस्यज्ञानोपदेशायमादिशद्भगवान्व्रजन् २१

जिष्यायांदास्यांतेक्षेत्रत्वेनस्वीकृतायां यमएवत्वंजातोसि २० किंच भगवानिति यतःयस्यतत्त्वज्ञानोप २०
देशायमामादिष्टवान् चकारात्स्वयमपितस्मैवोपदिष्टवानिति २१

20A

विश्वस्थित्यादयः अर्थो विषयो यासां ताः २२ तत्र सृष्टिलीलां वर्णयितुं ततः पूर्वावस्थामाह इदं विश्वमग्रे सृष्टेः
पूर्वं परमात्मा भगवानेक एवास आसीत् आत्मनां जीवानां आत्मा स्वरूपं विभुः स्वामी च नान्यद्द्रष्टृदृश्यात्म
कं किंचिदासीत् कारणात्मना सत्वेनापि दृश्यकप्रतीत्यभावादित्याह अनानामत्युपलक्षणः नानाद्रष्टृदृश्या
दिमतिभिर्नोपलक्ष्यत इति तथा यद्वा अकारप्रश्लेषं विनैवायमर्थः यः सृष्टौ नानामतिभिरुपलक्ष्यते स त
दा एक एवासीदिति ॥ तत्र आत्मेच्छा माया तस्या अनुगतौ लये सति यद्वा आत्मनः एकाकित्वेनावस्थानेच्छा

अथ ते भगवल्लीला योगमायोपबृंहिताः विश्वस्थित्युद्भवान्तार्था वर्णयाम्यनुपूर्वशः २२
भगवानेक आसीदमग्र आत्मात्मनां विभुः आत्मेच्छानुगतावात्मा नानामत्युपलक्षणः
स वा एष तदा द्रष्टा नापश्यद्दृश्यमेकराट् मेनेऽसन्तमिवात्मानं सुप्तशक्तिरसुप्तदृक् २४
सा वा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका माया नाम महाभाग ययेदं निर्ममे विभुः २५

यामनुगतायामित्यर्थः २३ तत्र प्रथमं मायोद्भवनप्रकारमाह द्वाभ्यां स वै द्रष्टा सन् दृश्यं नापश्यत् यतः स ए
कराट् एक एव तदा प्रकाशते असन्तमिव मेने दृश्याभावे द्रष्टृत्वाभावात् तदाह सुप्ता मायाद्याः शक्तयो यस्य
सः न तु असन्तमेव मेने यतः असुप्ता अलुप्ता दृक् चिच्छक्तिर्यस्येति २४ सा वै द्रष्टृदृश्यानुसंधानरूपा सदसदा
त्मिका कार्यकारणरूपा यद्वा सद्दृश्यं असद्द्रष्टृरूपं आत्मस्वरूपं च तयोरात्मा यस्याः तदुभयानुसंधानरूपत्वात् २५

श्री भा० टी०
२१
२१

कालावृत्त्या कालशक्त्या गुणमय्यां त्रिगुणायां अधोक्षजः परमात्मा आत्मांशभूतेन पुरुषेण प्रकृत्यधि
ष्ठातृरूपेण वीर्यं चिदाभासमाधत्त वीर्यवान् चिच्छक्तियुक्तः २१ कालप्रेरितादव्यक्तात्मायातः तत्वपदं पु
विसर्ज्यमहतोलक्षणं अतः पुंलिंगनिर्देशो विज्ञानात्मेति सत्वप्रधानत्वात् स्वदेहस्थं विश्वं उत्क्षुनवीजगतं मे
तादिरूपं वृत्तमिव प्रकाशयन् यतोसौतमोनुदतीति तमोनुदः तदुक्तं सात्वततंत्रे विष्णोस्तु त्रीणि रूपाणि पु

कालवृत्त्यात्तु मायायां गुणमय्यामधोक्षजः पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् २१ ततोभवन्महत्त
त्वमव्यक्तात्कालचोदितात् विज्ञानात्मात्मदेहस्थं विश्वं व्यंजंस्तमोनुदः सोप्यंशगुणकालात्मा भगवद्दृष्टि
गोचरः आत्मानं व्यकरोदात्मा विश्वस्यास्य सिसृक्षया महत्तत्वाद्विकुर्वाणादहंतत्वं व्यजायत कार्यका
रणकर्त्रात्मा भूतेंद्रियमनोमयः २४ वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा अहंतत्वाद्विकुर्वाणान्म

षाख्यान्यथो विदुः प्रथमं महतः स्रष्टृ द्वितीयं त्वंडसंस्थितं \\ नोवैकारिकादभूत् ३० वैकारिकाश्च ये देवा
तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यत इति २२ अहंकारोत्पत्तिमाह सार्धद्वाभ्यां सोपीति अंशश्चिदाभासो निमि
त्ते गुणा उपादाने कालः क्षोभकः तदात्मा तदधीनः भगवान्सर्वोपादानः तद्दृष्टिगोचरः सन्स्वयमात्मानं व्यकरोत् रूपां
तरमनयत् २३ अहंकारस्य लक्षणमाह कार्यमधिभूतं कारणमध्यात्मं कर्ता अधिदैवं तेषां आत्मा आश्रयः अत्र
हेतुः भूतेंद्रियमनोमयः तद्विकारवान् मन इति देवानामुपलक्षणं २४ एतदेव विभागतः प्रपंचयति वैकारिक

अक्षोभितं व्यंजन यतः ३

इत्यादिना वैकारिकः सात्विकः तैजसो राजसः देवसृष्टेकारिकाः कार्यभूतास्सर्वः
यतो यस्मादिंद्रियाणि प्रत्यक्षः अक्षं त्रिगुणं प्रकृतेः कारणमवति ३

२१

21A

तैजसान्येवेत्यन्वयः ज्ञानमयानां सात्विकत्वशंकामाभूदित्येवचकारः तामसो भूतसूक्ष्मस्य शब्दस्यादिः का
रणं यतः शब्दात् खं आकाशो भवति आत्मनो लिंगं स्वगुणशब्दरूपेण प्रकाशकं हृदयाकाशतया वा यद्वा
लिंगं शरीरं आकाशशरीरं ब्रह्मेति श्रुतेः ३१ नभसः स्वस्मादनुसृतं उद्भूतं स्पर्शं विकुर्वन् रूपांतरेण नयन् एवं स
र्वत्र तन्मात्रद्वारा भूतोत्पत्तिरिति ज्ञातव्यं ३२ नभसा सहितः स्वयं चोरुबलान्वितः ततो ज्योतिर्लोचनं प्रकाशकं

तैजसानीद्रियाण्येव ज्ञानकर्ममयानि च तामसो भूतसूक्ष्मादिर्यतः खं लिंगमात्मनः ३१ काल
मायांशयोगेन भगवद्वीक्षितं नभः नभसोनुसृतं स्पर्शं विकुर्वन्निर्ममेनिलं ३२ अनिलोपि विकु
र्वाणो नभसोरुबलान्वितः ससर्ज रूपतन्मात्रं ज्योतिर्लोकस्य लोचनं ३३ अनिलेनान्वितं ज्योति
र्विकुर्वत्परवीक्षितं आधत्ताम्भो रसमयं कालमायांशयोगतः ३४ ज्योतिषाम्भोनुसंसृष्टं विकुर्व
द्ब्रह्मवीक्षितं महीं गंधगुणामाधात्कालमायांशयोगतः ३५ भूतानां नभआदीनां
यद्यद्भव्य परावरं तेषां परानुसंसर्गाद्यथासंख्यं गुणान्विदुः ३६

३३ ३५ हे भव्य विदुर पाठांतरे भाव्यं कार्यं तस्मादवरमवरं कार्यं तेषां कार्याणां परैः कारणैः अनुसंसर्गात्
अन्वयात् यथासंख्यं यथाक्रममुत्तरोत्तरं अधिकान्गुणान्विदुः तथाहि नभसः शब्द एव गुणः अन्यान्वया
भावात् वायोस्तु स्पर्शः आकाशान्वयाच्छब्दश्च एवं तेजसस्तोचरूपंच अंभसस्तानि सरसानि सर्वे ३६

श्री॰ देवामहदाद्यभिमानिनः विष्णोःकलांशांशाः काललिंगंविकृतिः मायालिंगंविक्षेपःअंशलिंगंचेतना
तानिविद्यंतेयेषु अतोममत्वेननानात्वात् परस्परासंबंधात् स्वक्रियायांब्रह्मांडरचनायां अनीशाःअ-
भा॰त॰ शक्ताःसंतोविभुंपरमेश्वरंप्रोचुः ३७ मिथःस्वविस्रवोदेवाः नमिलंतःपरस्परं विश्वकर्मण्यनीशानानि
२२ 22 विद्यद्धरिमीडिरे प्रपन्नानांतापोपशमने आतपत्रंछत्रं तत्रहेतुः पदारविंदस्यमूलंतलं केतंआश्रयो

एतेदेवाःकलाविष्णोकालमायांशलिंगिनः नानात्वात्स्वक्रियानीशाःप्रोचुःप्रांजलयोविभुं ३७
श्रीदेवाः नमामतेदेवपदारविंदंप्रपन्नतापोपशमातपत्रं यन्मूलकेतायतयोंजसोरुसंसा
रदुःखंवहिरुत्क्षिपंति ३८ धातर्यदस्मिन्भवईशजीवास्तापत्रयेणोपहतानशर्म आत्मल्ल
भंतेभगवंस्तवांघ्रिच्छायांसविद्यामतआश्रयेम ३९

येषां वहिरुत्क्षिपंतिपरित्यजंति यथापांथाःस्वगृहंप्राप्यमार्गश्रममिव ३८ श्रमंविनिवेदयंत
आहुः हेधातःपितः यस्मात् भवेसंसारे आत्मन् आत्मनि संबोधनंवा शर्मसुखंवलभंते यदितिपाठे य
स्मादभजनंविनाशर्मनलभंते ननुज्ञानादज्ञानकृतस्तापोनिवर्तते किंमदंघ्रिच्छायाश्रयणेनतत्राहुः स
विद्यांतदाश्रयणमेव विद्याप्रापकमित्यर्थः ३९ २२

22A

अतस्तस्याश्रयणाद्योगात्तज्ज्ञानसाधनमाहुः मार्गंति अन्वेषयंति यत् तत्तीर्थपदस्तव पदं वयं प्रपन्नाः के मा
र्गंति छंदःसुपर्णैर्वेदपत्रिभिः तवैव मुखपद्मनीडेयेषां यथा पत्रिणो नीडादुद्गताः ततस्ततः परिभ्रम्य पु
नस्तत्रैव विशंति तथा वेदा अपि त्वत्त उद्गताः त्वय्येव पर्यवस्यंति अतो वेदानाश्रित्य त्वत्पदं मृगयंत इति विवि
क्ते असंगे मनसि किंचाघमर्षमघनाशकं उदकं यासां सरितां तासां वरा गंगा तस्याः पदं उद्गमस्थानं अतो

मार्गंति यत्ते मुखपद्मनीडैश्छंदःसुपर्णैरृषयो विविक्ते यस्याघमर्षोदसरिद्वरायाः पदं पदं तीर्थपदः
प्रपन्नाः ४० यच्छ्रद्धयाश्रुतवत्या च भक्त्या संमृज्यमाने हृदयेवधार्य ज्ञानेन वैराग्यबलेन धीरा व्रजेम
तत्तेंघ्रिसरोजपीठं ४१ विश्वस्य जन्मस्थितिसंयमार्थे कृतावतारस्य पदांबुजं ते व्रजेम सर्वे शरणं यदी
श स्मृतं प्रयच्छत्यभयं स्वपुंसां ४२ यत्सानुबंधेसति देहगेहे ममाहमित्यूढदुराग्रहाणां पुंसां सुदूरं व

गंगामनुसेवमाना अपि उद्गमस्थानं त्वत्पदं प्राप्नुवंतीत्यर्थः ॥ सतोपि पुर्यां भजेम तत्ते भगवत्पदाब्जम् ४३
४० ननु विषयाकृष्टचित्तानां कुतस्तदन्वेषणं तत्राहुः यच्छ्रद्धया हृदये अवधार्य ध्यात्वा वैराग्यं बलं यस्मात्ते
न ज्ञानेन धीरा भवति सरागे चित्ते ध्यानमेव कुतः अतः श्रद्धया श्रवणप्रवृत्तिकया भक्त्या च संमृज्यमाने संशोध्यमा
ने ४१ भक्तानुग्रहं स्मरंतमाहुः विश्वस्येति ४२ अंतर्यामितया नित्यं सन्निहिते अनर्थकं व्रजनमित्याशंक्या
हुः यदिति सानुबंधे सोपकरणे असति तुच्छे पुर्यां स्वदेहरूपपुरे वसतोपि सुदूरं दुष्प्रापम् ४३

तनुयदिहरिस्यस्यापिपराङ्मुखकेषांचित्स्वहृदंतर्हि अन्येषामपितथैवस्यात् अविशेषादित्याशंक्याह: ता
श्री० निति असद्वृत्तिभिर्बहिर्मुखैरक्षिभिरिंद्रियै: पराहृतंहृदयमपहृतं अंत:स्थमनोयेषांते अतोयत: यएतेनूनं
भा०तृ० तान्नपश्यंति वैप्रसिद्धं कुत: पुनस्तेषांतत्संग: स्यात् कान् तेतवपदन्यासोगमनं तस्यविलासोविभ्रम:
२३ तस्यलक्ष्मी: शोभातस्या येतवलीलाकथादिभि: शोभमानास्तान् तद्भक्तानित्यर्थ: पथइति लक्ष्यानितिपा
23 ठे लक्ष्यपदन्यासविलासोलक्ष्योयेषांतान् पथ: त्वन्मार्गभूतान्सत: मार्गान्वाश्रवणादीन् नपश्यंतीत्यर्थ:

तान्वैह्यसद्वृत्तिभिरक्षिभिर्येपराहृतांतर्मनस: परेश अथोनपश्यन्त्युरुगायनूनंयेतेपदन्यास
विलासलक्ष्म्या: ४४ पानेनतेदेवकथासुधाया: प्रवृद्धभक्त्याविशदाशयाये वैराग्यसारं
प्रतिलभ्यबोधं यथांजसान्वीयुरकुंठधिष्ण्यं ४५ तथापरेचात्मसमाधियोगबलेनजित्वाप्र
कृतिंबलिष्ठां त्वामेवधीरा: पुरुषंविशंतितेषांश्रम: स्यान्नतुसेवयाते ४६

यद्वा येएवंभूताभागवता: तेतावुन्मत्ता: नूनंनैवपश्यंतीत्यन्वय: सत्संगाभावेनहरिकथाश्रवणाभावा
हृदिस्थितमपितेषांसुदूरमितिभाव: ४४ एतदेवस्फुटयति पानेनेतिद्वाभ्यां वैराग्यं सारोबलंयस्यतंलब्ध्वा २३
अन्वीयु: प्रापु: अकुंठधिष्ण्यंवैकुंठलोकं ४५ आत्मनिसमाधिर्मनस: स्थैर्यं सएवयोगउपायस्तस्यबलेनज्ञा
नयोगन: श्रमएवमोक्ष: सत्संगत: त्वत्कथाश्रवणादिनात्वनायासेनैव अहंममताविष्टाणांनतुनकथंचिदिति

23A

तदेवंस्तुत्वाप्रार्थयंतेचतुर्भिः तत्तस्मात् हेआद्यतेत्वदीया वयंयस्माल्लोकानांसिसृक्षयात्वयानुसृष्टाः क्रमे
णोत्पादिताः त्रिभिरात्मभिः सत्वादिस्वभावैः अतएवविरुद्धस्वभावत्वाद्वियुक्ताः संतः यदर्थंसृष्टाः तत्त्व
विहारतंत्रंस्वक्रीडोपकरणंब्रह्मांडं तेतुभ्यंप्रतिहर्तुंदेवप्रतिहर्तुंसमर्थयितुंनशक्नुमः अतस्त्वनःस्वचक्षुः
परिदेहीति त्रयाणांलोकानांचतदर्थेनान्वयः ४७ असामर्थ्यमेवप्रपंचयितुंकार्यस्यातिवैचित्र्यमाहुः भो

वे

तत्तेवयंलोकसिसृक्षयाद्यत्वयानुसृष्टास्त्रिभिरात्मभिःस्म सर्वेवियुक्ताःस्ववि
हारतंत्रंनशक्नुमःतत्प्रतिहर्तवेते ४८ यावद्बलिंतेजहरामकालेयथावयंचा
न्नमदामयत्र यथोभयेषांतइमेहिलोकाबलिंहरंतोन्नमदंत्यनूहाः ४९

अजकालेतत्तदवसरे बलिंभोगंयावत्त्वाकल्पेनतुतेतुभ्यंहरामसमर्पयाम यथायेनप्रकारेण अन्नमदामभ
क्षयाम इत्यनेनोतमात्रं अस्माभिस्सर्वैर्णभोगस्तवैवेत्युक्तं उभयेषांतवचास्माकंच यत्रस्थिता इमेजीवाः अ
नूहाः अप्रत्यूहानिर्विघ्नाः यद्वा अनूहा अवितर्काः निःसंशया इत्यर्थः तथाचश्रुतिः तामेनमब्रुवन्नायतनं
नःप्रजानीहि यस्मिन्प्रतिष्ठाअन्नमदामेति ४९

श्री॰ भा॰ त्रे॰ २४ 24

अवश्यंचत्वयास्माकमेषांचकार्योपाधीनांजीवानांवृत्तिःपरिकल्पनीयाजनकत्वादित्याहुः नोऽस्माकंसान्व
यानांसकार्याणां यद्वा अन्वेतीत्यन्वयः कारणंतत्सहितानांत्वमेवाद्यः कारणमवहेतवः कूटस्थः अविक्रि
यः पुरुषः अधिष्ठाता पुराणः पुरातनः एतदुपपादयंति त्वमिति हेदेव अजएवत्वंगुणानांसत्वादीनां कर्म
णांजन्मादीनांचयोनौकारणभूतायांशक्त्यांमायायां प्रथमंरेत आदधेनिहितवानसीत्यर्थः कीदृशंकविंसर्व

त्वंनःस्वराणामसिसान्वयानांकूटस्थआद्यःपुरुषःपुराणः त्वंदेवशक्त्यांगुणकर्मयोनौरेतस्त्वजा
यांकविमादधेऽजः ४९ ततोवयंसत्प्रमुखायदर्थेबभूविमात्मन्करवामकिंते त्वंनःस्वचक्षुःपरि
देहिशक्त्यादेवक्रियार्थेयदनुग्रहाणां ५० इतितृतीयेपंचमोध्यायः ५ ऋषिरुः इतितासांस्वशक्ती
नांसतीनामसमेत्यसः प्रसुप्तलोकतंत्राणांनिशाम्यगतिमी [illegible]

तेमहत्तत्वरूपं ४९ ततःहेआत्मन् देव
सत्प्रमुखामहदादयोवयंयदर्थेबभूविम तत्किंतेकार्यंकरवाम सृष्टिमितिचेत्तत्राहुः तर्हिनोऽस्माकंस्व
चक्षुःस्वीयंज्ञानंक्रियाशक्त्यासहपरिदेहिप्रयच्छ यस्मात्त्वत्तएवानुग्रहोयेषांतेयदनुग्रहास्तेषामस्माकं क्रि
यार्थेः इयानेवएतावाननुग्रहोयेषामित्येकंवापदं त्वदीयज्ञानक्रियाशक्तिभ्यामेववयंसृष्टौक्षमाः नान्यथे २४
त्यर्थः ५० इतितृतीयस्कंधेपंचमः ५ षष्ठेतेषांस्वराविष्टैःसृष्टिमाहविराड्जनोः अधिदैवाधिभेदंचतत्रैवभगवत

24A

स्वशक्तीनां महदादीनां असमेत्य अमिलित्वा सतीनां स्थितानां प्रसमं लोकतंत्रं विश्वरचनायां सा यदा प्र
सुप्तजीवोपकरणानां गतिं स्थितिं दृष्ट्वा आविशद्विस्तरेणान्वयः १ कालेन संज्ञातं देहो धीयस्याः कलयति
लोभयति स्वकार्याणीति वा कालसंज्ञा प्रतिः तां शक्तिं प्रकृत्या सह प्रवेशात् त्रयोविंशतितत्वानामित्युक्त
मंतर्यामितया प्राविशत् २ चेष्टारूपेण क्रियाशक्त्या कर्म तेषां क्रियां जीवानामदृष्टं वा ३ प्रबुद्धं कर्म क्रि

कालसंज्ञां तदा देवी बिभ्रच्छक्तिमुरुक्रमः त्रयोविंशति तत्वानां गणं युगपदाविशत् २ सोनु
प्रविष्टो भगवांश्चेष्टारूपेण तं गणं भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन् ३ प्रबुद्धकर्मा दै
वेन त्रयोविंशतिको गणः (चुक्षोभान्योन्यमासाद्य यस्मिंल्लोकाश्चराचराः) प्रेरितोजनयत्स्वाभि
र्मात्राभिरधिपूरुषं ४ परेण विशता स्वस्मिन्मात्रया विश्वसृग्गणः चुक्षोभान्योन्यमासाद्य यस्मिंल्लो
काश्चराचराः हिरण्मयः स पुरुषः सहस्रपरिवत्सरान् अंडकोश उवासाप्सु सर्वसत्वोपबृंहितः ६

याशक्तिर्यस्य सः त्रयोविंशतेर्गुणः दैवेनेश्वरेण प्रेरितः मात्राभिरंशैः अधिपूरुषं विराड्देहं अजनयत् ४ जन
नमेवाह परेणेश्वरेण विश्वसृजां तत्वानां गणः मात्रया चुक्षोभ परिणतः न सर्वात्मना यस्मिंल्लोकाः स्थिताः ५
स पुरुषः योधिपूरुषत्वेनोक्तः अंडकोशे ब्रह्मांडमध्ये सर्वैः सत्वैरनुशायिभिर्जीवैः सहितः ६

श्री॰
भा॰टी॰
२५
25

गर्भः कार्यरूपो विराट् देवशक्तिः ज्ञानशक्तिः तया एकधा हृदयावच्छिन्नचैतन्यरूपेण कर्मशक्तिः क्रिया
शक्तिः तया दशधा प्राणरूपेण प्राणादयः पंच नागः कूर्मश्च कृकरो देवदत्तो धनंजयः इत्येवं पंच एवं द्व
त्रिभेदेन दशविधः प्राणः आत्मशक्तिः भोक्तृशक्तिः तया अध्यात्मादिभेदेन त्रिधा आत्मानं विभक्तं कृतवा
न् ७ एवं विभागसामर्थ्यात्तस्योत्कर्षमाह एष हीति अशेषसत्त्वानां प्राणिनां आत्मा व्यष्टीनां तदंशत्वात् अ

स वै विश्वसृजां गर्भो देवकर्मात्मशक्तिमान् विबभाजात्मनात्मानमेकधा दशधा त्रिधा ७ एष ह्य
शेषसत्त्वानामात्मांशः परमात्मनः आद्योऽवतारो यत्रासौ भूतग्रामो विभाव्यते ८ साध्यात्मः साधिदै
वश्च साधिभूत इति त्रिधा विराट् प्राणो दशविध एकधा हृदयेन च ९ स्मरन्विश्वसृजामीशो विज्ञा
पितमधोक्षजः विराजमतपत्स्वेन तेजसैषां विवृत्तये १० अथ तस्याभितप्तस्य कति चायतनानि च नि

द्योजीवः अवतारत्वोक्तिः तस्मिन्नारायणाविर्भावाभिप्रायेण ८ रभिद्यंत देवानां तानि मे गदतः शृणु ११
एवं श्लोकार्थं विवृणोति साध्यात्मः अध्यात्मानि इंद्रियाणि तत्सहितः विराडिति सर्वत्र योज्यं ९ अध्यात्मादि
भेदं प्रपंचयितुमाह स्मरन्निति विज्ञापितं यावद्बलिं तेजः द्वारामेत्यादि स्वेन तेजसा चिच्छक्त्या अतपत् एवं क २५
रिष्यामीति आलोचितवान् यस्य ज्ञानं स एव तपः इति श्रुतेः विवृत्तये विविधवृत्तिलाभाय १० मे मत्तः शृणु ११

मे

25A

आयतनान्येवाह तस्याग्निरित्यादिचतुर्दशभिः आस्यं निर्भिन्नं पृथग्जातं पदं स्वस्थानं स्वांशेन स्वशक्त्या वाचा
सह्याविशत् असौ जीवः वक्तव्यं प्रतिपद्यते शब्दमुच्चारयतीत्यर्थः सर्वत्र यन्निर्भिन्नं तदधिष्ठानं अग्न्यादिप्रथमांत
मपि देवं वागादीन्द्रियं तत्तीयांतमध्यात्मं प्रतिपन्नमधिभूतं २ हरेः विराजः ३ ४ त्वष्टा आदित्यः ५ प्राणेन। 56

तस्याग्निरास्यं निर्भिन्नं लोकपालो विशत्पदं वाचा स्वांशेन वक्तव्यं यया सौ प्रतिपद्यते २ निर्भिन्नं तालु
वरुणो लोकपालो विशद्धरेः जिह्वायांशेन स्वरसं यया सौ प्रतिपद्यते ३ निर्भिन्ने अश्विनौ नासे विष्णो
राविशतां पदं घ्राणेनांशेन गंधस्य प्रतिपत्तिर्यतो भवेत् ४ निर्भिन्ने अक्षिणी त्वष्टा लोकपालो विशद्वि
भोः चक्षुषांशेन रूपाणां प्रतिपत्तिर्यतो भवेत् निर्भिन्नान्यस्य चर्माणि लोकपालोनिलो विशत् प्रा
णेनांशेन संस्पर्शं येनासौ प्रतिपद्यते ६ कर्णावस्य विनिर्भिन्नौ धिष्ण्यं स्वं विविशुर्दिशः श्रोत्रेणांशे
न शब्दस्य सिद्धिं येन प्रपद्यते ७ त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः अंशेन रोमभिः कंडूं यैर
सौ प्रतिपद्यते ८ मेढ्रं तस्य विनिर्भिन्नं स्वधिष्ण्यं क उपाविशत् रेतसांशेन येनासावानंदं प्रतिपद्यते ९

ति प्राणवद्देहव्यापिनात्वँगिंद्रियेणेत्यर्थः ६ शब्दस्य सिद्धिं ज्ञानं ७ त्वचं चर्म ओषधीः ओषधयः त्वगिंद्रियस्थे
वस्थानभेदेन विषयद्वयं कंडूः स्पर्शश्च तत्रायतनाभेदो देवताभेदश्चेति द्वितीयखंडं व्याख्यातं ८ कः स

ऐतरेयो° २२

श्री· २० स्वः प्रतिस्वर्गस्यपतिः वार्तयाक्रयविक्रयादिशात्यावृत्तिंजीकां २१ २२ २३ विक्रियांसंकल्पादि
भा·तृ· रूपां २४ आत्मानमहंकारं अभिमन्यतेनेनेति अभिमानोरुद्रः कर्मणाहंकृत्याकर्तव्यमितिक्रियां

२६
26

गुदंपुंसोविनिर्भिन्नंमृत्युर्लोकेशआविशत् पायुनांशेनयेनासौविसर्गंप्रतिपद्यते २०
हस्तावस्यविनिर्भिन्नाविंद्रःस्वर्पतिराविशत् वार्तयांशेनपुरुषोयथावृत्तिंप्रपद्यते २१
पादावस्यविनिर्भिन्नौलोकेशोविष्णुराविशत् गत्यास्वांशेनपुरुषोयथाप्राप्यंप्रपद्यते २२
बुद्धिश्चास्यविनिर्भिन्नावागीशोधिष्ण्यमाविशत् बोधेनांशेनबोद्धव्यंप्रतिपत्तिर्यतोभवत्
हृदयंचास्यनिर्भिन्नंचंद्रमाधिष्ण्यमाविशत् मनसांशेनयेनासौविक्रियांप्रतिपद्यते २४
आत्मानंचास्यनिर्भिन्नमभिमानोविशत्पदं कर्मणांशेनयेनासौकर्तव्यंप्रतिपद्यते २५
सत्वंचास्यविनिर्भिन्नंमहान्धिष्ण्यमुपाविशत् चित्तेनांशेनयेनासौविज्ञानंप्रतिपद्यते २६

२६

२५ सत्वमितिबुद्धिचित्तयोरभेदेननिर्देशः महानिति अस्माचित्तेनचेतनया २६ ॥

26A

त्रिलोकोत्पत्तिमाह शीर्ष्णइति वृत्तयः परिणामा २७ एतदेव प्रपंचयति द्वाभ्यां आत्यंतिकेन ऊर्जितेन पण
व्यवहारे पणंते यागादिना व्यवहरंतीति पणयो मनुष्याः तानन्वयेत दुपकरणभूताः येगवादयस्तेपि धरां
प्रपेदिरे २८ तृतीयेन तमः तदीयेन तामसेन उभयोः द्यावापृथिव्योरंतरं मध्यं व्योमांतरिक्षं तदेव भगवतो ना
भिस्तामाश्रिताः रुद्रपार्षदाः रुद्रस्य पार्षदानां भूतादीनां गणाः २९ अवर्तत प्रवृत्तं ब्रह्म वेदः यस्त्वन्मुखत्वान्मु॰

शीर्ष्णोस्य द्यौर्धरा पद्भ्यां खं नाभेरुदपद्यत गुणानां वृत्तयो येषु प्रतीयंते सुरादयः २७ आत्यंतिकेन स
त्त्वेन दिवं देवाः प्रपेदिरे धरां रजःस्वभावेन पणयो ये च तानन्तु २८ तार्तीयेन स्वभावेन भगवन्नाभिमाश्रिताः
उभयोरंतरं व्योम ये रुद्रपार्षदां गणाः २९ मुखतोवर्तत ब्रह्म पुरुषस्य कुरूद्वह यस्त्वन्मुखत्वाद्वर्णानां
मुख्योभूद्ब्राह्मणो गुरुः ३० बाहुभ्योवर्तत क्षत्रं क्षत्रियस्तदनुव्रतः यो जातस्त्रायते वर्णान्पौरुषः कंट
कक्षतात् ३१

त्वोद्भवत्वाद्वर्णानां मुख्यः मुखमिव प्रथमः ऊरुश्चाभूत् सोपि मुखतो वर्तते तस्यानुषंगः अ॥
ध्यापनादिना ब्रह्मणस्य वेदो वृत्तिः तयाह त्स्यामहद्ब्राह्मणो मुखतो जात इत्यर्थः एवमुत्तरत्र वर्णाश्रयेति ज्ञातव्यं
३० क्षत्रं पालनरूपा वृत्तिः तत्क्षत्रमनुव्रतः अनुसृतः क्षत्रियोपि बाहुभ्यो वर्तत इत्यर्थः तदनुव्रतत्वमेवाह यइति
पौरुषः पुरुषस्य विष्णोरंशः कंटकाश्चौरादयः तेभ्यो यत्क्षतं उपद्रवः तस्मात्त्रायते रक्षति ३१

श्री· विशः कृष्यादिव्यवसायाः लोकस्यवृत्तिकरीः जीविकाहेतवः तस्यविभोरूर्वोः प्रवृत्ताः तदुद्भवः ऊरु
जः वार्त्तांजीविकांयः स्ववृत्त्यासंपादितवान् ३२ तस्यांनिमित्तभूतायां यस्यवृत्त्याहरिःस्वयमेवतुष्यते
भा·टी· ३३ यद्यस्माज्जाताः शुश्रूषत्वाज्जनकत्वाद्वृत्तिप्रदत्वाच्चहरेराराधनंतेषांपरोधर्मइत्यर्थः ३४ भोतत्त्वाः देवक
२२ र्मात्मरूपिणः कालकर्मस्वभावशक्तिमतः भगवतोयोगमायाबलेनोज्जृम्भितमेतद्विराड्रूपं उपाक
27

विशोऽवर्तन्ततस्योर्वोः लोकवृत्तिकरीर्विभोः वैश्यस्तदुद्भवोवार्त्तांनृणांयः समवर्तयत् ३२
पद्भ्यांभगवतोजज्ञेशुश्रूषाधर्मसिद्धये तस्यांजातः पुराशूद्रोयद्वृत्त्यातुष्यतेहरिः ३३
एतेवर्णाःस्वधर्मेणयजंतिस्वगुरुंहरिं श्रद्धयात्मविशुद्ध्यर्थंयज्जाताःसहवृत्तिभिः ३४
एतत्क्षत्तर्भगवतोदैवकर्मात्मरूपिणः कःश्रद्दध्यादुपाकर्तुंयोगमायाबलोदयम् ३५ ग
अथापिकीर्तयाम्यंगयथामतियथाश्रुतं कीर्तिंहरेःस्वांसत्कर्तुंगिरमन्याभिधासतीं ३६

र्तुंसाकल्येननिरूपयितुं कःश्रद्दध्यात् इच्छेत् इच्छाप्यशक्यानिरूपणंतुदूरतइत्यर्थः ३५ अंगविदुरत
थापिहरेः कीर्तिंकीर्तयामि यथाश्रुतंगुरुमुखात् तदपिनसर्वात्मना किंतुयथामतिस्वमत्यनुसा २७
रेण अन्याभिधाहरिव्यतिरिक्तार्थाभिधाने सत्यासतींमलिनांस्वीयांवाचंसत्कर्तुंपवित्रीकर्तुं ३६

27A

अज्ञात्वापियथामतिकीर्तनेश्रवणेवा अवश्यंकेवलमित्याह एकांततोलाभंतुनिश्चितमाह श्रुतेः
श्रोत्रस्य उपाहृतायां निरूपितायांउपसंप्रयोगंसन्निधावर्पणं ३० नचातीवज्ञानेनिर्बंधःकर्त्तव्यः ब्रह्म-
णोपिदुर्ज्ञेयत्वादित्याह आत्मनोहरेर्महिमायोगविपक्वयासंवत्सरसहस्रांतेपि आदिकविनाब्रह्मणा
पिकिमसितइतिकाकुक्त्या एतावानितिनज्ञातएवेत्यर्थः ३८ यद्यस्मात्स्वयमपिआत्माहरिःआत्मवर्त्म

एकांतलाभंवचसोनुपुंसांसुश्लोकमौलेर्गुणवादमाहुः श्रुतेश्चविद्वद्भिरुपाकृ
तायांकथासुधायामुपसंप्रयोगं ३० आत्मनोवसितोवत्समहिमाकविनादिना
संवत्सरसहस्रांतेधियायोगविपक्वया ३८ अतोभगवतोमायामायिनामपिमो
हिनी यत्स्वयंचात्मवर्त्मात्मानवेदकिमुतापरे ३९ यतोप्राप्यनिवर्त्ततेवाचश्चम
नसासह अहंचान्यइमेदेवास्तस्मैभगवतेनमः ४० इतितृतीयस्कंधेषष्ठः ६

स्वमायागतिं एतावदितिनवेदअनंतत्वात् ३९ अतोदुर्ज्ञेयत्वात्केवलंनमस्करोति यतइति यस्यज्ञानाय
प्रवृत्तावाचोपिमनसासह तमप्राप्यैवन्यवर्त्तंतदुर्ज्ञेयत्वात् नकेवलंवाङ्मनसी अहमहंकारस्याधि
ष्ठाताशिवोपिइमेइंद्रियाधिष्ठातारोदेवाअन्येच ४० इतितृतीयस्कंधेषष्ठोध्यायः ६ ॥

श्री॰ भा॰ त॰ २८ 28

समनमेसंशयच्छेदि प्रतिनेयमुनेर्वचः पुनः तत्ताकृतानानाप्रश्नाः सम्यगुदीरिताः अथतेभगवल्लीला
योगमायोपबृंहिताः इत्यादिनामायागुणैर्लीलयाभगवान्सृष्ट्यादिकरोतीत्येवंब्रुवाणंभारत्याप्रार्थना
रूपयाप्रीणयन्निवेति अभिप्रायाज्ञानेनानादिपन् १ निर्विकारस्यक्रियानिर्गुणस्यचगुणाः कथंलील
येत्यक्तिः प्रयोजनाभावंपरिहरति नवस्तुविरोधमितिभावः २ अर्भकवल्लीलापिनयुज्यते वैषम्यादि

सूतउ॰ एवंब्रुवाणंमैत्रेयंद्वैपायनसुतोबुधः प्रीणयन्निवभारत्याविदुरःप्रत्यभाषत १
विदुरउवाच ब्रह्मन्कथंभगवतश्चिन्मात्रस्याविकारिणः लीलयाचापियुज्येरन्निर्गुणस्यगु
णाःक्रियाः २ क्रीडायामुद्यमोर्भस्यकामश्चिक्रीडिषान्यतः स्वतस्तृप्तस्यचकथंनिवृत्तस्यसदा
न्यतः ३

त्याह उद्यमयतिप्रवर्तयतीतिउद्यमः अर्भकस्यक्रीडायांप्रवृत्तिर्हेतुः कामोस्ति अन्यतस्तुवस्त्वंतरेणवा
लंतरप्रवर्ततेनवा तस्यक्रीडेच्छाभवति ईश्वरस्यतुस्वतस्तृप्तस्यकथंकामः अन्यतःसदानिवृत्तस्यचा
संगात्तृतीयस्यकथमन्यतश्चिक्रीडिषेत्यर्थः ३ २८
द्वि

29A यच्चोक्तं स्मरन्विश्वसृजामीशो विज्ञापितमधोक्षज इत्यादिना अविद्योपाधेर्जीवस्य भोगार्थमीश्वरः सृष्ट्यादिक
रोतीति तदप्याक्षेप्तुमनुवदति असावतीति गुणमयी आत्मनो जीवस्य कर्तृत्वभोक्तृत्वादिमोहोत्पादिका या
माया तया सृष्टवान् तदुक्तं प्रथमे यया संमोहितो जीव आत्मानं त्रिगुणात्मकं परोऽपि मनुतेऽनर्थं यत्कृतं चाभि
पद्यत इत्यादिना अत्र च अतो भगवतो माया मायिनामपि मोहिनीति संस्थापयति पालयति प्रत्यपिधास्य
ति प्रातिलोम्येन तिरोहितं करिष्यति पाठांतरे प्रातिलोम्येनात्मनि धारयिष्यति ४ एतच्च जीवस्याविद्याश्रयत्वे

असावतीन्द्रभगवान्विश्वं गुणमय्यात्ममायया तया संस्थापयत्येतद्भूयः प्रत्यपिधास्यति ४
देशतः कालतो योऽसाववस्थातः स्वतोऽन्यतः अविलुप्तावबोधात्मा स युज्येताजया कथं ५

घटेत न तत्संभवतीत्याह देशत इति योऽसौ देशादिभिरविलुप्तावबोध आत्मा जीवब्रह्मस्वरूपत्वात् स क
थमजयाऽविद्यया युज्येत तत्र देशतो दीपप्रभाया इव लोपो नास्ति सर्वगतत्वात् न कालतो विद्युत इवानित्य
त्वात् नावस्थातः स्मृतिवदविक्रियत्वात् न स्वतः स्वप्नवत्सत्यत्वात् नान्यतः घटादिवत् अद्वितीयत्वादेवमे
तैर्यस्य बोधो न लुप्यते स कथमजया युज्येत अजा चात्राविद्यैव न माया तस्या अवबोधेन विरोधाभावात् ५ ॥
॥ ॥ ॥

श्री॰ किंच ब्रह्मरूपत्वादेवजीवस्यसंसारोपिनविद्यतइति आक्षिपति सर्वत्रेतेषुवस्थितोभोक्तापिवस्तुतोभगवा
भा॰टी॰ नेवचिद्रूपत्वेन तद्व्यतिरेकाभावात् एवंचसति अमुष्यजीवस्यदुर्भगत्वं आनंदादिभ्रंशः कर्मभिर्हेतुभूतैःक्ले
२९ शोवाकुतः कर्मसंबंधाभावात् अन्यथाईश्वरस्यापितत्संगःस्यादितिभावः ६ अज्ञानमेवसंकटंदुर्गंतस्मिन्
29 तन्मानसंकश्मलंमोहंपरानुदअपाकुरु ७ चोदितःआक्षिप्तः स्मयन्निव आविष्कुर्वन्निव वस्तुतस्तुगतस्म

भगवानेकएवैषसर्वक्षेत्रेष्ववस्थितः अमुष्यदुर्भगत्वंवाक्लेशोवाकर्मभिःकुतः ६ एत
स्मिन्मेमनोविद्वन्खिद्यतेज्ञानसंकटे तन्नःपरानुदविभोकश्मलंमानसंमहत् ७ सूतउ॰
सइत्थंचोदितःक्षत्रातत्त्वजिज्ञासुनामुनिः प्रत्याहभगवच्चित्तःस्मयन्निवगतस्मयः ८ मैत्रे
यः सेयंभगवतोमायायन्नयेनविरुध्यते ईश्वरस्यविमुक्तस्यकार्पण्यमुतबंधनं ९ य
दर्थेनविनामुष्यपुंसआत्मविपर्ययः प्रतीयतउपद्रष्टुः स्वशिरश्छेदनादिकः १०

यः ८ भगवतोचिंत्यशक्तेरीश्वरस्य सेयंमाया नयेनतर्केणाविरुध्यतइति यत्तर्कविरोधमेवानुवदति ॰
विमुक्तस्यैवपुंसोविद्ययाबंधनंकार्पण्यंचेति ९ अत्रोदाहरणमाह यद्यथाअर्थेनशिरःछेदादिनाविना २९
पि उपद्रष्टुः स्वप्नसाक्षिणः ममेदंशिरश्छिन्नंइत्यात्मविपर्ययः यः केवलंमृषैवप्रतीयतेतद्वत् १०

मे

29A तर्हि ईश्वरस्यापि किं न प्रतीयेत तत्राह यथा जले प्रतिबिंबितस्यैव चंद्रस्य न लोपाधिकृतः कम्पादिधर्मो दृ
श्यते न त्वाकाशे स्थितस्य तथानात्मनो देहादेर्धर्मः असन्नपि तदभिमानिनो द्रष्टुरात्मजीवस्यैव न त्वीश्वर
स्यैवेत्यर्थः ११ तन्निवृत्त्युपायमाह स वै अनात्मनो गुणः निवृत्तिधर्मेण वासुदेवानुकंपातयाचतस्मिन्भक्ति
योगः तेन तिरोधत्ते अदर्शनो भवति शनैरित्यनेन साधनानुसारेणोत्सुक्ते १२ तर्हि सर्वानर्थनिवृत्तिः कदे

यथा जले चंद्रमसः कम्पादिस्तत्कृतो गुणः दृश्यते सन्नपि द्रष्टुरात्मनो नात्मनो गुणः ११ स वै
निवृत्तिधर्मेण वासुदेवानुकंपया भगवद्भक्तियोगेन तिरोधत्ते शनैरिह १२ यदेंद्रियोपरामो
थ द्रष्टात्मनि परे हरौ विलीयंते तदा क्लेशाः संसुप्तस्येव कृत्स्नशः १३ अशेषसंक्लेशशमं विध
त्ते गुणानुवादश्रवणं मुरारेः कुतः पुनस्तच्चरणारविंदपरागसेवारतिरात्मलब्धा १४

त्यपेक्षायामाह यदेंद्रियाणामुपरामो नैश्चल्यं कद्रष्टात्मनि अंतर्यामिरूपे अथानंतरमेव हतत्क्लेशा
विलयमाचरणांतः सुसुप्तस्येवेति न तु पुनरुत्थाने १३ भक्तियोगेन क्लेशनिवृत्तिं दर्शयति अशेषेति
गुणानामनुवादश्रवणं च आत्मनि मनसि लब्धा श्रवणकीर्तनापेक्षया सप्रेमध्यानेन किं पुनर्न्यायोक्तिः १४

श्री· भा·तृ· ३ 30

उक्तमभिनंदन्नात्मनःकृतार्थतामाविष्करोति संछिन्नइतिषड्भिः विरूपत्वाविशेषेपिकथमीश्वरस्यजग
त्कर्तृत्वादिकथंजीवस्यसंसारइतियःसंशयोममासीत् सतवसूक्तासोपपत्तिकं वाक्यमेवासिःखड्गःते
नसंछिन्नःअतइदानींमेमनउभयत्रापिईश्वरस्वातंत्र्येजीवपारतंत्र्येवसंप्रधावतिसम्यक्प्रविशति एवंवा
विलक्षणावबोधरूपस्यात्मनःकथमविद्ययावन्धःकुतोवातन्निवृत्तिरितिसंशयःउभयत्रबंधेमोक्षेचेत्यर्थः १४ य
स्मात्त्वयासाधुव्याहृतं किंतद्धरेशक्तिर्याआत्ममायाजीवविषया तदयनंतदाश्रयमेतत् दुर्घटत्वादिकंभा

विदुर उ० संछिन्नःसंशयोमह्यंतवसूक्तासिनाविभो उभयत्रापिभगवन्मनोमेसंप्रधाव
ति १५ साध्वेतद्व्याहृतंविद्वन्नात्ममायायनंहरेः आभात्यपार्थंनिर्मूलंविश्वमूलंनयद्बहिः १६
यश्चमूढतमोलोकेयश्चबुद्धेःपरंगतः तावुभौसुखमेधेतेक्लिश्यत्यंतरितोजनः १७

तीति यद्यस्मात्स्वशिरश्छेदादिवदपार्थमवस्तुभूतंमूलशून्यंच यस्मादस्यविश्वस्यमूलेस्वात्मानंविनाव
हिर्नास्ति १६ अल्पज्ञत्वात्सर्वंममसंशयोजातइत्याह यश्चेति मूढतमोदेहाद्यासक्तःबुद्धेःप्रकृतेःपरमी
श्वरंप्राप्तःतौसुखंयथाभवति तथाप्येतेजीवतइत्यर्थः संशयक्लेशाभावात् यस्तुदुःखानुसंधानेनप्रपंचं ४
जिहासतिस्वानंदसंवेदनाभावात्त्यक्तुंनशक्नोतिसतुक्लिश्यतीत्यर्थः १७

इदानींतत्कृतार्थोस्मि यतस्त्वयासंशयः छिन्नःकेवलंवाधितानुवृत्तिरेवावशिष्टासापियुष्मत्वदान्निवा-
र्तिष्यतइत्याह नात्मनःअनात्मनःप्रपंचस्यप्रतीतस्यापि अर्थाभावंअर्थोत्रनास्ति किंतुप्रतीतिमात्रं यु-
ष्मच्चरणसेवयानिश्चित्यतांप्रतीतिमप्यहंपराणुदेअपनेष्यामीत्यर्थः १८ मधुद्विषःपादयोःरतिरासःप्रेमो-
त्सवःतीव्रःदुर्वारःस्वाभाविकःव्यसनंसंसारमर्दयतिनाशयतीतितथा १९ अहोदुर्लभंप्राप्तमप्येत्याह

अर्थाभावंविनिश्चित्यप्रतीतस्यापिनात्मनः तांचापियुष्मच्चरणसेवयाहंपराणुदे १८
यत्सेवयाभगवतःकूटस्थस्यमधुद्विषः रतिरासोभवेत्तीव्रःपादयोर्व्यसनार्दनः १९
दुरापाह्यल्पतपसःसेवावैकुंठवर्त्मसु यत्रोपगीयतेनित्यंदेवदेवोजनार्दनः २०
सृष्ट्वाग्रेमहदादीनिसविकाराण्यनुक्रमात् तेभ्योविराजमुद्धृत्यतमनुप्राविशद्विभुः २१

दुरापादुर्लभा वैकुंठस्यविष्णोस्तल्लोकस्यवावर्त्मसुमार्गभूतेषुमहत्सु यत्रयेषुमहत्सेवयाहरिकथा-
श्रवणम् ततोहरौप्रेमतेनचदेहाद्यनुसंधानमपिनिवर्ततइतितात्पर्यं २० अर्थांतरंप्रष्टुंतदुक्तमनुव-
दतित्रिभिः सृष्ट्वेतिविकारैरिंद्रियादिभिःसहितानिउद्धृत्यतदंशैः २१

श्री॰ भा॰टी॰ ३१ 31

वैराज्यं सृष्ट्वा प्रविष्टस्य स्वरूपमाह यमिति विराजं विशिनष्टि यत्रेति ते इमे विश्वे सर्वे लोकाः सविकासाः
समं संकोचं २२ प्राणादयः पंच नागादयः पंचेति एवं दशविधः इंद्रियाणि च अर्थाश्च इंद्रियाणि चेति त्रिवृन्
त्रिः तद्देवतालक्षणार्था तस्मादितः सर्वोपबृंहकत्वात्प्राणस्य तत्साहित्ये एवं त्रिवृत् त्रिविधः प्राणस्त्वया
ईरित उक्तः तस्य विभूतीर्ब्रह्माद्याः सर्गविसर्गशब्दवाच्याः २३ यत्र यास्त इदं विश्वं ततं व्याप्तं २४ एवमे

यमाहुराद्यं पुरुषं सहस्रांघ्र्यूरुबाहुकं यत्र विश्व इमे लोकाः सविकासं समासत २२ यस्मिन्दश
विधः प्राणः सेंद्रियार्थेंद्रियस्त्रिवृत् त्वयेरितो यतो वर्णास्तद्विभूतीर्वदस्व नः २३ यत्र पुत्रैश्च पौत्रैश्च
नप्तृभिः सह गोत्रजैः प्रजा विचित्राकृतय आसन्याभिरिदं ततं २४ प्रजापतीनां स पतिः चिक्लृपे
कान्प्रजापतीन् सर्गांश्चैवानुसर्गांश्च मनून्मन्वंतराधिपान् २५ एतेषामपि वंशांश्च वंशानुचरि
तानि च उपर्यधश्च ये लोका भूमेर्मित्रात्मजासते तेषां संस्थां प्रमाणं च भूर्लोकस्य च वर्णय २६

तत्र यत्पृष्टो मैत्रेयो भगवान्किलेति परीक्षित्प्रश्नोत्तरतया विदुरमैत्रेयसंवादः प्रस्तावितः अतस्तानेवा
विदुरप्रश्नानाह यावत्समाप्तिः प्रजापतीनां पतिः ब्रह्मेत्यादीनां वर्णयेति वक्ष्यमाणेनान्वयः चि ३१
क्लृपे अकल्पयत् सर्गान्नवविधान् अनुसर्गांस्तद्भेदान् २५ हे मित्रायाः आत्मज संस्थाः सन्निवेशः २६

31A

सर्गाणां व्यूहं संविभागं गार्भस्वेदद्विजोद्भिदां गार्भा जरायुजाः स्वेदाश्च द्वाभ्यां च पताः स्वेदद्विजाः उ
द्भिदश्च तेषां २७ सर्गादीनाश्रयं च सृजतः २८ रूपं लिंगं शीलम् आचारः स्वभावः शमादिः ततः विकर्ष

तिर्यङ्मानुषदेवानां सरीसृपपतत्रिणां वद नः सर्गसंव्यूहं गार्भस्वेदद्विजोद्भिदां २७ गुणाव
तारैर्विश्वस्य सर्गस्थित्यप्ययाश्रयं सृजतः श्रीनिवासस्य व्याचक्ष्वोदारविक्रमं वर्णाश्रमविभा
गांश्च रूपशीलस्वभावतः ऋषीणां जन्मकर्माणि वेदस्य च विकर्षणं २९ यज्ञस्य च वितानानि
योगस्य च पथः प्रभो नैष्कर्म्यस्य च सांख्यस्य तंत्रं वा भगवत्स्मृतं ३० पाषंडपथवैषम्यं प्रतिलोम
निवेशनं जीवस्य गतयो याश्च यावतीर्गुणकर्मजाः ३१ धर्मार्थकाममोक्षाणां निमित्तान्यविरो
धतः वार्तायां दंडनीतेश्च श्रुतस्य च विधिं पृथक् ३२ श्राद्धस्य च विधिं ब्रह्मन्पितॄणां सर्गमेव च ग्र
हनक्षत्रताराणां कालावयवसंस्थितिं ३३

णां विभागात् २९ वितानानि विस्तारान् नैष्कर्म्यस्य च ज्ञानस्य तदुपायस्य च सांख्यस्य पथः मार्गान् तंत्रं चेत्यर्थः ३० पा
षंडानां पंक्तः प्रवृत्तिः तदेव वैषम्यं ३१ निमित्तानि उपायान् परस्पराविरोधेन ३२ ग्रहादीनां कालचक्रे संस्थितिं ३३

श्री· २४ येनमार्गेणसंतरेत् येषामितियादृशानां २५ अनापृष्टमिति अपृष्टमपिसद्योगंवक्तव्यमितिभा
भा·टी· वः २६ प्रतिसंक्रमः प्रलयः तत्रप्रलये इमंपरमेश्वरं शयानंराजानमिवचामरग्राहिणः केवाअनुशेरते
शयानमनुस्वपंति २७ पुरुषस्यसंस्थानंजीवस्यतत्त्वंपरमेश्वरस्यस्वरूपंयेनांशेनतयोरैक्यं तथाज्ञानंच
३२
32

दानस्यतपसोवापियच्चेष्टापूर्तयोःफलं प्रवासस्थस्ययोधर्मोयश्चपुंसउतापदि २४ येनवाभ
गवांस्तुष्येद्धर्मयोनिर्जनार्दनः संप्रसीदतिवायेषामेतदाख्याहिचानघ २५ अनुव्रतानांशि
ष्याणांपुत्राणांचद्विजोत्तम अनापृष्टमपिब्रूयुर्गुरवोदीनवत्सलाः २६ तत्त्वानांभगवंस्तेषांक
तिधाप्रतिसंक्रमः तत्रेमंकउपासीरन्कउस्विदनुशेरते २७ पुरुषस्यचसंस्थानंस्वरूपंवापर
स्यच ज्ञानंचनैगमंयत्तद्गुरुशिष्यप्रयोजनं २८ निमित्तानिचतस्येहप्रोक्तान्यनघसूरिभिः
स्वतोज्ञानंकुतःपुंसांभक्तिर्वैराग्यमेववा २९ एतान्मेपृच्छतःप्रश्नान्हरेःकर्मविवित्सया ब्रू
हिमेज्ञस्यमित्रत्वादजयानष्टचक्षुषः ३०

गममौपनिषदं २८ यानिसूरिभिःप्रोक्तानितस्यज्ञानस्यसाधनानितानिचब्रूहि गुरुंविनैवतन्नभवति इ ३२
त्यादस्वतइति २९ मेप्रश्नान्मेमित्रत्वात् स्निग्धत्वादिति अन्वयभेदान्नमेपदस्यपौनरुक्त्यं ३०

32A तत्वोपदेशेन जीवाभयप्रधानस्य ४१ पुराणे कल्पते प्रकाशत इति पुराणकल्पो वभुत्सितोर्थः अष्टमः पु
राणकल्पोयं मुनिप्रधानः सः ४२ इति तृतीये सप्तमोध्यायः ७ अष्टमे सप्तभङ्गलानाभेस्तजलशायि
नः तमजानञ्जले विभ्रत्तपसा तोषयद्विभुं १ श्रोतारमभिनंदति सतां सेवितयोगपः वत अहोपद्य

सर्वे वेदास्त्वयत्तास्तपो दानानि चानघ जीवाभयप्रदानस्य न कुर्वीरन्कलामपि ४१ मुकुउं स
इत्यमाह एष पुराणकल्पः उरु प्रधानेन मुनिप्रधानः प्रवृत्त इह यो भगवत्कथायां संचोदितस्त्वं प्रह्
सन्निवाह ४२ इति तृतीये सप्तमः ७ मैत्रेय उ॰ सत्सेवनीयो वत पूरुवंशो यल्लोकपालो भग
वत्प्रधानः बभूविथेहाजितकीर्तिमालां पदे पदे नूतनयस्यभीक्ष्णं १ सोहं नृणां क्षुल्लसुखाय
दुःखं महद्गतानां विरमाय तस्य प्रवर्तये भागवतं पुराणं यदाह साक्षाद्भगवानृषिभ्यः २

स्मात् इहास्मिन्वंशे बभूविथ जातोसि कथंभूतः भगवानेव प्रधानं श्रुतो यस्य सः अत्र हेतुः प्रतिक्षणं नूतन
यसि नवीनां करोषि १ अल्पसुखाय महद्दुःखं प्राप्तानां तस्य दुःखस्य विरमाय प्रवर्तये प्रारंभे २

श्री॰
भा॰टी॰
३३
33

कोसौभगवान् केभ्यश्चऋषिभ्यश्चाह कथंचतत्पाश्राममित्यपेक्षायामाह आसीनमितिसप्तभिः उर्व्यांपा
तालतले अकुंठसत्वंअप्रतिहतज्ञानं अतःसंकर्षणात्परस्यश्रीवासुदेवस्य ३ तमेवविशिनष्टि स्वमेवधि
ष्ण्यंस्वीयमाश्रयंवासुदेवसंज्ञंपरमानंदरूपंध्यानपश्येनभूय वहुमानयंतंसर्वोत्कर्षेणाभजयंतं प्रत्यगृ
तमंतर्मुखीकृतं नेत्राब्जमुकुलंकिंचिदुन्मीलयंतंकृपावलोकेनसनत्कुमारादीनामभ्युदयार्थं मुनीनां
विशेषणंसार्धेन स्वर्धुन्याउदकैर्नार्द्रैरितिश्रीभागवतश्रवणार्थंसत्यलोकात्पातालेप्रत्यवतरंतोनिरंतरंगं

आसीनमुर्व्यांभगवंतमाद्यंसंकर्षणंदेवमकुंठसत्वं विवित्सवस्तत्वमतःपरस्यकुमारमुख्यामुनयो
न्वपृच्छन् ३ स्वमेवधिष्ण्यंवहुमानयंतंयंवासुदेवाभिधमामनंति प्रत्यग्धृताक्षांबुजकोशमीष
दुन्मीलयंतंविबुधोदयाय स्वर्धुन्युदार्द्रैःस्वजटाकलापैरुपस्पृशंतश्चरणोपधानं पद्मंयदर्चंत्यहिरा
जकन्याःसप्रेमनानावलिभिर्वरार्थाः मुहुर्गृणंतोवचसानुरागस्खलत्पदेनास्यकृतानितज्ज्ञाः कि
रीटसाहस्रमणिप्रवेकप्रद्योति तोद्दामफणासहस्रं ६

गामध्यतएवावतीर्णाइतिभावः चरणावुपधीयेतेयस्मिन्नेतदुपस्प
शंतोनमंतः कथंभूतंतदाह यत्पद्मंप्रेमसहितंयथाभवत्येवंनानोपहारैःस्रजयंति वरार्थाःपतिकामाः ५
कृतानिकर्माणिगृणंतः केनानानुरागेणस्खलंतिपदानियस्मिन् तेनचवचसातानिजानंतीतितज्ज्ञाः सहस्र
मेवसाहस्रंकिरीटानांसाहस्रेयेमणिप्रवेकाः रत्नोत्तमाः तेप्रद्योतितं उद्दामफणानांसहस्रंयस्यतं अशेष

त्रिजिह्वेणाब्धयः ८

३३

33A

तेन संकर्षणेन सनत्कुमाराय प्रोक्तं ७ पारमहंस्ये धर्मे मुख्यः विवक्षमाणः इत्यात्मनेपदं ब्रुवादेवचेरु भ
यपदित्वात् अन्विताय अनुगताय ८ पुलस्त्येनोक्तः इत्यत्रैवमाख्यायिका पितरं राक्षसभक्षितं श्रुत्वा परा
शरो राक्षससत्रे प्रवृत्तो वसिष्ठवचनान्निवृत्तः ततः पुलस्त्येन स्वसंततिरक्षणात्तुष्टेन वरो दत्तः पुराणप्रव

प्रोक्तं किलैतद्भगवत्तमेन निवृत्तिधर्माभिरताय तेन सनत्कुमाराय स चाह पृष्टः सांख्यायनायांग
धृतव्रताय ७ सांख्यायनः पारमहंस्यमुख्यो विवक्षमाणो भगवद्विभूतीः जगाद सोऽस्मद्गुरवेऽन्वि
ताय पराशरायाथ बृहस्पतेश्च ८ प्रोवाच मह्यं स दयालुरुक्तो मुनिः पुलस्त्येन पुराणमाद्यं सो
ऽहं तवैतत्कथयामि वत्स श्रद्धालवे नित्यमनुव्रताय ९ उदाप्लुतं विश्वमिदं तदासीद्यन्निद्रयामी
लितदृङ्न्यमीलयत् अहींद्रतल्पेऽधिशयान एकः कृतक्षणः स्वात्मरतावनीहः १०

को भविष्यसीति ९ तदेवं संकर्षणात्संप्रदायप्रवृत्तिं प्रदर्श्य विभूतिकथनाय पद्मोद्भवं वक्तुमाह उदाप्लुतं ए
कार्णवोदके निमग्नं यत् यदा अमीलितदृक् अतिरोहितविज्ञानशक्तिरेव श्रीनारायणो नेत्रे निमीलितवा
नित्यर्थः मायाविनोदं परित्यज्य स्वात्मरतौ स्वरूपानंद एव कृतोत्सवः अत एव निरीहः निष्क्रियः सन् १०

कालशक्तेरुदीरणं पुनः सृष्ट्यवसरेप्रबोधनार्थं स्वेपदेअधिष्ठाने वह्निर्हुतभावेदरुशांतः यथानल
इति ११ स्वयाविच्छिन्नयासहवर्त्तमानयवयोगनिद्रयास्वपन् एवमेवप्रबोधनार्थंनियुक्तयास्वकाल
शक्त्या आसादितेप्रापिते कर्मतंत्रेक्रियाकलापोयस्यसः अपीतान् लीनान्ददर्श १२ लोकस्यसूक्ष्मार्थं

संतोः शरीरेर्पितभूतसूक्ष्मः कालात्मिकांशक्तिमुदीरयाणः उवासतस्मिन्सलिलेपदेस्वेयथा
नलोदारुणिरुद्धवीर्यः ११ चतुर्युगानांचसहस्रमप्सुस्वपन्स्वयोदीरितयाचशक्त्या काला
ख्ययासादितकर्मतंत्रोलोकानपीतान्ददृशेस्वदेहे १२ तस्यार्थसूक्ष्माभिनिविष्टदृष्टेरंतर्ग
तोर्थोरजसातनीयान् गुणेनकालानुगतेनविद्धः सूष्यंस्तदाभिद्यतनाभिदेशात् १३ सपद्मको
शः सहसोदतिष्ठत्कालेनकर्मप्रतिबोधितेन स्वारोचिषातत्सलिलंविशालंविद्योतयन्नर्कइ वात्मयोनिः १४

अर्थसूक्ष्मे अभिनिविष्टादृष्टिर्यस्य कालानुसारिणा रजोगुणेनविद्धः संक्षोभितः सन्नतनीयानतिसू
क्ष्मोर्थः सूक्ष्मस्वरूपोपि सन् उद्भविष्यन् नाभिदेशाडुद्गतइत्यर्थः १३ सतनीयानर्थः पद्मकोशः सन् उ ३४
दतिष्ठत् कर्माणिजीवादृष्टानिप्रतिबोधयति यःकालस्तेनआत्माश्रीविष्णुर्योनिर्यस्य १४

34A तल्लोकात्मकं पद्मं सर्वान्नारायणानुजीवोपभोग्यानर्थानवभासयतीति तथा तत् यस्माज्जातं स एव विभुः उक्ति
संबोधने प्रावीविशत् प्रकर्षेणात्मशक्तिरेवांतर्यामितयाविवेश तस्मिन्विभुनाधिष्ठिते पद्मे विधाता ब्रह्मा
भूत् कथंभूतः स्वयमेव वेदमयो न त्वध्ययनेन प्राप्तवेदः कोसावत्राह पितृत्वेन यं स्वयंभुवं वदंति स प्राक्कल्पा
ते नारायणेन सह निद्रयैकीभूत आसीत् तस्मिंश्च प्रबुद्धे तत एव पाद्मे कल्पे पद्मद्वारेणाभिव्यक्तिं प्राप्त इत्यर्थः ५

तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत्सर्वगुणावभासं तस्मिन्स्वयं वेदमयो विधाता स्वयंभुवं यं स्म
वदंति सोऽभूत् १५ तस्यां स चांभोरुहकर्णिकायामवस्थितो लोकमपश्यमानः परिक्रमन्व्योम्नि वि
वृत्तनेत्रः चत्वारि लेभेनुदिशं मुखानि १६ तस्माद्युगांतश्वसनावघूर्णजलोर्मिचक्रात्सलिलाद्विरू ढं

स च तस्मिन्कल्पे चतुर्मुखोऽभूदित्याह तस्या \\ ढं उपाश्रितः कंजमु लोकतत्त्वं नात्मानमद्धाविददादि
मिति परिक्रामन् तत्रस्थ एव ग्रीवां चालयन् लोकनिरीक्षणार्थं विवृत्ते विचलिते नेत्रे यस्य १६ तस्य च श्री
नारायणोपासनयैवाविर्भूतज्ञानक्रियाशक्तेर्लोककर्तृत्वेन स्वतः इति वक्तुं प्रथमं तस्य विमोहमाह तस्मा
त्सलिलात् विरूढमुद्भूतं कंजमाश्रितोपि साकल्येन तत्कंजं लोकतत्त्वं चात्मानं च साक्षान्न ज्ञातवान् उ
विस्मये कथंभूतात् युगांतश्वसनः प्रलयवायुः तेनावघूर्णितं तत्र तत्र प्रकंपितं यज्जलं तस्मात्सर्वमूर्मि

स्कं.३टीक २

श्री॰ अविद्वत्त्वस्य वितर्कमाह योसावहमब्जपृष्ठे एषकः अनन्यत् एकमेवैतदब्जं कुतोवाजातं येनैतदा
धिष्ठितं तेनाधस्तात् सतावर्तमानेन नुनिश्चितं भाव्यं सइत्थमुद्वीक्ष्य तन्नरेणान्वयः तथाचश्रुतिः सो
भा॰ टी॰ पश्यत्पुष्करपर्णे तिष्ठन्सोमन्यतअस्तिवैतद्यस्मिन्निदमधितिष्ठतीति १८ तस्यचवहिर्दृष्टिप्रवृत्त्यासमर्थतापि
३५ कालेनतद्भ्रमिमाह सइतिद्वाभ्यां तस्याब्जस्ययन्नालं तस्यनाडीभिरंतश्छिद्रैः तस्यखरनालस्यपद्मस्य

35

कएषयोसावहमब्जपृष्ठएतत्कुतोवाब्जमनन्यदप्सु अस्तिह्यधस्तादिहकिंचनैतदधिष्ठितंय
म त्रसतानुभाव्यं १८ सइत्थमुद्वीक्ष्यतदब्जनालनाडीभिरंतर्जलमाविवेश नार्वाग्गतः तत्खरनाल
नालनाभिंविचिन्वंस्तदविंदताजः १९ तमस्यपारेविदुरात्मसर्गंविचिन्वतोभूत्सुमहांस्त्रिने
मिः योदेहभाजांभयमीरयाणः परिक्षिणोत्यायुरजस्यहेतिः २० ततोनिवृत्तोप्रतिलब्धकामः स्व
धिष्ण्यमासाद्यपुनः सदेवः शनैर्जितश्वास

यन्नालं तस्यनाभिमधिष्ठानंविचिन्वन्नर्वाग्गतोपितन्नदा
नाविंदत् १९ आत्मसर्गस्यकारणं त्रिनेमिः कालः अजस्यविष्णोर्हेतिः सुदर्शनरूपंशस्त्रं देहभाजांनराणांभया
मुत्पादयन्त्रिंति संवत्सरशतमतिमितंकाभवति २० अतर्दृष्टिवतयानुभगवंतंदृष्टवानित्याहद्वाभ्यां ततइति ततः
अन्वेषणान्निवृत्तः नप्रतिलब्धः कामोमनोरथोयेन स्वधिष्ण्यंपद्मं जितेनश्वासेननिवृत्तंसंयतंचित्तंयस्मात्तपवाह

निवृत्तचित्तोन्यषीददारूढसमाधियोगः २१

ढः आश्रितः समाधियोगोयेन तथाभूतः सन्न्यषीददुपविवेश २१

35A

पुरुषापुषासंवत्सरशतेनचकालेनाभिप्रवृत्तः सनिष्पन्नः योगः तेनविरूढउत्पन्नोबोधोयस्य यस्सर्वंवि
विन्वन्नपिनापश्यत तत्स्वयमेवांतर्हृदयेवभातमपश्यत २२ यदपश्यत्तद्वर्णयति मृणालेतिनवभिः नव
स्यप्यपश्यदित्यस्यैवानुषंगः मृणालवद्गौरश्चासावायतश्चयः शेषस्यभोगोदेहः सएवपर्यंकः तस्मिन्
कुत्रस्थितेपर्यंके फणातपत्रैरायुताः सर्वतोयुक्तायेमूर्धानः तेषांरत्नानिकिरीटस्थानि तेषांद्युभिः प्रभाभिः
हतध्वांतेयुगांततोये २३ कथंभूतंपुरुषं हरितोपलाद्रेर्मरकतशिलामयपर्वतस्यप्रेक्षांशोभां त्विपंतंस्वलाव
कालेनसोजः पुरुषापुषाभिप्रवृत्तयोगेनविरूढबोधः स्वयंतदंतर्हृदयेवभातमपश्यतापश्य
तयन्नपूर्वम २२ मृणालगौरायतशेषभोगपर्यंकएकंपुरुषंशयानं फणातपत्रायुतमूर्धरत्न
द्युभिर्हतध्वांतयुगांततोये २३ प्रेक्षांक्षिपन्तंहरितोपलाद्रेः संध्याभ्रनीवेरुरुरुक्ममूर्ध्नः रत्नो
दधारौषधिसौमनस्यवनस्रजोवेणुभुजांघ्रिपांघ्रेः २४
एवतिशयेनतिरस्कुर्वंतं संध्याभ्रंनीवीपरिधानंयस्य तस्यशोभांपीतांबरेणाक्षिपंतं उरुरुक्ममूर्ध्नः अनेकसु
वर्णशिरस्यतस्यस्वकिरीटैः रत्नानिचउदधाराश्चओषधयश्च सौमनस्यानिचसमूहाः सुमनसएववातेषांवन
स्रजः वनमालायस्य वेणवश्चभुजायस्य अंघ्रिपापवांघ्रयोयस्य सचासौसचतस्य अयमर्थः यदितस्मिन्माला
श्चस्थितारत्नादयोभवंति वेणवश्चभुजाश्चवृक्षाश्चपादाश्च तर्हितस्यशोभांक्षिपंतीयरत्नशृंगात्तलसीपुष्पदा

मभिः मुक्तैरविभ्रक्तिविपंतमिथ

श्री· भा·त· ३९
36

किंचायामतो दैर्घ्येण विस्तरश्च स्वमानदेहेन मीयतेनेनेतिमानमुपमा शोभनश्चासावामानो निरूपमो दे
हः तेन यद्वा सुष्ठु स्वमानः अपरिच्छिन्नः तेन यद्वा ताभ्यां स्वानुरूपप्रमाणेन अतएव लोकत्रयं संगृह्यतेय
स्मिंस्तथाविचित्राणि नानाविधानि दिव्यान्यम्बराणि चाभरणान्यंशुकानि च तेषां कृता श्रीः शोभा येन तेन
देहेन विशिष्टं एवं स्वतएवातिरम्यत्वेपि अपाश्रितवेशः स्वीकृतालंकारो देहो यस्य तमपश्यत् यद्वा केनप्र
तीतिपत्तमित्यपेक्षायामेवंभूतेन देहेनेति संबंधः २५ स्वाभिलषितफलाय विविक्तैर्मार्गैः अभ्यर्चिता पुंसा का

आयामतो विस्तरतः स्वमानदेहेन लोकत्रयसंग्रहेण विचित्रदिव्याभरणांशुकानां कृतश्रियापाश्रित
वेशं देहं २५ पुंसां स्वकामाय विविक्तमार्गैरभ्यर्चितौ कामदुघांघ्रिपद्मे प्रदर्शयंतं कृपया नखेंदुमयूखभि
न्नांगुलिचारुपत्रे २६ मुखेन लोकार्तिहरस्मितेन परिस्फुरत्कुंडलमंडितेन शोणायितेनाधरबिंबभासा
प्रत्यर्हयंतं सुनसेन सुभ्र्वा २७ कदंबकिंजल्कपिशंगवाससा स्वलंकृतं मेखलया नितंबे हारेण चानंत

मतुद्यमेंघ्रिपद्मे प्रदर्शयंतं किंचिदुन्नमय्य समर्पयंतं नखा एवेन्दवस्तेषां मयूखास्तैर्भिन्ना अंगुलय एव
चारूणि पत्राणि यस्य तत् २६ लोकार्तिहरं स्मितं यस्मिंस्तेन परिस्फुरद्भ्यां कुंडलाभ्यां मंडितेनाधरबिंबदी
प्त्या शोणावदाचरितेन शोभननासापुटकेन सुभ्र्वा शोभनया भ्रुवा च प्रत्यर्हयंतं पूजकान्प्रतिपूजयंतं संमा
नयंतं २७ कदंबकिंजल्कवत्पिशंगे यद्वाससा तेन मेखलया च नितंबे स्वलंकृतं हे वत्स श्रीवत्सपुंकेयद्व

पनेन वत्स श्रीवत्सवक्षः स्थलवल्लभेन २८
क्षः स्थलं तस्य वल्लभेन वक्षसानर्घ्येण हारेण स्वलंकृतमित्यर्थः २८

३९

36A महाचन्दनवृक्षरूपेणनिरूपयितुंतंविशिनष्टि परार्ध्यानिश्रेष्ठानिकेयूराण्यंगदानि मणिप्रवेकामणिश्रे
ष्ठाः तैः पर्यस्ताव्याप्तादोर्दंडाएवसहस्रमनंताःशाखायस्य चंदनवृक्षोपिकेयूरादितुल्यैः फलपुष्पादिभिर्व्या
प्तशाखोभवति अव्यक्तंप्रधानंमूलमधोभागोयस्य यद्वा अव्यक्तं ब्रह्ममूलंयस्यब्रह्माभिव्यक्तिरूपत्वात् वृक्ष
स्यापिमूलेनव्यक्तं भुवनात्मकमंघ्रिपेंद्रंअहींद्रस्यानंतस्यभोगैःफणादिभिः देहावयवैःवापरिवीताःसंवेष्टि
ताःस्कंधाःवल्शाःस्कंधायस्य वनस्पतेशतवल्शंविरोहेतिश्रुतेः सोपिसर्पैर्वेष्टितोभवति २९ एवंतावन्निरूपंत

परार्ध्यकेयूरमणिप्रवेकपर्यस्तदोर्दंडसहस्रशाखं अव्यक्तमूलंभुवनांघ्रिपें
द्रमहींद्रभोगैरधिवीतवल्शम् २९ चराचरौकोभगवान्महीध्रमहींद्रबंधुःसलि
लोपगूढम् किरीटसाहस्रहिरण्यशृंगमाविर्भवत्कौस्तुभरत्नगर्भम् ३०

मित्यत्रैवपर्वतरूपेणनिरूपितमपिविशेषणांतरैः पुनर्निरूपयति भगवानिति भगवानेवमहीध्रस्तं चराचरा
णामोकःस्थानंसोपितथा अहींद्रस्यबंधुःसोपिअहींद्राणांबंधुः सलिलेनोपगूढमावृतपर्वतोपिमैनाकादिस्तथा
किरीटसाहस्रमेवहिरण्यशृंगाणियस्य सोपिमेर्वादिस्तथापर्वतस्यगर्भेकश्चिद्रत्नमाविर्भवति तथाप्याविर्भ
वत्स्पष्टंदृश्यमानंकौस्तुभरत्नंगर्भेमध्येयस्यतम् ३०

श्री॰ किंच वनमालयानिवीतंकंठलं॰ विन्यावयामं आम्नायावेदाएवमधुव्रतास्तैः श्रीर्यस्यास्तया हरिमितिपर्व
भा॰टी॰ तादिरूपं पश्यन्हरिरसावितिज्ञातवानित्यर्थः सूर्यादिभिरगमंअगम्यस्वव्यापारैराकलयितुमशक्यमि
३० त्यर्थः किंच त्रिष्वपिलोकेषुधामस्फूर्तिर्येषांतैरत्तणार्थंपरिक्रामद्भिः परितोधावद्भिःप्राधनिकैः प्रधनसं

निवीतमाम्नायमधुव्रतश्रियास्वकीर्तिमय्यावनमालयाहरिम् सूर्येंदुवा
य्वग्न्यगमंत्रिधामभिः परिक्रमत्प्राधनिकैर्दुरासदं ३१ तर्ह्येवतन्नाभिसरःसरोज
मात्मानमंभःश्वसनंवियच्च ददर्शदेवोजगतोविधातानातःपरंलोकविसर्गदृ
ष्टिः ३२ सकर्मबीजंरजसोपरक्तःप्रजासिसृक्षन्नियदेवदृष्ट्वा अस्तौद्विसर्गाभिमु
खः तमीड्यमव्यक्तवर्त्मन्यभिवेशितात्मा ३३ इतितृतीयस्कंधेऽष्टमोध्यायः ८

ग्रामः तत्प्रयोजनैः सुदर्शनादिभिःहेतुःभूतैःदुरासदंदुष्प्रापं ३१ यदैवहरिमपश्यत् तर्ह्येवततदेवलोकविस
र्गदृष्टिःसन् तस्यनाभिसरसिसरोजंश्वसनंप्रलयवायुंवियदाकाशंचददर्श ३२ कर्मबीजंलोकसृष्टेः कारणं
उपरक्तः रजोगुणोपयुक्तः अतःप्रजास्रष्टुमिच्छन् यद्देवनाभिसरोजादिपंकजमेव विसर्गाभिमुखः दत्तचित्तः ३०
अव्यक्तवर्त्मनिभगवतिनिवेशितचित्तः ३३ इतिश्रीभावार्थेतृतीयस्कंधेऽष्टमोध्यायः ८

37

37A

नवमे तपसा तुष्टं दृष्ट्वा नारायणं त्वजः। अस्तौदेकार्णवे सोदं लोकसर्गं चिकीर्षया॥ भगवज्ज्ञानेनात्मनः कृता
र्थतामाविष्कुर्वन्नेवं स्तौति ब्रह्मा शोचन्नाह। ज्ञातोसीति सुचिराद् बहुकालोपासनेन अद्य मे मया ज्ञातोसि ननु अहो दे
हभाजामेतदवद्यं दोषः किं तत् यद्भगवतः तव गतिः तत्वं न ज्ञायते इति यत् स त्वमेव ज्ञातव्य इत्यर्थः सत्यत्वात्
नान्यदसत्वादित्याह तत्त्वत्तोन्यन्नास्ति यदप्यस्तीति प्रतिभाति तदपि शुद्धं सत्वं न भवति कथमसतः प्रती

श्रीब्रह्मोवाच ज्ञातोसि मेद्य सुचिरान्ननु देहभाजां न ज्ञायते भगवतो गतिरित्यवद्यं नान्यत्त्व
दस्ति भगवन्नपि तन्न शुद्धं मायागुणव्यतिकराद्यदुरुर्विभासि १ रूपं यदेतदवबोधरसोदये
न शश्वन्निवृत्ततमसः सदनुग्रहाय आदौ गृहीतमवतारशतैकबीजं यन्नाभिपद्मभवनादहमा

आदौ विरासम २

तिस्तत्राह यद्यतः मायागुणव्यतिकरात् त्वमेव उरुः बहुरूपो विभासि १ ननु त्वमपि सम्यङ् न जानासि यत्त्वया दृष्टं रू
पमेतदपि गुणात्मकमेव निर्गुणं ब्रह्मैव तु सत्यं तत्राह रूपमिति द्वाभ्यां अवबोधरसोदयेन चिद्घनत्वाविर्भावेन
शश्वत्सदा निवृत्ततमो यस्मात् तस्य तवैतद्रूपं यत्तदेव सत्यं तेषु तेष्वेण सतामुपासकानामनुग्रहाय गृहीतमाविष्कृतम
वतारशतस्य शुद्धसत्वात्मकस्य यदेकं बीजं मूलं तत्प्रदर्शनार्थं गुणावतारबीजत्वं दर्शयति यन्नाभीति २

श्री॰ हेपरमअविद्धवर्चः अनाहृतप्रकाश अतःविकल्पंनिर्भेदं अतएवानंदमात्रं एवंभूतंयद्भवतःस्वरूपं तदतो
भा॰द॰ रूपान्तरंभिन्नेनपश्यामिकिंतर्हिइदमेवतत् अतःकारणात्तेतवअदःइदंरूपमुपाश्रितोस्मि योग्यत्वादपीत्याह
एकमुपास्येषुमुख्यंयतोविश्वसृजंअतएवाविश्वंविश्वस्मादन्यत् किंच भूतेंद्रियात्मकं भूतानामिंद्रियाणां
३८ चात्मानंकारणमित्यर्थः ३ नन्वेवमपिसोपाधिकमेतदर्वाचीनमेवेत्याशंक्याह तद्वैतदेवेदंहेभुवनमंगल
38

नातःपरंपरमयद्भवतःस्वरूपमानंदमात्रमविकल्पमविद्धवर्चः पश्यामिविश्वसृजमेकमविश्वमा
त्मन्भूतेंद्रियात्मकमदस्तउपाश्रितोस्मि ३ तद्वाइदंभुवनमंगलमंगलायध्यानेस्मनोदर्शितंतउपा
सकानां तस्मैनमोभगवतेनुविधेमतुभ्यंयोनादृतोनरकभाग्भिरसत्प्रसंगैः ४ येतुत्वदीयचरणां
बुजकोशगंधंजिघ्रंतिकर्णविवरैःश्रुतिवातनीतं भक्त्यागृहीतचरणःपरयाचतेषांनापैषिनाथहृ

यतःतेत्वयानोऽस्माकमुपासकानांमंगलायध्यानेदर्शितं नत्वर्वाक्वर्त्माभिनिवेशितचित्तानामस्माकंतव
यासोपाधिकदर्शनंयुक्तमितिभावः अतस्तुभ्यंनमोनुविधेमअनुवृत्त्याकरवाम तर्हिकिमितिकेचित्त्वांना
द्रियंतेतत्राह योनादृतइति असत्प्रसंगैर्निरीश्वरैर्नरकनिष्ठैः ४ आदरेणतुत्वांभजंतःकृतार्थाइत्याह येत्वि
ति श्रुतिर्वेदःसएववातः तेननीतंप्रापितं नापैषिनापयासि येतत्कथाश्रवणमत्यादरेण कुर्वंति तेषांनि ३८

38A

ततःकिमतआह तावदिति द्रविणादौविद्यमानेभयं गतेशोकःपुनश्चस्पृहा ततःपरिभवःतथापिविपुलो
लोभःतस्मात्पुनःकथंवित्तमेतन्ममैतस्यसदाग्रहः आर्तिमूलंभयशोकादेःकारणं नप्रवृणीतनाश्रयेत त्वत्पादाश्र
यणमात्रेणभयादिनिवृत्तिः किंपुनःत्वत्प्रकाशेसतीतिभावः ९ येनिष्कामाअपिसंतःत्वांनाद्रियंते तेनरकभाज
इत्याह येत्वत्कथाश्रवणादिविमुखाः संतःकाम्यकर्मपराः तेतिमंदाइत्याह दैवेनतेहृतधियःनष्टमतयः प्रसंगा

तावद्भयंद्रविणगेहसुहृन्निमित्तंशोकःस्पृहापरिभवोविपुलश्चलोभः तावन्ममेत्यसदवग्रहआर्तिमू
लंयावन्नतेंघ्रिमभयंप्रवृणीतलोकः ९ दैवेनतेहृतधियोभवतःप्रसंगात्सर्वाशुभोपशमनाद्विमुखें
द्रियाये कुर्वंतिकामसुखलेशलवायदीनालोभाभिभूतमनसोऽकुशलानिशश्वत् । क्षुत्तृट्त्रिधातुभि
रिमामुहुरर्द्यमानाः शीतोष्णवातवर्षैरितरेतराच्च कामाग्निनाच्युतरुषाचसुदुर्भरेणसंपश्यतोमनउरुक्र
मसीदतेमे ८

त् श्रवणकीर्तनादिरूपात् सर्वदुःखनिवर्तकात् विमुखानींद्रियाणियेषां अकुशलानिअशुभकर्माणिसत् ।
अकुशलत्वमेवदर्शयति क्षुत्तृट्चत्रिधातवश्चवातपित्तश्लेष्माणःतैःइमाःप्रजाः सुदुर्भरेणदुःसहेनकामाग्नि
नाःअच्युतयारुषाअविच्छिन्नकोपेनचपीड्यमानाःसंपश्यतोमेमनःसीदति ८ ॥

श्री·
भा·टी·
३९
39

नन्वेवंभूतायाः संसृतेरपरमार्थत्वात्किमर्थंविषादः क्रियतेतत्राह यावदिति आत्मनइदंपृथक्त्वंदेहादिभावं भ
गवतस्तवईंद्रियार्थरूपयामाययातयावलमायिकंयस्मात्तत् नप्रतिसंक्रमेतनोपरमेत् दुःखसमूहंप्रापयती
तिक्रियाणामर्थःफलंयस्यां ९ भवत्वेवमविवेकिनांविवेकिनस्तुमुक्ताएवेतिकिंतेषांभक्त्याकृतमतआह
अह्निआपृतानिव्यापृतानिचतान्यार्तानिक्लिष्टानि करणानींद्रियाणियेषां रात्रौविषयसुखलवोपिनास्ति

यावत्पृथक्त्वमिदमात्मनईंद्रियार्थमायाबलंभगवतोजनईशपश्येत् तावन्नसंसृतिरसौप्रतिसंक्रमेत
व्यर्थापिदुःखनिवहंवहतीक्रियार्था ९ अह्न्यापृतार्तकरणानिशिनिःशयानानामनोरथधियाक्षण ना
भग्ननिद्राः दैवाहतार्थरचनाऋषयोपिदेवयुष्मत्प्रसंगविमुखाइहसंसरंति ९ त्वंभावयोगपरि भक्ति
भावितहृत्सरोजआस्सेश्रुतेक्षितपथोननुनाथपुंसां यद्यद्धियातउरुगायविभावयंतितत्तद्वपुःप्र
॥ णयसेसदनुग्रहाय ॥

यतोनिःशयानाः स्वप्नदर्शनेनचक्षणेक्षणेभग्ननिद्राः दैवेनाहताः सर्वतः प्रतिहन्
ना ताअर्थरचउद्यमायेषां ९० तदेवमभक्तानांसंसारानिवृत्तिमुक्त्वाभक्तानांतन्निवृत्तिमाह त्वमिति भक्ति
योगेनशोधितेहृत्सरोजे आस्सेतिष्ठसि श्रुतेनश्रवणेनेक्षित पंथायस्य किंच श्रवणंविनापित्वद्भक्तामन ३९
सायद्यत्तववपुः रूपंस्वेच्छयाध्यायंति तत्तत्त्वंप्रणयसेप्रकटयसि सतांभक्तानामनुग्रहाय ॥

39A भक्तानां च निष्कामानां त्वमसि सुलभो नेतरेषां इत्याह नेति उपचितैरर्जितैरुपचारैः पुष्पोपहारादिभिः यत् य
याऽसतामभक्तानामलभ्यया दयया प्रियत्वे हेतुः एक इत्यादि १२ सकामानां भवान्नातिप्रसीदति इति अतः का
मप्राप्तिः क्रियाणामुत्तमं फलं न भवति किं तु त्वत्प्रीणनमेव कामसंयोगस्तु अवांतरफलेन रोचनार्थमि
त्याह पुंसामिति भगवतस्तवाराधनमेव पुंसां सत्क्रियार्थस्य श्रेष्ठक्रियाफले श्रेष्ठत्वे हेतुः यत्र त्वय्यर्पितो ध

नातिप्रसीदसि तथोप(चितोप)चारैराराधितः सुरगणैः हृदि बद्धकामैः यत्सर्वभूतदययासदलभ्ययैको ना
नाजनेष्ववहितः सुहृदंतरात्मा १२ पुंसामतो विविधकर्मभिरध्वराद्यैः दानेन चोग्रतपसा व्रतचर्यया
च आराधनं भगवतस्तव सत्क्रियार्थो धर्मोऽर्पितः कर्हिचिद्म्रियते न यत्र १३ शश्वत्स्वरूपमहसैव
निपीतभेदमोहाय बोधधिषणाय नमः परस्मै विश्वोद्भवस्थितिलयेषु निमित्तलीलारासाय ते न
मइदं चकृमेश्वराय १४

र्मो न कदाचिद्म्रियते न नश्यति कामार्थस्तु धर्मः कामं दत्वा नश्यतीत्यर्थः १३
अतस्त्वामेव वयं नताः इत्याह शश्वदिति सर्वदा स्वरूपचैतन्येनैव निरस्तभेदभ्रमाय नमः पुनश्च बोधरूपधिषणा
विद्याशक्तिर्यस्य यद्वा धिषणामाश्रयः अत एव परस्मै अत्र हेतुः विश्वोद्भवादिनिमित्तया मायया तस्या लीला
विलासः तया रासः क्रीडा यस्य तेनेत्थं इदं नमः नमनं चकृम कृतवंतो वयं १४ ॥

श्री॰ भा॰ त॰ ४॰ नामग्रहणमात्रतः कैवल्यप्रदत्वेनैस्वर्यंव्यंजन्नमस्करोति यस्येति अवतारादीनांविडंबनमनुकरणम
स्मिन्येषु तत्रावतारविडंबनानि देवकीनंदनेत्यादीनिगुणविडंबनानिसर्वज्ञोभक्तवत्सलइत्यादीनि क
र्मविडंबनानि गोवर्धनोद्धरणःकंसारिरित्यादीनि असुविगमेपि विवशाअपि गृणंति उच्चारयंति केवलंश
मलेपापं अपावृतंनिरस्तावरणं ऋतंब्रह्मप्राप्नुवंति १५ तत्रगुणावतारकर्माणिदर्शयन्प्रणमति योप

यस्यावतारगुणकर्मविडंबनानिनामानियेसुविगमेविवशागृणंति ते
नेकजन्मशमलंसहसैवहित्वासंयांत्यपावृतमृतंतमजंप्रपद्ये १५ योवा
अहंचगिरिशश्चविभुःस्वयंचस्थित्युद्भवप्रलयहेतवआत्ममूलं भित्वा
त्रिपाद्ववृधएकउरुप्ररोहस्तस्मैनमोभगवतेभुवनद्रुमाय १६ ॰

कः त्रिपात् त्रयःब्रह्मादयःपादाःस्कंधायस्य प्रत्येकंचउरवः प्ररोहाः शाखोपशाखामरीच्यादिमन्वादि
रूपायस्यतथाभूतःसन् तस्मैभुवनाकारायनमः किंकृत्वाववृधे आत्मास्वयमेवमूलमधिष्टानंयस्यतत्प्र
धानंभित्वा गुणत्रयरूपेणविभज्यत्रिपात्वमेवाह अहंब्रह्मागिरिशश्चस्वयंविभुर्विष्णुश्चेति स्थित्युद्भवप्र
लयहेतवोयेवयम् एवंत्रिपाद्भूत्वायोववृधेस्थरस्तमर्थः १६ ४॰

40A

एवं गुणावतारकर्मविडंबनमुक्त्वा तस्यैव कालाख्यं रूपं तत्कर्म च दर्शयन्प्रणमति लोक इति द्वाभ्यां वि
कर्मनिरतः विरुद्धकर्मनिष्ठः कुशले हिते स्वे आत्मीये त्वदुदिते त्वयैव साक्षादुक्ते भवदर्चनरूपे कर्मणि
उक्तं हि गीतासु यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणमिति त
स्मिन्प्रमत्तः अदत्तचित्तो यावद्दत्ते तेतावदस्य लोकस्य अनिमिषाय कालाय १७ आस्तां तावल्लोकस्य कथा

लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे यस्तावदस्य बलवानिह जी
विताशां सद्यः छिनत्त्यनिमिषाय नमोस्तु तस्मै १७ यस्माद्बिभेम्यहमपि द्विपरार्धधिष्ण्यमध्यासि
तः सकललोकनमस्कृतं यत् तेपे तपो बहुसवोवरुरुत्समानः तस्मै नमो भगवतेधिमखाय तुभ्यं
१८ तिर्यङ्मनुष्यविबुधादिषु जीवयोनिष्वात्मेच्छयात्मकृतसेतुपरीप्सया यः रेमे निरस्तरतिर
प्यवरुद्धदेहः तस्मै नमो भगवते पुरुषोत्तमाय

यस्मात्कालाख्यात् त्वत्तः यद्विपरार्धावस्थापि धिष्ण्ये
स्थाने तदाप्यहोपि विभेमि भीतश्च संस्त्वामेवावरुरुत्समानः प्राप्तुमिच्छंस्तपस्तप्तवान् कथंभूतः बहुसवः
बहवः सवा यागाः संवत्सरा वा यस्य बहून्यागान्कृत्वापि बहून्संवत्सरान्वा तपस्तप्तवानित्यर्थः अधिमखाय
मखाधिष्ठाने १८ इदानीं तत्तत्कालभाविलीलावतारकर्माणि दर्शयन्नाह तिर्यगादिषु जीवयोनिषु स्वेच्छया

श्री॰ भा॰ त॰ ५१ स्वीकृतमूर्त्तिः सन् स्वकृतधर्ममर्यादापालनेच्छया रेमे वस्तुतः स्वानंदानुभवेनैव निरस्तविषयसुखोपि
यः अतएव पुरुषोत्तमः तत्तदुपाधिधर्मासंस्पर्शात् यदुक्तं गीतासु यस्मात्क्षरमतीतोहमक्षरादपि चो
त्तमः अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तम इति १९ इदानीं दृश्यमानामेव मूर्त्तिं प्रणमति योविद्ययेति
द्वाभ्यां दशार्धा पंचवृत्तयो यस्याः तया अविद्यया निद्राहेतुभूतया अनभिभूतोपि यो निद्रामुवाह तस्मै
तेन मह्यत्मंत्रेणान्वयः जठरीकृता उदरे प्रविलापिता लोकयात्रा लोकस्थितिर्येन अहिरेव कशिपुः

योविद्ययानुपहतोपि दशार्धवृत्त्या निद्रामुवाह जठरीकृतलोकयात्रः अंत
र्जले हिकशिपुस्पर्शानुकूलां भीमोर्मिमालिनि जनस्य सुखं विवृण्वन् २०

शय्या तस्याः स्पर्शानुकूलो यस्याः तां निद्रां भीमानामूर्मीणां माला विद्यते यस्मिन् अंतर्जले निद्राणस्या
ऽविवेकिनो जनस्य निद्रासुखमीदृगिति विवृण्वन् प्रदर्शयन् उपहसन्नित्यर्थः अतएवांतर्जलादि विशे
षणानि यद्वा पूर्वकल्पे श्रांतस्य जनस्य विश्रामसुखं विवृण्वन् स्फोरयन् तदातपरोपकाराय स्व ५१
यं दुःसहमपि दुःखं सोढव्यमिति द्योतनार्थं विशेषणानि २०

4A

किंच यस्य नाभिपद्ममेव भवनं तस्मात् लोकत्रयमुपकरणं यस्य यद्वा लोकत्रयस्य स्रष्टादिद्वारेणोपकरोतीति
ति तथा तादृशोहं यदनुग्रहेण संउदरेस्थितः भवः संसारः प्रपंचो यस्य योगनिद्रावसाने किंचिद्विकसन्न
लिनवदीक्षणं यस्य २१ एवं स्तुत्वा प्रार्थयते सोयमिति चतुर्भिः यत् येन सत्वेन ज्ञानेन भगेनैश्वर्येण च मृडय
ते सुखयति विश्वं दृशं प्रज्ञां अनुस्पृशतात् योजयतु यथाहं स्रष्टुं क्षमो भविष्यामि यतः प्रणतप्रियोसौ अहं

यन्नाभिपद्मभवनादहमासमीड्य लोकत्रयोपकरणो यदनुग्रहेण तस्मै नमस्त उदरस्थभवाय यो
गनिद्रावसानविकसन्नलिनेक्षणाय २१ सोयं समस्तजगतां सुहृदेक आत्मा सत्वेन यन्मृडयते भग
वान्भगेन तेनैव मे दृशमनुस्पृशताद्यथाहं स्रक्ष्यामि पूर्ववदिदं प्रणतप्रियोसौ २२ एष प्रपन्नवरदो
रमयात्मशक्त्या यद्यत्करिष्यति गृहीतगुणावतारः तस्मिन्स्वविक्रममिदं सृजतोपि चेतो युंजीत
कर्मशमलं च यथा विजह्याम् २३

च प्रणतः न चान्यः प्रार्थनीयोस्ति यतः स एव समस्तजगतां
सुहृत् यतोसावेकोनुस्यूतो आत्मा अंतर्यामी २२ आत्मशक्त्या रमया सह यद्यत्कर्म करिष्यति स्वविक्रमं वि
ष्णोरेव विक्रमः प्रभावो यस्मिन् तदिदं विश्वं तदाज्ञया सृजतोपि मे चेतः स एव युंजीत प्रवर्तयतु कर्मासक्तितत्
कृतं शमलं च वैषम्यादिपापं यथा विजह्यां त्यक्ष्यामि २३

श्री॰ ऽम्भस्यसंतोयस्यनाभिहृदादिहासंविज्ञानेशक्तिर्यस्यमहत्तत्वात्मकस्यचित्तस्यतदभिमानी अस्यरूपमिदंवि
स्वंविस्तारयतोमेनिगमस्यावयवभूतानांगिरांविसर्गउच्चारणंमारीरिषीष्ट हतालंब्रह्मवर्चसमितिन्यायेन
भा॰त॰ मालुप्यतामित्यर्थः २४ विवृद्धप्रेमगर्भस्मितेनविजृंभयन् विश्वस्यविजयाय उद्भवाय चकारादस्मदनुग्रहा
५२
१

नाभीहृदादिहसतोंभसियस्यपुंसोविज्ञानशक्तिरहमासमनंतशक्तेः रूपंविचित्रमिदमस्यविवृण्व
४२ तोमेमारीरिषीष्टनिगमस्यगिरांविसर्गः २४ सोसावदभ्रकरुणोभगवान्विवृद्धप्रेमस्मितेननयना
वुरुहंविजृंभन् उत्थायविश्वविजयायचनोविषादंमाध्व्यागिरापनयतात्पुरुषः पुराणः २५ मैत्रेयउ
स्वसंभवंनिशाम्यैवंतपोविद्यासमाधिभिः यावन्मनोवचःस्तुत्वाविररामसखिन्नवत् २६ अथाभिप्रे
तमन्वीक्ष्यब्रह्मणोमधुसूदनः विषण्णचेतसंतेनकल्पव्यतिकरांभसः २७ लोकसंस्थानविज्ञानआ
त्मनःपरिखिद्यतः तमाहागाधयावाचाकश्मलंशमयन्निव २८

य
यचोस्त्यां २५ स्वस्यसंभवोयस्मात्तं तपः शारीरंविद्याउपासनासमाधिरैकाग्र्यंतैर्निशम्यदृष्ट्वायथाशक्तिस्तुत्वा
श्रांतवद्विरराम २६ २७ आत्मनोलोकसंस्थानविज्ञानेपरिखिद्यतोब्रह्मणोभिप्रेतमालक्ष्यतमाहेतिद्वयोरन्व ५२
यः तेनप्रलयोदकेनविषण्णचेतसंकश्मलंमोहंइवेतिसमस्तमोहशमनंदर्शयति २८

42A

हेवेदगर्भतंद्रींविषादंकृत्वामालस्यंमागाः तेनैवमेहर्षामत्रस्पृशतादित्यादियत्प्रार्थयतेतदर्थेसर्वमेवसं
पादितं २९ तर्हिकथमहंनजानानीत्यतआह भूयइति ३० भक्तियुक्तःसमाहितश्चसन्नात्मनिस्वस्मिंलो
केच मांततंव्याप्यस्थितंद्रष्टासिद्रक्ष्यसिआत्मनोजीवांश्च ३१ सर्वत्रमद्दर्शनेमोहोनिवर्ततइत्याह यदाति

श्रीभगवानुवाच मावेदगर्भगास्तंद्रींसर्गउद्यममावह तन्मयापादितंह्यग्रेयन्मांप्रार्थयतेभ
वान् २९ भूयस्त्वंतपआतिष्ठविद्यांचैवमदाश्रयां ताभ्यामंतर्हृदिब्रह्मंल्लोकान्द्रक्ष्यस्यपावृता
न् ३० ततआत्मनिलोकेचभक्तियुक्तःसमाहितः द्रष्टासिमांततंब्रह्मन्मयिलोकांस्त्वमात्मनः ३१
यदातुसर्वभूतेषुदारुष्वग्निमिवस्थितं प्रतिचक्षीतमांलोकोजह्यात्तर्ह्येवकश्मलं ३२ यदारहि
तमात्मानंभूतेंद्रियगुणाशयैः स्वरूपेणमयोपेतंपश्यन्स्वाराज्यमिच्छति ३३

ति प्रतिचक्षीतपश्येत ३२ तदाचमिथ्यात्वात्तान्निहत्यमोमुच्यतइत्याह यदेति भूतादिभिर्विरहितमात्मानं
जीवं शुद्धंतंपदार्थं स्वरूपेणस्वस्यात्मभूतेनमयातत्पदार्थेन उपेतमेकीभूतंपश्यन्भवति तदास्वाराज्यं
प्राप
मोक्षंप्राप्नोति ३३

श्री॰
भा॰तृ॰
५२
२
42

यतःवर्षीयान्वृद्धतरः अन्यधिकोस्तीत्यर्थः २९ अनुग्रहमेवाह ऋषिमितिचतुर्भिः यद्यतस्तेमनोमयि।
निर्वेदं ३० यद्यस्माद्भूतैरिंद्रियैः गुणैःसत्वादिभिः आत्मनाहंकारेणवायुक्तंमन्यसे ३१ त्वंमयेतवनालेन।
मार्गेणपुष्करस्यकमलस्यमूलमधिष्ठानं सलिलेविचिन्वतोमयिविचिकित्सायांभवितव्यमस्याश्रयेण

नानाकर्मवितानेनप्रजाबह्वीःसिसृक्षतः नात्मावसीदत्यस्मिंस्तेवर्षीयान्मदनुग्रहः २९ ऋषिमाद्यं
नबध्नातिपापीयांस्त्वांरजोगुणः यन्मनोमयिनिर्बद्धंप्रजाःसंसृजतोपिते ज्ञातोहंभवतात्वद्यदुर्वि
ज्ञेयोपिदेहिनां यन्मांत्वंमन्यसेयुक्तंभूतेंद्रियगुणात्मभिः ३१ तुभ्यंमद्विचिकित्सायामात्मामेदर्शि
तोबहिः नालेनसलिलेमूलंपुष्करस्यविचिन्वतः ३२ यच्चकर्थांगमत्स्तोत्रंमत्कथाभ्युदयांकितं यद्वा
तपसितेनिष्ठासएषमदनुग्रहः प्रीतोहमस्तुभद्रंतेलोकानांविजयेच्छया यदस्तौषीर्गुणमयंनिर्गु
णंमानुवर्णयन् ३४ यएतेनपुमान्नित्यंस्तुत्वास्तोत्रेणमांभजेत् तस्याशुसंप्रसीदेयंसर्वकामवरेश्वरः

नबध्यते ततोक्तिर्नास्तीतिसंदेहे सति आत्मास्वरूपंमेमयाबहिरंतर्हृदिदर्शितः ३२ अंगहेब्रह्मन्यत्कर्थ
कृतवानसि मत्कथैवाभ्युदयस्तेनांकितंसएषबंधभावः मयिमनोनिर्बंधःसज्ज्ञानेमद्रूपस्यहृदिदर्शनंमत् २
स्तुतिः तपोनिष्ठाचेतियत् सएषसर्वोपिमदनुग्रहः ३३ गुणमयत्वेनप्रतीयमानमपिनिर्गुणमेवानुवर्ण ५२
यन् ३४ तवप्रीतइतिकिंवक्तव्यमित्याह यइति ३५

42A

नवमन्यीतेरप्यधिकं किंचिदस्तीत्याह एतादिभिः सिद्धं निःश्रेयसं फलं तन्मन्यीतिरेवेतिं त्वविदांमतं ४१ अ
दैतत्तमाह अहमिति आत्मनामहंकारोपाधीनां जीवानामात्मा अतः प्रेयसां अतिप्रियाणामपि मध्ये प्रेष्ठः प्रिय
तमः सन् निरवद्यः यत्कृते यदर्थं ४० अतस्त्वं कृतार्थ एव तथापि मत्प्रियार्थं स्रष्टिं कुर्वित्याह सर्वेति आ
त्मानं त्वं इदं त्रैलोक्यं यामय्यनुशेरते ताः प्रजाश्च सृज केन आत्मनैवान्यनिरपेक्षेण तत्र ज्ञापकापेक्षाभावमा

एतेन तपसा यन्नेदीनैर्योगसमाधिना राद्धं निःश्रेयसं पुंसां मत्यीतिस्तत्वविन्मतं ४१ अहमात्मात्म
नां धातः प्रेष्ठः सन् प्रेयसामपि अतो मयि रतिं कुर्यात् देहादिर्यत्कृते प्रियः ४२ सर्ववेदमयेनेदमात्म
नात्मात्मयोनिना प्रजाः सृज यथापूर्वं याश्च मय्यनुशेरते ४३ मैत्रेय उ० तस्मा एवं जगत्स्रष्ट्रे प्रधान
पुरुषेश्वरः व्यज्येदं स्वेन रूपेण कंजनाभस्तिरोदधे ४४ इति श्रीभागवते तृतीये नवमोध्यायः ९

ह सर्ववेदमयेनेति आत्मा अहं योनिः कारणं यस्येति ज्ञानक्रियाशक्त्यतिशयं सूचयति यथापूर्वमिति तदा
ज्ञाभ्यासोप्यस्तीत्युक्तं मय्यनुशेरत इति स्थितानामभिव्यक्तिमात्रमेव कर्तव्यमित्यनायासत्वमुक्तं ४३ इदं स्वं
व्यज्य प्रकाश्य पद्मनाभः श्रीनारायणरूपेण तिरोदधे अदृश्यो भवत् ४४ इति तृतीये नवमोध्यायः ९

श्री· दशमे कालसंप्रश्नं प्रतिवक्ति तदुद्भवः प्राकृतादिविभागेन सर्गस्तु दशधोच्यते १२ संचोदितः प्रार्थितः
भा·तृ· हृदिस्थानेव न तु ते प्रश्नास्तेन विस्तृता इत्यर्थः ३ आत्मनिः श्रीनारायणे आत्मानं मनः आवेश्य ४ अब्जसंभू
५३ तो ब्रह्मा यदधिष्ठाय स्थितः कर्णिकाः तत्पद्मं अंभश्च विलोक्य कथंभूतं पद्मं अंभश्च तेन प्रलयकालेन कृ
53

विदुरः· अंतर्हिते भगवति ब्रह्मा लोकपितामहः प्रजाः ससर्ज कतिधा दैहिकीर्मानसीर्विभुः १ ये
च मे भगवन्पृष्टास्त्वय्यर्था बहुवित्तम तान्वदस्वानुपूर्व्येण छिंधि नः सर्वसंशयान् २ सूतः एवं संचो
दितस्तेन क्षत्त्रा कौशारवो मुनिः प्रीतः प्रत्याह तान्प्रश्नान्हृदिस्थानथ भार्गव ३ मैत्रेयः विरिंचोऽपि तथा
चक्रे दिव्यं वर्षशतं तपः आत्मन्यात्मानमावेश्य यदाह भगवानजः ४ तद्विलोक्याब्जसंभूतो वायुना य
दधिष्ठितः पद्मं अंभश्च तत्कालकृतवीर्येण कंपितं ५ तपसा ह्येधमानेन विद्यया चात्मसंस्थया विवृद्ध
विज्ञानबलो न्यपाद्वायुं सहांभसा ६ तद्विलोक्य वियद्व्यापि पुष्करं यदधिष्ठितं अनेन लोकान्प्राग्लीना
न्कल्पितास्मीत्यचिंतयत् ७

तं वीर्यं यस्य तेन वायुना कंपितं न्यपादित्यन्तरेणान्वयः विवृद्धं विज्ञानं बलं
च यस्य न्यपात् सर्वं पीतवान ६ पुष्करं पद्मं अंशा प्राग्लीनांल्लोकान्कल्पितास्मि स्रक्ष्यामि ७ ५३

43A

भगवतास्वयंकरणीयेकर्मणिचोदितोनियुक्तः संस्तदापद्मकोशंप्रविश्यतमेकमेवेति त्रिधालोकत्रयरू
पेणव्यभांक्षीद्विभाज एकेनकमलमुकुलेनकथंलोकत्रयसृष्टिरित्यसंभावनांवारयितुंतस्यविशाल
तामाह द्विसप्तधाचतुर्दशलोकरूपेण उरुधाततोपिबहुप्रकारेण भाव्यंभावयितुंयोग्यं अतोनतेनत्रि
लोकीकरणंविचित्रमित्यर्थः ८ त्रिलोकेरूपेणविभागेहेतुमाह एतावांस्त्रिलोकीरूपः जीवलोकस्यजी
वानांभोगस्थानस्य प्रत्यहंसृज्यस्यसंस्थाभेदोरोचनाविशेषः उक्तः ननुपरमेष्ठिनोपिजीवत्वाविशेषाद्ब्रह्म

पद्मकोशंतदाविश्यभगवत्कर्मचोदितः एकंव्यभांक्षीदुरुधात्रिधाभाव्यंद्विसप्तधा ८ एतावाञ्जीव
लोकस्यसंस्थाभेदःसमाहृतः धर्मस्यह्यनिमित्तस्यविपाकःपरमेष्ठ्यसौ ९ विदुरउ० यदात्थबहु
रूपस्यहरेरद्भुतकर्मणः कालाख्यंलक्षणंब्रह्मन्यथावर्णयनः प्रभो

लोकस्यापिकिमितिप्रत्यहंसृष्टि
र्नभवतीत्यत्राह ह्रियस्मादनिमित्तस्यनिष्कामस्यधर्मस्य विपाकःफलरूपोसौ उपलक्षणमेतत्सत्यलोकस्थ
महःप्रभृतीनामुपासनांसमुचितनिष्कामधर्मफलत्वाद्धिपरार्धपर्यन्तंनतेनाशः तत्रस्थानांचततपरंप्रायेणमु
क्तिरितिभावः ९ कालभेदेनलोकसृष्टिभेदंश्रुत्वातमेवकालंजिज्ञासुः पृच्छति यत्कालाख्यंलक्षणंस्वरू
पं आत्थब्रवीः कथंकालःकल्प्यतेकिंवातस्यसत्त्वंचरूपमितियथावद्वर्णयेत्यर्थः १०

श्री· तत्रसामान्यतःकालस्यस्वरूपमत्रोच्यते उत्तराध्यायेतुविशेषतः गुणानांव्यतिकरोमहदादिः परिणामः
तेनैवाक्रियतेयः सकालइतिशेषः वक्ष्यतेचैकादशेगुणव्यतिकरःकालःस्वभावःसूत्रमेवचेति स्वतस्तु
भा·टी· निर्विशेषः अप्रतिष्ठितः क्वाप्यपर्यवसितः आद्यंतशून्यइत्यर्थः एतदेवदर्शयन्तुमीश्वरः सृष्ट्यादितेननि
५५ मित्तभूतेनकरोतीत्याह पुरुषइति उपादीयतेनिमित्ततयास्वीक्रियतइत्युपादानंनिमित्तंयस्मिन् तमा
44

मैत्रेयउवाच गुणव्यतिकराकारोनिर्विशेषोप्रतिष्ठि
तः पुरुषस्तउपादानमात्मानंलीलयासृजत् ॥ वि
श्वंवैब्रह्मतन्मात्रंसंस्थितंविष्णुमायया ईश्वरेणप
रिच्छिन्नंकालेनाव्यक्तमूर्तिना १२

त्मानमेवविश्वरूपेणासृजत् स्वव्यतिरेकेणसृज्यस्याभावात् एतच्चवस्तुकनमात्रंकालेननिमित्तेन
वासृजदित्येतावदेवविवक्षितं ॥ स्वव्यतिरिक्तसृज्याभावंदर्शयन्कालस्यसृष्टिनिमित्ततांदर्शयति वि
श्वमिति विष्णुमायया संस्थितंसंहृतंब्रह्मतन्मात्रंसहिस्वंईश्वरेणकत्राकालेननिमित्तेन परिच्छिन्नंष्ट ५५
थक्प्रकाशितंअव्यक्तामूर्तिःस्वरूपंयस्येति स्वतोनिर्विशेषतादर्शिता १२

५५

अप्रतिष्ठितत्वं दर्शयितुं तत्कार्यविश्वप्रवाहस्याप्रतिष्ठामाह यथेदानीमस्ति तथाग्रे पूर्वमप्यासीत् पश्चाद
पि भविष्यति एवं सामान्यतः कालं निरूप्य विशेषतो निरूपयिष्यन् तन्निमित्तस्य सर्गस्य पूर्वोक्तानेव भेदान
नुवदति यस्तु प्राकृतो वैकृतश्च स दशमः तन्निमित्तमेव त्रिविधं प्रलयमाह कालेनैव केवलेन नित्यः प्रल
यः द्रव्याणां संकर्षणाग्न्यादिना नैमित्तिकः गुणैः स्वकार्यं ग्रसद्भिः प्राकृतिकः १२ तानेव सर्गान्प्रपंचयति ।

यथेदानीं तथाग्रे च पश्चादप्येतदीदृशं सर्गो नवविधस्तस्य त्रिविधः प्रतिसंक्रमः १३
आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः १४
भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान् चतुर्थ ऐंद्रियः सर्गो यस्तु ज्ञानक्रियात्म
कः वैकारिको देवसर्गः पंचमो यन्मयं मनः षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभोः १६

आद्य इत्यादिना यावदध्यायसमाप्तिः महतो लक्षणं आत्मनो हरेः सकाशाद्गुणानां वैषम्यमिति अहमः अ
हंकारस्य तस्य लक्षणं यत्रेति द्रव्यादयो वक्ष्यमाणास्त्रयः सर्गाः तन्मात्रो भूतसर्गः भूतसूक्ष्मसर्ग इत्यर्थः द्र
व्यशक्तिमान् महाभूतोत्पादकः ज्ञानकर्मेंद्रियात्मकश्चतुर्थः १५ तमसः पंच सर्गा विद्यायाः अबुद्धिं जी
वानामावरणं विक्षेपश्च तां करोतीत्यबुद्धिकृत् तस्य मे मतः शृणु १६

श्री॰ अनुद्देशेन श्रोतव्यमाह यद्विषयामेवासंसारंहरतितस्यहरेर्लीला यद्वा इयमितितमआदिसर्गेरूपात्रजो
भा॰तृ॰ भाजइति ब्रह्मरूपस्येत्यर्थः अस्मिन्पद्येऽप्रवृद्धिकृतइतिप्रथमांतं अनवधानकृतइत्यर्थः ७ मुख्यमिवप्रथ
४५ मंकृतोमुख्यसर्गः तस्युषांस्थावराणांषड्विधत्वमेवाह येपुष्पैर्विनाफलंतितेवनस्पतयः ओषधयःफल
45 पाकांताः लताआरोहणापेक्षाः त्वक्सारावेणवादयः लताएवकाठिन्येनारोहणानपेक्षावीरुधः येपुष्पैःफलं
तिद्रुमाः ८ तेषांसाधारणंलक्षणमाह ऊर्ध्वस्रोतआरोहसंचारोयेषांतमः प्रायाअव्यक्तचेतन्याः अंतःस्पर्शाः

इतिमेप्राकृताःसर्गावैकृतानपिमेशृणु रजोभाजोभगवतोलीलेयंहरिमेधसः ७ सप्तमोमुख्यसर्ग
स्तुषड्विधस्तस्थुषांचयः वनस्पत्योषधिलतास्त्वक्सारावीरुधोद्रुमाः ८ उत्स्रोतसस्तमःप्रायाअं
तःस्पर्शाविशेषिणः तिरश्चामष्टमःसर्गःसोष्टाविंशद्विधोमतः अविदोभूरितमसोघ्राणज्ञाहृ
घ द्यवेदिनः ९

स्पर्शमेवजानंतिनान्यत् तदाहतेरेवनववहिः विशेषिणः अव्यवस्थितपरिणाहानेकभेदवंतः तिर्यक्स्रोत
सांतिरश्चांसर्गमाह तिरश्चामिति सचाष्टाविंशतिभेदः तिरश्चांलक्षणं अविदः श्वस्तनादिज्ञानशून्याः भूरि
तमसः आहारादिमात्रनिष्ठाः घ्राणेनैवेष्टमर्थंजानंति हृदिअवेदिनः दीर्घानुसंधानशून्याः तथाचश्रुतिः अ ४५
थेतरेषांपशूनांअशनापिपासेएवाभिविज्ञानंनवदंतिनविज्ञातंपश्यंतिनविदुःश्वस्तनंनलोकालोकाविति ९

45A

अष्टाविंशतिभेदानेवाह गवादयउष्ट्रांताद्विशफाद्विखुराःनव २० खरादयएकशफाःषट् २१ श्वादयोगो
धांताःपंचनखाद्वादश एवमेतेभूचराःसप्तविंशतिः मकरादयोजलचराः २२ कंकादश्चखेगाअभूचराते
नैकीकृत्यगृहीताः एवमष्टाविंशतिभेदाभवंति तेषांकुलरुरुगौरादिमृगविशेषाः अन्येषामपितिर्यक्प्रा
णिनांयथायथमेतेष्वेवांतर्भावः २३ अर्वागथआहारःसंचारोयस्मिन्सोर्वाक्स्रोतः कृतस्यमार्षं नृणांसर्गः नृ

गौरजोमहिषःकृष्णःसूकरोगवयोरुरुः द्विशफाःपशवश्चेमेअविरुष्ट्रश्चसत्तम २० खरोश्वोश्वत
रोगौरःशरभश्चमरीतथा एतेचैकशफाःक्षत्तःशृणुपंचनखान्पशून् श्वासृगालोवृकोव्याघ्रोमार्जारः
शशशल्लकौ सिंहःकपिर्गजःकूर्मोगोधाचमकरादयः २२ कंकगृध्रवकश्येनभासभल्लूकवर्हिणः
हंससारसचक्राह्वाःकाकोलूकादयःखगाः २३ अर्वाक्स्रोतस्तुनवमःक्षत्तरेकविधोनृणां रजोधिकाः
कर्मपरादुःखेचसुखमानिनः २४ वैकृतास्त्रयएवैतेदेवसर्गश्चसत्तम वैकारिकस्तुयःप्रोक्तःकौमार

णांलक्षणंरजःअधिकंयेषुते २४ एतेत्रयोवैकृताएवनकौमारस्तूभयात्मकाः \\ स्तूभयात्मकः २५
देवसर्गश्चवैकृतस्त्रयानुषंगः वैकारिकस्तुदेवसर्गः प्राकृतेषुएवमेवप्रोक्तः अयंतुततोन्यत्वाद्वैकृतः देव
सर्गत्वात्प्राकृतश्च सनत्कुमारादीनांसर्गस्तुप्राकृतोवैकृतश्चदेवत्वेनमनुष्यत्वेनवसृज्यइत्यर्थः २५

वैकृतस्तुदेवसर्गोष्टविधः तत्रविबुधादयस्त्रयोभेदाः गंधर्वाप्सरसएकः यक्षरक्षांस्येकः २९ भूतप्रेतपिशा
चाएकः सिद्धचारणविद्याधरएकः किन्नरादयएकः आदिशब्दात्किंपुरुषाश्वमुखादयः एतद्विशेषोध्यायेस्प
ष्टंभविष्यति २७ २८ इतितृतीयेदशमः १० ततःएकादशेकालःपरमाण्वादिलक्षणः युगमन्वंतरादिभिः
कल्पमानादिवर्ण्यते १ तदेवंसामान्यतः कालस्योपलक्षणभूतंगुणव्यतिकरंदशविधंनिरूप्येदानींतस्ये

देवसर्गश्चाष्टविधोविबुधाःपितरोसुराः गंधर्वाप्सरसःसिद्धायक्षरक्षांसिचारणाः २९ भूतप्रेत
पिशाचाश्चविद्याध्राःकिंन्नरादयः दशैतेविदुराख्याताःसर्गास्तेविश्वसृक्कृताः ३० अतःपरंप्रवक्ष्यामिवं
शान्मन्वंतराणिच एवंरजस्तुतःस्रष्टाकल्पादिष्वात्मभूर्हरिः सृजत्यमोघसंकल्पआत्मैवात्मानमा
त्मना ३१ इतितृतीयेदशमः १० श्रीशुकउ· चरमःसद्विशेषाणामनेकोसंयुतःसदा परमाणुःसविज्ञेयोनृणामैक्यभ्रमोयतः १

वविशेषंनिरूपयितुंतत्परिच्छेद्यंवस्तुलक्षयतिद्वाभ्यां सतःकार्य
स्य विशेषाणामंशानां यश्चरमःअंत्यः यस्मान्नाशोस्ति अनेकःकार्यावस्थामप्राप्तः असंयुतः समुदाया
वस्थाचाप्राप्तः अतएवसदाकार्यसमुदायावस्थयोरपगमेप्यस्ति सपरमाणुर्विज्ञेयः किंतत्रप्रमाणमत
आह यतः येभ्यःसमुदितेभ्यःनृणांव्यवहर्तृणामैक्यभ्रमः अवयविबुद्धिः तथाचपंचमे अवयविनिराक

रणोवस्थाणि येषां समूहो नहि ते विशेषइति कार्याणामुपस्माकल्प्यतद्दृश्यमा वं २

96A

सूक्ष्मत्वंस्थूलत्वमाह सतएवेति यस्यचरमोंशः परमाणुः तस्यैवसतः कार्यमात्रस्य स्वरूपावस्थितस्य
परिणामांतरमप्राप्तस्य यत्कैवल्यमैक्यंतस्य तत्राह अविशेषः विशेषविवक्षारहितः निरंतरः भेदविवक्षा
रहितश्चसर्वोपिप्रपंचः परममहानित्यर्थः २ यथासूक्ष्मः स्थूलश्चायंपदार्थः एवंकालोप्यनुमितः चकारा
त्सूक्ष्मावस्थाश्रूयते संस्थानेपरमाण्वाद्यवस्थातस्यभुक्तिः व्याप्तिः तया भगवानितिहरेः शक्तिः स्वतोव्यक्तः
व्यक्तंभुंक्तेव्याप्नोतिपरिच्छिनत्तीतितथाविभुः उत्पत्त्यादिप्रदत्तः ३ तदेवंप्रपंचयति सइत्यादिना सतःप्रपंच

सतएवपदार्थस्यस्वरूपावस्थितस्ययत् कैवल्यंपरममहानविशेषोनिरंतरः २ एवंका
लोप्यनुमतः सौक्ष्म्येस्थौल्येचसत्तम संस्थानभुक्त्याभगवानव्यक्तोव्यक्तभुग्विभुः ३ स
कालःपरमाणुर्वैयोभुंक्तेपरमाणुतां सतोविशेषभुग्यस्तुसकालःपरमोमहान् ४

स्यपरमाणुतांपरमाण्ववस्थांयोभुंक्ते सकालःपरमाणुः तस्यैवाविशेषंसाकल्यंयोभुंक्ते सएवपरममहान्
अयमर्थः ग्रहर्क्षताराचक्रस्थइत्यादिना सूर्यपर्यटनेवक्ष्यते तत्रसूर्योयावतापरमाणुनादेशमतिक्रामति
तावान्कालःपरमाणुः यावतावाद्वादशराशिरूपात्मकंसर्वंभुवनकोशमतिक्रामति सएवपरममहान् संवत्सरात्म
कः कालः तस्यैवावृत्त्यायुगमन्वंतरादिक्रमेणद्विपरार्धांतत्वमिति तथाचपंचमेसूर्यगत्यैवकालादिविभागोव

इदानींत्र्यणुकादिलक्षणपूर्वकंमध्यमकालावस्थांकथयति द्वौपरमाणूअणुःस्यात् त्रयोणवस्त्रसरेणुः
श्री॰ सत्वप्रयत्नइत्याह जालार्केतिगवाक्षेप्रविष्टेष्वर्करश्मिष्ववगतः कोसौयोतिलघुत्वेनस्वयमेवानुपतन्नगात्
भा॰तृ॰ गतःपाठांतरे खमेवानुपतन्नवगतः नतुमोष्ट्वी ५ शतंभागास्त्रुटेर्यस्मिन्सवेधस्तैर्वेधैस्तैर्निमिषास्त्रयः
४७ तैःक्षणइत्याम्नाताः काष्ठांपंचदशपंचलघु ६ ७ नाडिकाःषट्सप्तवाप्रहरः सएवयामोपिदिनस्यरात्रेश्चतुर्थो
47

अणुर्द्वौपरमाणूस्यात्त्रसरेणुस्त्रयःस्मृतः जालार्करश्म्यवगतःखमेवानुपतन्नगात् ५ त्रसरेणु
त्रिकंभुंक्तेयःकालःसत्रुटिःस्मृतः शतभागस्तुवेधःस्यात्तैस्त्रिभिस्तुलवःस्मृतः ६ निमेषस्त्रिलवोज्ञे
यआम्नातास्तेत्रयःक्षणः क्षणान्पंचविदुःकाष्ठांलघुतादशपंचच ७ लघूनिवैसमाम्नातादशपं
चचनाडिका तेद्वेमुहूर्तःप्रहरःषड्यामःसप्तवानृणां ८ द्वादशार्धपलोन्मानंचतुर्भिश्चतुरंगुलैः
स्वर्णमाषैःकृतच्छिद्रंयावत्प्रस्थजलाप्लुतं ९

भागःक्वासेषट् वृद्धौसप्तसंध्यांशान्मुहूर्तद्वयंविनेतिज्ञा ॥
तव्ये तत्राप्यनियमार्थोवाशब्दः प्रसह्नतइदानींगणयितुमशक्यत्वात् ८ नाडिकायाउन्मानमाह उन्मी
यते अनेनेत्युन्मानंपात्रं षट्पलताम्रविरचितं पंचगुंजोमाषः तैश्चतुर्भिश्चतुरंगुलायामशलाकारूपेणर
चितैः कृतमूलच्छिद्रेणयावत्प्रस्थपरिमितंजलंप्रविशति नचप्लुतंनिमग्नंभवति तावत्कालोनाडिकाअत्र
पलच्छिद्रयोराधिक्येशीघ्रंनिमज्जेत् अल्पत्वेचविलंबेनेतिपलशलाकयोर्नियमः ९

47A

अहनी अहोरात्रे १० षण्मासा अयनं दिवीत्यस्योत्तरेणान्वयः देवानामहोरात्रे प्राहुः द्वादशमासा ११ १२ अनेन
क्रमेण सौरस्यैर्योनित्यमायुः त्रपयतीत्याह ग्रहाश्चन्द्रादयः ऋक्षाण्यश्विन्यादीनि ताराअन्यानि नक्षत्राणि त
२ डुपलक्षितं यच्चक्रं तत्र स्थितः अनिमिषः कालात्मा विभुरीश्वरः सूर्यः जगत् द्वादशराश्यात्मकं भुवनं
कोशं पर्येति पर्यटति १३ संवत्सरादिभेदश्च सौरवार्हस्पत्यसावनचान्द्रनाक्षत्रमासभेदेन द्रष्टव्यः केचि-

यामाश्चत्वारश्चत्वारो मर्त्यानामहनी उभे पक्षः पंचदशाहानि शुक्लः कृष्णश्च मानद १० तयोः समु
च्चयो मासः पितॄणां तदहर्निशं द्वौ तावृतुः षडयनं दक्षिणं चोत्तरं दिवि ११ अयने चाहनी प्राहुर्वत्स
रो द्वादश स्मृतः संवत्सरशतं नॄणां परमायुर्निरूपितं १२ ग्रहर्क्षताराचक्रस्थः परमाण्वादिना ज २
गत् संवत्सरावसानेन पर्येत्यनिमिषो विभुः १३ संवत्सरः परिवत्सर इडावत्सर एव च अनुव
त्सरो वत्सरश्च विदुरेवं प्रभाष्यते १४

त्पुनरेवमाहुः यदा शुक्लपक्ष प्रतिपदि संक्रांतिर्भवति
तदा सौरचांद्रमासयोर्युगपदुपक्रमो भवति स संवत्सरः ततः सौरमानेन वर्षे षड् दिनानि वर्धन्ते चांद्रमानेन
च षड्दिनानि ह्रसंतीति द्वादशदिनव्यवधानादुभयोरग्रपश्चाद्भावो भवति एवं तद्व्यवधानतारतम्येन पंचव
र्षाणि गच्छंति तन्मध्ये द्वौ मलमासौ भवतः ततः पुनः षष्ठः संवत्सरो भवतीति १४

श्री·
भा·त्र·
५८
58

एवंभूतःकालात्मानित्यमप्रमत्तैःपूजनीयइत्याह यइति सृज्यंकार्यमंकुरादितद्विषयांवीजादीनांशक्तिं
कालरूपयास्वशक्त्याबहुधाउच्छ्वसयन् कार्याभिमुखींकुर्वन्दिविअंतरिक्षेधावति कोसौभूतभेदःमहा
भूतविशेषस्तेजोमंडलरूपीसूर्यः किमर्थंधावति पुंसःपुरुषस्याभ्रमायभ्रमोमोहः तन्निवृत्तये आयुरा

यःसृज्यशक्तिमुरुधोच्छ्वसयन्स्वशक्त्यापुंसोऽभ्रमायदिविधावतिभूतभेदः कालाख्ययागुणम
यंक्रतुभिर्वितन्वंस्तस्मैवलिंहरतवत्सरपंचकाय १५ विदुरउ· पितृदेवमनुष्याणामायुःप
रमिदंस्मृतम् परेषांगतिमाचक्ष्वयेस्युःकल्पाद्वहिर्विदः १६ भगवान्वेदकालस्यगतिंभग
वतोननु विश्वंविचक्षतेधीरायोगराद्धेनचक्षुषा १७ मैत्रेयउ· कृतंत्रेताद्वापरंच
कलिश्चेतिचतुर्युगं दिव्यैर्द्वादशभिर्वर्षैःसावधानंनिरूपितम् १८

दिव्यायेनविषयासक्तिंनिवर्त्तयन्नित्यर्थः सकामानांतुगुणमयंस्वर्गादिफलंक्रतुभिर्विस्तारयन् तस्मै·
संवत्सरपंचकप्रवर्त्तकायपूजांकुरुत १५ इदंस्वस्वमानेनवर्षशतगणिते आयुर्मानंप्रत्यहंकल्प्यते स·
ज्यतइतिकल्पः त्रैलोक्यंतस्माद्वाह्यतः विदोज्ञानिनः १६ योगराद्धेनयोगसिद्धेन १७ द्वादशभिर्वर्षैःस
हस्रैरित्युत्तरश्लोकसामर्थ्यतोज्ञातव्यं १८ ५८

श्री·
भा·त·
३१
49

किंचिदधिकांयुगानामेकसप्ततिंमनुवंशाःपृथ्वीपालकाःक्रमेणभवंति सप्तर्षिप्रभृतयस्तुयुगपत्स
मकालमेवभवंति सुरेशाइंद्रास्तानानुवर्त्तंतेयेगंधर्वादयस्तेपि २४ त्रैलोक्यंवर्तयतीतितथा २५ स्व
मूर्त्तिभिर्मन्वंतरावतारैर्मन्वादिभिर्द्वारभूतैराविष्कृतपुरुषकारःसन्विश्वंरक्षति २६ रात्रिगतांस्थितिमा·

स्वेस्वेकालेमनुर्भुंक्तेसाधिकांह्येकसप्ततिं मन्वंतरेषुमनवस्तद्वंशाऋषयःसुराः भवंति
चैवयुगपत्सुरेशाश्चानुयेचतान् २४ एषदैनंदिनःसर्गोब्राह्मस्त्रैलोक्यवर्त्तनः तिर्यङ्नृपि
तृदेवानांसंभवोयत्रकर्मभिः २५ मन्वंतरेषुभगवान्बिभ्रत्सत्वंस्वमूर्तिभिः मन्वादिभिरिदं
विश्वमवत्युदितपौरुषः २६ तमोमात्रामुपादायप्रतिसंरुद्धविक्रमः कालेनानुगताशेषआ
स्तेतूष्णींदिनात्यये २७ तमेवान्वपिधीयंतेलोकाभूरादयस्त्रयः निशायामनुवृत्तायांनिर्मुक्तशशि
भास्करम् २८

ह पंचभिः तमोमात्रांलेशंप्रतिसंरुद्धः प्रत्याहृतोविक्रमोयेन अनुगतमनुप्रविष्टं
अशेषंयस्मिन् २७ तदेवस्पष्टयति तमेवेति अपिधीयंतइतिकर्मकर्त्तरिप्रयोगः तिरोहिताभवंतीत्य· ४९
र्थः कथंनिर्मुक्तः रहितः शशीभास्करश्चयथाभवतितथा २८

४८७ कृतयुगे चत्वारि सहस्राणि संख्या संध्यांशयोश्चत्वारि चत्वारीत्यष्टौ शतानि च एवं त्रेतादिष्वपि योज्यं १९ युग
स्यादौ संध्या अंते संध्यांशः उक्तानि शतानि संख्याययोः तयोरंतरेण मध्ये युगं तस्य विशेषमाह यत्रेति ग
वालंवादिधर्मविशेषो यत्र विधीयत इत्यर्थः साधारणधर्मस्तु संध्यांशयोरप्यस्त्येव २० चतुष्पात्सकलः त्रेता

चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमं संख्यातानि सहस्राणि द्विगुणानि शतानि च १९
संध्यांशयोरंतरेण यः कालः शतसंख्ययोः तमेवाहुर्युगं तज्ज्ञा यत्र धर्मो विधीयते २० ध
र्मश्चतुष्पान्मनुजान्कृते समनुवर्तते स एवान्येष्वधर्मेण व्येति पादेन वर्धता २१ त्रिलो
क्यायुगसाहस्रं वहिर्ब्रह्मणो दिनं तावत्येव निशा तात यन्निमीलति विश्वसृक् २२
निशावसान आरब्धो लोककल्पोऽनुवर्तते यावद्दिने भगवतो मनून्भुंजंश्चतुर्दश २३

दिषु पादेन पादेन व्येति ह्रसति पादेन पादेन वर्धमानेनाधर्मेण हेतुना एतच्च स्वरूपकथनमात्रं वैराग्यार्थं न
तु धर्मसंकोचार्थं २१ त्रिलोक्या यावद्भिर्महर्लोकप्रभृति ब्रह्मलोकमभिव्याप्य चतुर्युगसहस्रमेकं दिनं यत् य
स्यां विश्वसृक् ब्रह्मा निमीलति स्वपिति २२ तत्र दिनस्थितिमाह निशावसान इत्यादि सार्धैश्चतुर्भिः चतुर्दश
मनून्भुंजन्व्याभुवनित्यर्थः २३

49A

भगवच्छक्तिरूपोयः संकर्षणमुखाग्निस्तेनोष्मणार्दितास्संतः जनलोकंयांति २९ कल्पांतेनएधिताःसिं
धवःसमुद्राः उत्कटश्चाटोपःक्षोभोयेषांतेचतेचंडवातेरीरितोर्मयश्च ३० जनलोकश्चालयोयेषांमहर्लो
काद्गतानामन्येषांचतैः ३१ वैराग्यार्थमाह एवंविधैरहोरात्रैर्वर्षशते सर्वेषांप्राणिनामायुषःपरमपि

त्रिलोक्यांदह्यमानायांशक्त्यासंकर्षणाग्निना यांत्यूष्मणामहर्लोकाज्जनंभृग्वादयोर्दिताः २९ ता
वत्त्रिभुवनंसद्यःकल्पांतैधितसिंधवः प्लावयंत्युत्कटाटोपचंडवातेरितोर्मयः ३० अंतःसतस्मिन्स
लिलआस्तेनंतासनोहरिः योगनिद्रानिमीलाक्षःस्तूयमानोजनालयैः एवंविधैरहोरात्रैःकालगत्योप
लक्षितैः अपक्षितमिवास्यापिपरमायुर्वयःशतं ३२ यदर्धमायुषस्तस्यपरार्धमभिधीयते पूर्वःपरा
र्धोपक्रांतोह्यपरोद्यप्रवर्तते ३३ पूर्वस्यादौपरार्धस्यब्राह्मोनाममहानभूत् कल्पोयत्राभवद्ब्रह्माश
ब्दब्रह्मेतियंविदुः तस्यैवचांतेकल्पोभूद्यंपाद्ममभिचक्षते यद्धरेर्नाभिसरसआसील्लोकसरोरुहं ३५
अयंतुकथितःकल्पोद्वितीयस्यापिभारत वाराहइतिविख्यातोयत्रासीच्छूकरोहरिः ३६

कं अस्यब्रह्मणोयदायुस्तदपक्षितमपक्षीणंइवेतिलोकोक्तिः गतप्रायमित्यर्थः ३२ तदेवाह यदिति ३३ पू
र्वस्यपरार्धस्यादावितित्रिभिःवस्तुकथनमात्रं ३४ पाद्महेतुत्वंतुः यदिति ३५ अयंतुद्वितीयस्यादौकथितः ३६

श्री०
भा०टी०
५०
50

तदेवंकालेननिमित्तेनसृज्यानामायुःपरिमाणमुक्त्वाकालपरिच्छेदरहितंतत्त्वमाह कालोयमितिपंच
भिः उपचर्यतेकेवलंनतुतेनापिक्रमेणागुगणानेतस्येत्याह अव्याहृतस्यकार्योपाधिशून्यस्य अतएवा
नंतस्यानादेश्चजगदात्मनोजगत्कारणस्य ३८ तत्परिच्छेदेकालस्यासामर्थ्यादित्याह कालोयमीश्वरः
समर्थोपिभूम्नः परिणामस्येशितुंनैवप्रभुः समर्थः यतोधाममानिनांदेहगेहाभिमानिनामेवेश्वरः ३९

कालोयंद्विपरार्धाख्योनिमेषउपचर्यते अव्याकृतस्यानंतस्यअनादेर्जगदात्मनः ३८ कालोयंपरमा
ण्वादिर्द्विपरार्धांतईश्वरः नैवेशितुंप्रभुर्भूम्नईश्वरोधाममानिनो ३९ विकारैःसहितोयुक्तैर्विशेषा
दिभिरावृतः अंडकोशोवहिरयंपंचाशत्कोटिविस्तरः दशोत्तराधिकैर्यत्रप्रविष्टःपरमाणुवत्
लक्ष्यतेंतर्गताश्चान्येकोटिशोह्यंडराशयः ४० तदाहुरक्षरंब्रह्मसर्वकारणकारणं विष्णोर्धामपरं
साक्षात्पुरुषस्यमहात्मनः ४१ इतितृतीयेए कादशोऽध्यायः ११

भूम्नःस्वरूपंतत्त्वंपंचपद्याह विकारैःषोडशभिर्युक्तैः अष्ट
प्रकृतिसंयुक्तैःसहितः तदारब्धइत्यर्थः अयमंडकोशः यत्रप्रविष्टःपरमाणुवल्लक्ष्यतइत्युत्तरेणान्वयः की
दृशः अंतःपंचाशत्कोटियोजनविस्तृतः वहिश्चविशेषादिभिः सप्तभिरावृतः ३९ कीदृशैः अंडकोशप्रमा
णाद्दशगुणमुत्तरोत्तरमधिकैः यैस्तैः नकेवलमयमेकएवापितुअन्येपिलक्ष्यंते ४१ सर्वेषांकारणानांकारणंधा
मस्वरूपं ४२ इतितृतीयेएकादशः ११

५०

द्वादशात्कुमारादिमनःसर्गसमैथुनात् कार्यद्वैधेनयौनस्तमनुसर्गोनुवर्ण्यते १ अथइतिब्रह्मणस्वहृतेः प्रथमः मविद्यावृत्तीः ससर्जतत्रतमोनामस्वरूपाप्रकाशः मोहोदेहाद्यहंबुद्धिः महामोहोभोगेच्छातामिस्र स्तत्प्रतिघातेक्रोधः अंधतामिस्रःतन्नाशेहमेवमृतोस्मीतिबुद्धिः तदेवाक्तंवैष्णवे तमोविवेकोमोहःस्या दंतःकरणविभ्रमः महामोहस्तुविज्ञेयोग्राम्यभोगसुखैषणा मरणंह्यंधतामिस्रःतामिस्रःक्रोधउच्यते।

मैत्रेय इतितेवर्णितःत्ततःकालाख्यपरमात्मनः महिमावेदगर्भोयथयथास्राक्षीन्निबोधमे १ स
सर्जाग्रेन्धतामिस्रमथतामिस्रमादिकृत् महामोहंचमोहंचतमश्चाज्ञानवृत्तयः २ दृष्ट्वापापी
यसींसृष्टिंनात्मानंबह्वमन्यत भगवद्ध्यानपूतेनमनसान्यांततोसृजत् ३ सनकंचसनंदंच
सनातनमथात्मभूः सनत्कुमारंचमुनीन्निष्क्रियानूर्ध्वरेतसः ४ तान्बभाषेस्वभूःपुत्रान्प्रजाः
सृजतपुत्रकाः तन्नैच्छन्मोक्षधर्माणोवासुदेवपरायणाः ५

च्यतेअविद्यापंचपर्वैषाप्रादुर्भूतामहा त्मनइतिपातांजलेप्युक्तमेवोक्ताः अविद्यास्मितारागद्वेषाभिनिवेशाःपंचक्लेशाइति श्रीविष्णुस्वामिभिरुक्ता अज्ञानविपर्यासभयशोकाः तदुक्तं स्याद्दृगुत्थविपर्यासेत्यादि २ नवह्वमन्यतनाभ्यनंदत् ३ यद्यपिप्रति कल्पं सनकादिसृष्टिर्नास्तितथापिब्राह्मसर्गत्वादिहोच्यते वस्तुतस्तुसर्वसर्गादयएवप्रतिकल्पंभवंति

सनकाद्युत्पत्तिकथनसर्गप्रपञ्चवर्णनं ५ स्कन्धः ५

अवध्यातः अवज्ञातः प्रत्याख्यातमनुशासनं यैः ६ सवासौ मन्युश्च तन्मन्युः ७ ९ वालकइव १० अग्रेएव

श्री
भा.त.
५१
51

सोवध्यातः सुतैरेवं प्रत्याख्यातानुशासनैः क्रोधंदुर्विषहंजातंनियंतुमुपचक्रमे ६ धियानिगृह्य
माणोपिभ्रुवोर्मध्यात्प्रजापतेः सद्योजायततन्मन्युःकुमारोनीललोहितः ७ सवैरुरोददेवानांपूर्व
जोभगवान्भवः नामानिकुरुमेधातःस्थानानिचजगद्गुरो ८ इतितस्यवचःपाद्मोभगवान्परिपा
लयन् अभ्यधाद्भद्रयावाचामारोदीस्तत्करोमिते ९ यदरोदीःसुरश्रेष्ठसोद्वेगइवबालकः त
तस्त्वामभिधास्यंतिनाम्नारुद्रइतिप्रजाः १० हृदिंद्रियाण्यसुर्व्योमवायुरग्निर्जलंमही सूर्यश्चं
द्रस्तपश्चैवस्थानान्यग्रेकृतानिते ११ मन्युर्मनुर्महिनसोमहान्शिवऋतध्वजः उग्ररेताभवःका
लोवामदेवोधृतव्रतः १२ धीर्वृत्तिरुशनोमानियुत्सर्पिरिलांविका इरावतीस्वधादीक्षारुद्राण्यो
रुद्रतेस्त्रियः १३ गृहाणैतानिनामानिस्थानानिचसयोषणः एभिःसृजप्रजाबह्वीःप्रजानाम
र्ध सियत्पतिः १४

मेवमयाकृतानि ११ १३ सयोषणः सस्त्रीकः एभिः स्थानैः नामभिश्चयुक्तः १४ ॥ ५१

श्री· २४ अधरच्छदाद् अधरोष्ठात् २६ देहान्तरेण कृतं सर्वं वक्ष्यं तद्देहत्यागे कारणमाह वाचमित्यादिना २८ २९ त्वत्ता

भा·तृ· त्तो येः पूर्वैर्ब्रह्मादयोन्येवा तैरेतन्न कृतमंगजं कामं ३० तेजीयसामतितेजस्विनामपि सुश्लोक्यं सत्कीर्तिदं न भव

५२

52

धर्मः स्तनाद्दक्षिणतो यत्र नारायणः स्वयं अधर्मः पृष्ठतो यस्मान्मृत्युर्लोकभयंकरः २५ हृदि कामो भ्रुवः

क्रोधो लोभश्चाधरदच्छदात् आस्याद्वाक्सिन्धवो मेढ्रान्निरृतिः पायोरघाश्रयात् छायायाः कर्दमो ज

ज्ञे देवहूत्याः पतिः प्रभुः मनसो देहतश्चेदं जज्ञे विश्वकृतो जगत् २७ वाचं दुहितरं तन्वीं स्वयंभूर्हरतीं म

नः अकामां चकमे क्षत्तः सकाम इति नः श्रुतं २८ तमधर्मे कृतमतिं विलोक्य पितरं सुताः मरीचिमु

ख्या मुनयो विश्रम्भात्प्रत्यबोधयन् २९ नैतत्पूर्वैः कृतं त्वद्य न करिष्यन्ति चापरे यत्त्वं दुहितरं गच्छेरनि

गृह्याङ्गजं प्रभुः ३० तेजीयसामपि ह्येतन्न सुश्लोक्यं जगद्गुरो यद्वृत्तमनुतिष्ठन्वै लोकः क्षेमाय कल्प

ते ३१ तस्मै नमो भगवते य इदं स्वेन रोचिषा आत्मस्थं व्यञ्जयामास स धर्मं पातुमर्हति ३२ स इत्थं गृणतः

पुत्रान्पुरो दृष्ट्वा प्रजापतीन् प्रजापतिपतिस्तन्वं तत्याज व्रीडितस्तदा तां दिशो जगृहुर्घोरां नीहारं यद्वि

दुस्तमः कदाचिद्ध्यायतः स्रष्टुर्वेदा आसंश्चतुर्मुखात् कथं स्रक्ष्याम्यहं लोकान्समवेतान्यथा पुरा ३४ न्सुसंगतान् ३४

ति येषां तेजीयसां वृत्तं ३१ ३२ तन्वं तनुं ३३ कथं स्रक्ष्यामीत्यभिध्यायतः स्रष्टुः ब्रह्मणः चतुःसंख्याः मुखाः चत्वारः समवेता ५२

51A

सत्वंबलं आकृतिः नीललोहितता स्वभावस्तीव्रतातेने १५ रुद्राणांयूथान्दृष्ट्वा १६ १७ स्रष्टास्रक्ष्यति १८ १९

इत्यादिष्टः सगुरुणा भगवान्नीललोहितः सत्वाकृतिस्वभावेन ससर्जात्मसमाः प्रजाः १५ रुद्रा
णां रुद्रसृष्टानां समन्ताद्ग्रसतां जगत् निशाम्यासंख्यशो यूथान्प्रजापतिरशंकत १६ अलंप्रजाभिः
सृष्टाभिरीदृशीभिः सुरोत्तम मयासहदहंतीभिर्दिशश्चक्षुर्भिरुल्बणैः १७ तपआतिष्ठभद्रंतेस
र्वभूतसुखावहं तपसैवयथापूर्वंस्रष्टाविश्वमिदंभवान् १८ तपसैवपरंज्योतिर्भगवंतमधोक्ष
जं सर्वभूतगुहावासमंजसाविंदतेपुमान् मैत्रेय० एवमात्मभुवादिष्टः परिक्रम्यगिरांपतिं बाढ
मित्यमुमामंत्र्यविवेशतपसेवनं २० अथाभिध्यायतः सर्गंदशपुत्राः प्रजज्ञिरे भगवच्छक्तियु
क्तस्यलोकसंतानहेतवः २१ मरीचिरत्र्यंगिरसौपुलस्त्यः पुलहः क्रतुः भृगुर्वसिष्ठोदक्षश्चदशमस्त
त्रनारदः २२ उत्संगान्नारदोजज्ञेदक्षोंऽगुष्ठात्स्वयंभुवः प्राणाद्वसिष्ठः संजातोभृगुस्त्वचिकरात्क्रतुः
२३ पुलहोनाभितोजज्ञेपुलस्त्यः कर्णयोरृषिः अंगिरामुखतोक्ष्णोत्रिर्मरीचिर्मनसोभवत् २४

२० २१ २२ २३ २४

52A

चातुर्होत्रादीनां चतुर्णां कर्मतंत्रं यज्ञविस्तारः उपवेदैः पुराणैः नयैर्नीतिशास्त्रैश्च सह आश्रमास्तद्वृत्तयश्चा
सन् ३५ मुखतो मुखेभ्यः ३६ चातुर्होत्रस्य सृष्टिक्रममाह शास्त्रमप्रगीतमंत्रस्तोत्रं हेतुः कर्म इज्यामध्वर्योः क
र्म स्तुतिस्तोमः स्तुतिः संगीतं स्तोमं तदर्थमृक्समुदायं त्रिवृत् स्तोमो भवतीत्यादिविहितमुद्गातृप्रयोज्यं प्रा

चातुर्होत्रं कर्मतंत्रमुपवेदनयैः सह धर्मस्य पादाश्चत्वारस्तथैवाश्रमवृत्तयः ३५ विदुर· सवै विश्व
सृङ्नामैशो वेदादीन्मुखतोऽसृजत् यद्यद्येनासृजद्देवस्तन्मे ब्रूहि तपोधन ३६ मैत्रेय· ऋग्यजुःसा
माथर्वाख्यान्वेदान्पूर्वादिभिर्मुखैः शास्त्रमिज्यां स्तुतिस्तोमं प्रायश्चित्तं व्यधात्क्रमात् आयुर्वेदं धनुर्वे
दं गांधर्वं वेदमात्मनः स्थापत्यं चासृजद्वेदं क्रमात्पूर्वादिभिर्मुखैः ३८ इतिहासपुराणानि पंचमं वेद
मीश्वरः सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः षोडश्युक्थौ पूर्ववक्त्रात्पुरीष्यग्निष्टुतावथ आप्तोर्या
तिरात्रौ च वाजपेयं सगोसवं ४० विद्या दानं तपः सत्यं धर्मस्येति पदानि च आश्रमांश्च यथासंख्यंचार

यश्चित्तं चात्मनः ३७ उपवेदक्रममाह आ॰ धनुर्वेदमिति आत्मनो मुखैः स्थापत्यं विश्वकर्मशास्त्रं ३८ ३९ कर्मतंत्रं च क्रम
माह षोडश्युक्थाविति पुरीषी अग्निष्टुत् अग्निष्टोमः ४० विद्येति शौचं तेन गार्हस्थ्यस्य रक्षणाद्धि शुद्धिः परमा मतेति
स्मृतेः दानमिति दया भूताभयप्रदानस्य कलां नार्हति षोडशीमिति वचनात् एवं च तपः शौचं दया सत्यमिति पा

जलदटत्रिभिः ४१

दाः हृते कृता इति प्रथमस्कंधोक्तेरविरोधः ४१

प्राणो यो मा

सावित्र्यं ब्राह्मचर्यं उपनयनादारभ्य गायत्रीमधीयानस्य त्रिरात्रं प्राजापत्यं व्रतान्याचरतः सांवत्सरं ब्राह्मं वेद
ग्रहणांतं बृहन्नैष्ठिकं वार्त्ता निषिद्धकृष्यादिवृत्तिः संचयो याजनादिवृत्तिः शालीनमयाचितवृत्तिः शिलोंछ
नं पतितकणवृत्तिः एकं वचमार्षमित्येताश्चतस्रो वृत्तयः यद्वा शिलोंछ इति द्वंद्वैक्ये सप्तमी एवं वृत्तिभेदेन सति
गृहस्थिताः संभवंतीत्यर्थः ४२ वने स्थिताश्चत्वारस्तत्र वैखानसा अकृष्टपच्यवृत्तयः वालखिल्या नवे लब्धे
पूर्वसंचितान्नत्यागिनः औदुंबराः प्रातरुत्थाय यां दिशं प्रथममपश्यंति ततआहृतैः फलादिभिर्जीवंतः फेन

सावित्रं प्राजापत्यं च ब्राह्मं चाथ बृहत्तथा वार्त्तासंचयशालीनशिलोंछ इति वै गृहे ४२ वै
खानसा वालखिल्यौदुंबराः फेनपा वने न्यासे कुटीचरः पूर्वं बह्वोदो हंसनिष्क्रियौ ४३ आ
न्वीक्षिकी त्रयी वार्त्ता दंडनीतिस्तथैव च एवं व्याहृतयश्चासन्प्रणवो ह्यस्य दह्रतः ४४

पाः स्वयं पतितैः फलादिभिर्जीवंतः कुटीचराः स्वाश्रमकर्मप्रधानाः बहूदकः कर्मोपसर्जनीकृत्य ज्ञानप्रधा
नः हंसो ज्ञानाभ्यासनिष्ठः निष्क्रियः प्राप्ततत्त्वः एते च सर्वे यथोत्तरं श्रेष्ठाः ४३ न्यायादीनां श्वादिक्रमेणो
त्पत्तिमाह आन्वीक्षिकीति आन्वीक्षिक्याद्या मोक्षधर्मार्थविद्याः भूर्भुवः स्वरिति व्यस्तास्तिस्रः समस्ताश्चतुर्थी
यथाहाश्वलायनः एवं व्याहृतयः प्रोक्ता व्यस्ताः समस्ता इति यद्वा मह इति च चतुर्थी तथा च श्रुतिः भूर्भुवः स्वरि ५२
ति वा एतास्तिस्रो व्याहृतयः तासामु ह स्मैतां चतुर्थीं माहाचमस्यः प्रवेदयते मह इति दह्रतः हृदयाकाशात् ४४

53A स्तुतः स्तोत्रनः अनुष्टुप्स्तावानीतिश्रुतेः ४५ महाकल्पेब्रह्माशब्दब्रह्मरूपोभवदित्युक्तंतदेवदर्शयन्वर्णा
नामुत्पत्तिमाह स्पर्शा इतिसार्धेन स्पर्शाःकादिवर्गपंचकंस्वराःकारादिः ४६ ऊष्माणःशषसहचतुष्कंअंतः
यरलवाः समस्तस्वराःषड्जादयःविहारेणक्रीडया ४७ अतएवशब्दतत्वाद्धीपरमेश्वरोनित्यंप्रकाशते॥

प्रा
तस्योष्णिगासील्लोमभ्योगायत्रीचत्वचोविभोः त्रिष्टुम्मांसात्स्नुतोनुष्टुब्जगत्यस्थ्नःप्रजापतेः ४५
मज्जायाःपंक्तिरुत्पन्नाबृहतीप्राणतोभवत् स्पर्शस्तस्याभवज्जीवःस्वरोदेहउदाहृ
तः ऊष्माणमिंद्रियाण्याहुरंतस्थाबलमात्मनः स्वरास्तस्यविहारेणभवंतिस्मप्रजा
पतेः ४७ शब्दब्रह्मात्मनस्तातव्यक्ताव्यक्तात्मनःपरः ब्रह्मावभातिविततोनानाश
क्त्युपँहितः ४८ ततोपरामुपादायससर्गायमनोदधे ४९
हं

स्याद्व्यक्तावैखरी अव्यक्तः प्रणवः तदात्मनस्तस्यब्रह्मणःपरःपरमेश्वरः आभाति कीदृशःब्रह्मपरिपूर्णः
तत्राव्यक्तात्मनोब्रह्मरूपोविततोवभाति व्यक्तात्मनोनानाशक्त्युपबृंहितः इंद्रादिरूपोवभाति ४८ यावद्वै
विसृष्टासतीनीहारंतमोभवत् ततोपरामतिषिद्धकामासक्ता तंतुशब्दब्रह्म तत्तुक्तसदास्यैव ४९

श्री·
भा·तृ·
५४
54

तत्वंतत्रग्रहणेकारणमाह ऋषीणामित्यादिना ५० ५१ युक्तकृतोयथोचितंकुर्वतः अतएवकस्यब्रह्मणः
इदं द्विधाभूतमित्याश्चर्यात्कायमथाप्यभिचक्षते ५२ ५३ यास्त्रीसास्यमहिष्यासीत् एधांबभूविरेहिशामाः

ऋषीणांभूरिवीर्याणामपिसर्गमविस्तृतं ज्ञात्वातद्धृदयेभूयश्चिंतयामासकौरव ५० अहोअद्भुत
मेतन्मेव्यापृतस्यापिनित्यदा नह्येधंतेप्रजानूनंदैवमत्रविघातकम् ५१ एवंयुक्तकृतस्तस्यदैवं
चावेक्षतस्तदा कस्यरूपमभूद्द्वेधायत्कायमभिचक्षते ५२ ताभ्यांरूपविभागाभ्यांमिथुनंसमपद्य
त यस्तुतत्रपुमान्सोभून्मनुःस्वायंभुवःस्वराट् ५३ स्त्रीयासीच्छतरूपाख्यामहिष्यस्यमहात्मनः
तदामिथुनधर्मेणप्रजाह्येधांबभूविरे ५४ सचापिशतरूपायांपंचापत्यान्यजीजनत् प्रियव्रतोत्ता
नपादौतिस्रःकन्याश्चभारत ५५ आकूतिर्देवहूतिश्चप्रसूतिरितिसत्तम आकूतिंरुचयेप्रादा
त्कर्दमायतुमध्यमाम् ५६ दक्षायादात्प्रसूतिंचयतआपूरितंजगत् ५७ इतिश्रीभागवतेमहा
पुराणेतृतीयस्कंधेद्वादशोध्यायः १२ ॥
५४ तदेवाह सचापीति ५५ ५६ यतोयासांसंतति ५४
भिः ५७ इतिश्रीभावार्थदीपिकायांतृतीयस्कंधेद्वादशोध्यायः १२ शुभमस्तुसर्वजगताम् ॥

5 4A त्रयोदशेमिसत्र्यांमनोराकस्मिकात्सुतां धरामुद्धर्तुमुद्यतात्क्रोडाद्दैत्यानुसूदनं १ स्वयंभुवःपुत्रःतद्दे
हांशत्वात् २ विष्वक्सेनोहरिरेवाश्रयोयस्य ३ अतस्तस्यश्रीनिवासस्यचरितंश्रोतव्यमित्याह सुचिरंश्र
मोयस्मिंस्तस्यपुंसांश्रुतस्यायमेवार्थईडितः स्तुतः ननुयेषांहृदयेस्थितेषांभागवतानांगुणानुश्रवणं ४

सूतउ० निशम्यवाचंवदतोमुनेःपुण्यतमांनृप भूयःपप्रच्छकौरव्योवासुदेवकथादृतः १ विदुरउ०
सवैस्वायंभुवःसम्राट्प्रियःपुत्रःस्वयंभुवः प्रतिलभ्यप्रियांपत्नींकिंचकारततोमुने २ चरितं
तस्यराजर्षेरादिराजस्यसत्तम ब्रूहिमेश्रद्दधानायविष्वक्सेनाश्रयोह्यसौ ३ श्रुतस्यपुंसांसुचिर
श्रमस्यनन्वञ्जसासूरिभिरीडितोर्थः तत्तद्गुणानुश्रवणंमुकुंदपादारविंदंहृदयेषुयेषां ४ सू
तउवाच इतिब्रुवाणंविदुरंविनीतंसहस्रशीर्ष्णश्चरणोपधानम् प्रहृष्टरोमाभगवत्कथा
यांप्रणीयमानोमुनिरभ्यचष्ट ५ मैत्रेयउ० यदास्वभार्ययासाकंजातःस्वायंभुवोमनुः प्रांजलिः
प्रणतश्चेदंवेदगर्भमभाषत ६

सहस्रशीर्ष्णः श्रीकृष्णस्यचरणावुपधीयतेयस्मिन् श्रीकृष्णःप्रीत्यायस्यमहापुरुषस्योत्संगेकृत्वाचरणौ
प्रसारयतीत्यर्थः तमभ्यचष्टाभाषत प्रणीयमानस्तेनप्रवर्तमानः ५ ६

श्री· भा·तृ· ५५ 55

त्वमेवैकःपितासर्वेषांयतोजन्मकृद्वृत्तिदःपोषकश्चत्वमेवैकःअतस्तवयद्यप्यन्यापेक्षानास्ति अथाप्य
स्माकंतेशुश्रूषाकेनकर्मणाभवेत् तद्विधेहीत्युत्तरेणान्वयः ७ हेईड्यआत्मशक्तिषु अस्मच्छक्त्येषुकर्म
स्वमध्येकेनकर्मणाभवेत्तद्विधेहि इदंकर्तव्यमितिकथय यत्कृत्वायस्मिन्कृतेसतिविष्वक्सर्वतः ८ वांयु

त्वमेकःसर्वभूतानांजन्मकृद्वृत्तिदःपिता अथापिनःप्रजानांतेशुश्रूषाकेनवा
भवेत् ७ तद्विधेहिनमस्तुभ्यंकर्मस्वीड्यात्मशक्तिषु यत्कृत्वेहयशोविष्वग
मुत्रचभवेद्गतिः ८ ब्रह्मोवाच प्रीतस्तुभ्यमहंतातस्वस्तिस्ताद्वांक्षितीश्वर य
न्निर्व्यलीकेनहृदाशाधिमेत्यात्मनार्पितं ९ एतावत्यात्मजैर्वीरकार्याह्यपचि
तिर्गुरौ शक्त्याप्रमत्तैर्गृह्येतसादरंगतमत्सरैः १० सत्वमस्यामपत्यानिसदृ
शान्यात्मनोगुणैः उत्पाद्यशासधर्मेणगांयज्ञैःपुरुषंयज ११

वाभ्यांस्वस्तिभद्रंस्ताद्भूयात् अस भुवीतिधातः यद्यतः मांमेशाधिअनुशिक्षयेत्यात्मनास्वयमेवार्पितंनि
वेदितंअतःप्रीतोस्मि ९ अपचितिःपूजा गृह्येतआज्ञाइतिशेषः सनकादयोनकुर्वंतिवयंकिमितिकरि
ष्यामइत्येवंभूतोगतोमत्सरोयेभ्यः १० गांक्ष्मांशाधिपालयेत्यर्थः पुरुषंहरिं ११ ॥ ५५

55A

प्रजापालकस्य तेतवशे भविष्यति १२ यत्तल्लिंगो यज्ञमूर्तिः अपगतो येयस्मात्केवलं अमायै वेत्यर्थः यद्य
स्मादात्मैव स्वयं नादृतः तस्मिन्न तुष्टे स्वार्थस्यैवासिद्धिः सर्वात्मत्वात्तस्य १३ वर्तेयवर्तिष्ये अमीवसूदनया
पनायानअनुजानीहि अत्रस्यातवममित्यनुज्ञां देहि १४ महीचेदित्यत आह यदोकः स्थानं सामही हेदे

परंमुश्च षणांमत्वं स्मात्मजा रत्तयान्नृप भगवांस्ते प्रजाभर्तुर्हृषीकेशोनुतुष्यति १२ येषांनतु
ष्टो भगवान्यज्ञलिंगो जनार्दनः तेषां श्रमो ह्यपार्थाय यदात्मा नादृतः स्वयं १३ श्रीमनुः आदे
शेहं भगवतो वर्तेयामीवसूदन स्थानं त्विह अनुजानीहि प्रजानां मम च प्रभो १४ यदोकः सर्व
भूतानां मही मग्ना महांभसि अस्या उद्धरणे यत्नो देव देव्या विधीयतां १५ मैत्रेय उ परमेष्ठी त्वपां
मध्ये तथा सन्नाम वेक्ष्य गां कथमेनां समुन्नेष्य इति दध्यौ धिया चिरं १६ सृजतो मे क्षितिर्वार्भिः
प्लाव्यमाना रसां गता अथात्र किमनुष्ठेयमस्माभिः सर्गयोजितैः १७

वत्रस्यादेव्याः १५ सर्वपानेकृतेपि पुनरकांडपयोद्भूतानामपांमध्ये सन्नाम वसन्नां निमग्नां समुन्नेष्ये उद्धरि
ष्यामि १६ चिंतामेवाह सृजतो वार्भिर्वद्भिः रसां रसातलं ईश्वरेणासर्गे नियुक्तैः १७

श्री· भा·त्र· ५८ 56

मे अनुदृष्टं स एव विदधातु संपादयतु सार्धेनान्वयः वराहतोकः स्वल्पवराहः १८ खस्थः आकाशे स्थितः
सन् १९ चित्रधा अनेकधा २०·२१ एवमंगुष्ठप्रमाणो दृष्टः गंडशिलासूक्ष्मपाषाणः स्थूलपाषाणः तत्समो यज्ञः
श्रीविष्णुः निजरूपतिरोधानेन मे मनः खेदयन्निति २२ मीमांसमानस्य सतः जगर्ज अगर्जत गिरिंद्रस्तत्तुल्यः २३

यस्याहं हृदयादासं स ईशो विदधातु मे इत्यभिध्यायतो नासाविवरात्सहसानघ वराहतोको निरगा
दंगुष्ठपरिमाणतः १८ तस्याभिपश्यतः खस्थः क्षणेन किल भारत गजमात्रः प्रववृधे तदद्भुतमभून्म
हत् १९ मरीचिप्रमुखैर्विप्रैः कुमारैर्मनुना सह दृष्ट्वा तत्सौकरं रूपं तर्कयामास चित्रधा २० किमेतत्सौ
करव्याजं सत्वं दिव्यमवस्थितं अहो बताश्चर्यमिदं नासाया मे विनिःसृतं २१ दृष्टोऽंगुष्ठशिरोमात्रः
क्षणाद्गंडशिलासमः अपिस्विद्भगवानेष यज्ञो मे खेदयन्मनः २२ इति मीमांसतस्तस्य ब्रह्मणः सह
सूनुभिः भगवान्यज्ञपुरुषो जगर्जागेंद्रसन्निभः २३ ब्रह्माणं हर्षयामास हरिस्तांश्च द्विजोत्तमान् स्व
गर्जितेन ककुभः प्रतिस्वनयता विभुः २४ निशाम्य ते घर्घरितं स्वखेदक्षयिष्णु मायामयसूकरस्य ज
नस्तपःसत्यनिवासिनस्ते त्रिभिः पवित्रैर्मुन गृणन्स्म २५

गर्जनप्रयोजनमाह ब्रह्माणमिति २४ घर्घरितं तज्जात्य
नुकरणध्वनिं अनिश्चयेन यः स्वखेदस्तस्य क्षयिष्णु नाशकं तेऽपि पुनरुक्तिः प्रसिद्धिख्यापनार्था त्रिभिः प

त्रिभिः ऋग्यजुःसाममंत्रैः अस्तुवन् २५

५८

घर्घरित

56A

वेदैर्वितन्यते यस्स सः अतएवात्मनो गुणाननुवदतीति तथा तत्तेषां ब्रह्मोच्चारितं वेदमवधार्य ज्ञात्वा २६
कथंभूतः सन्नाविवेशेत्यपेक्षायामाह द्वाभ्यां उत्क्षिप्तो वालः पुच्छो येन खचरः आकाशचारी कठोरः
कठिनः सटाः स्कंधवालान् खराणि तीक्ष्णाणि रोमाणि यस्यां सा त्वग्यस्य खुरैराहतान्यभ्राणि येन सित

तेषां सतां वेदवितानमूर्तिर्ब्रह्मावधार्यात्मगुणानुवादं विनद्य भूयो विबुधोद
याय गजेंद्रलीलो जलमाविवेश २६ उत्क्षिप्तवालः खचरः कठोरः सटावि
धुन्वन्खररोमशत्वक् खुराहताभ्रः सितदंष्ट्र ईक्षाज्योतिर्बभासे भगवान्मही
ध्रः २७ घ्राणेन पृथ्व्याः पदवीं विजिघ्रन्क्रोडापदेशः स्वयमध्वरांगः करा
लदंष्ट्रोऽप्यकरालदृग्भ्यामुद्वीक्ष्य विप्रान्गृणतोऽविशत्कं २८

दंष्ट्रः शुक्लदंष्ट्रः ईक्षा निरीक्षणमेव ज्योतिरालोको यस्य तदा प्रकाशांतराभावात् बभासे अशोभत मही
ध्रः पृथिव्या उद्धर्ता २७ क्रोडापदेशः वराहच्छद्मा स्वयमध्वरांगोऽपि पशुरिव घ्राणेन विजिघ्रन् गृणतः
स्तोतॄन्विप्रानुद्वीक्ष्योः र्ध्वं वीक्ष्य कं जलमविशत् २८

तदादंष्ट्रीतनः समुद्रध्वनिः उत्येत्सते सउदन्वान समुद्रः आर्त्तउवसन्नयन् शब्दंकुर्वन् भोयज्ञेश्वरमा
श्री० पाहिमामवेत्येवंचुक्रोश आर्त्तसाडष्ठप्रमाह उत्सृष्टउत्तिमाः प्रस्नाविता दीर्घाऊर्मयएव भुजा येनसविक्षि
भा०स्क० प्तः आर्त्तविदैतः वज्रकूटोवज्रमयः पर्वतस्तद्वदङ्गंयस्यश्रीभगवतस्तस्यनिपातवेगेन विशीर्णाः कृतिर्य
५७ स २९ तदारसायांरसातले गांष्टष्वीदर्शकस्त्रिपरूः श्रीणिपुरेषिसवनात्मकानिपर्वाणियस्य यज्ञ

सवज्रकूटांगनिपातवेगविशीर्णकुक्षिः स्तनयन्नुदन्वान् उत्सृष्टदीर्घोर्मिभुजेविवार्त्तःचुक्रो
शयज्ञेश्वरपाहिमेति २९ खुरैः क्षुरप्रैर्दरयंस्तदापउत्पारपारंत्रिपरूरसायां ददर्शगांतत्रसु
षुप्सुरग्रेयांजीवधानींस्वयमभ्यधत्त ३० स्वदंष्ट्रयोद्धृत्यमहीनिमग्नांसउत्थितः संरुरुचेरसायाः
तत्रापिदैत्यंगदयापतंतंसुनाभसंदीपिततीव्रमन्युः ३१

सतिवित्यर्थः किंकुर्वन् क्षुरप्राश्रायतायाः क्षुराः तत्सदृशैः खुरैरपोदरयन्कथमुत्पारपारं उत्पाराणां
पारशून्यानां पारमवसानं यथाभवति तथाविदारयन् कथंभूतामग्रेप्रलयसमये तत्रतासुरसु सुषु
प्सुः शिशयिषुः सन् जीवाधीयंतेयस्यांसर्वजीवाधारभूतां यांस्वयमभ्यधत्तआभिमुख्येनदधार जठरे
धृतवानित्यर्थः अनेनउद्धरणेः नायासंद्योतयति ३० रसायाः सकाशादुत्थितः संरुरुचेसम्यगशोभत

तत्रापिदंष्ट्राग्रसमाप्लवगच्छते ३१
५७

57A

ऽन्धानं प्रतिश्चं तेन मस्तः मनाग्ग्लौ विक्रमो यस्य तं दैत्यं सनाभं वक्रं तद्वत्सन्दीपितस्तीव्रो मन्युर्यस्य यद्वा मयि वि
घमाने किमिति परिभवं सहसे इति सनाभेन संदीपिततीव्रमन्युः सश्रीभगवान्सिंहो गजमिव लीलया जघान ३२
गजेन्द्रो जगतीं लीलया विदारयन् गैरिकया धातुधारुणगण्डतण्डो भवति तथा तस्य रक्तमेव पंकस्तेनांकितौ गण्डौ
तण्डं च यस्य जघानेति रवैणाल्वयः ३३ प्रज्ञायालह्मानुवाको वैदिकं सूक्तं तत्स्य हशैवीकैः त्वष्टुः भोग्यजि
जघान रुन्या नमस्तस्य विक्रमं सलीलयेभं मृगराडिवाभसि ३४ तद्रक्तपंकांकितगण्डतण्डो यथा ग
जेन्द्रो जगतीं विभिन्दन् तमालनीलं सितदंतकोसा भासामुत्लिपं तं गजलीलया ग ३३ प्रज्ञाय वह्नोज
लयोनुवाकैर्विरिंचिमुख्या उपतस्थुरीशं ऋषयः जितं जितं जितयज्ञभावन त्रयीं तनुं स्वां परिधुन्वते न
मः यद्रोमगर्तेषु निलिल्युरध्वरास्तस्मै नमः कारणसूकराय ते ३४ रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शं
नं देव यद ध्वरात्मकं छन्दांसि यस्य त्वचि बर्हिरोमस्वाज्यं दृशि त्वंघ्रिषु चातुर्होत्रम् ३५
तेनेत्वया जितमिति संबध्ध्मेवीस्मान पौनःरुक्तिः यज्ञैर्भाव्यते आक्रियते इति तथा त्रयीं वेदं त्रयी निलिल्युर्लीनप्रा
याः कारणं पृथिव्युद्धरणं तेन सूकराय ३४ यज्ञात्मतां प्रपंचयन्तः स्तुवंति रूपमित्यादि चतुर्भिः छन्दांसि गाय
त्र्यादीनि यज्ञाङ्गभूतछन्दसां धनवादेन श्रीभगवद्वपुर्वता विधीयन्ते बर्हिः शब्दे दीर्घीभावश्चार्षः दृशि चक्षुषि
चातुर्होत्रादिकर्म चतुष्टयम् ३५

श्री॰ स्रुक्जुहूः त्वंडे मुखो ऽग्रे स्रुवो नासिकयोः इडाभक्षणपात्रं चमसाः ग्रहाश्च सोमपात्राणि प्राशित्रं ब्रह्म
भागपात्रं ग्रस्यते नेनेति ग्रसनं मुखं वा तदेतन्निच्छिद्रं चर्वणं भक्षणं ३६ दीक्षा दीक्षणीयेष्टिः अनुजन्मवारं
भा॰ टी॰ वारमभिव्यक्तिः उपसदस्तिस्र इष्टयः शिरोधरं ग्रीवा प्रायणीया दीक्षानन्तरेष्टिः उदयनीया समाप्तेरिष्टिः
५८ ते एव दंष्ट्रे यस्य प्रवर्ग्यः महावीरः प्रतप्य संदंशैर्वै क्रियते सत्योहोमरहितोऽग्निः आवसथ्यस्त्वौपासना॰

58

स्रुक्तुण्डआसीत्स्रुवईशनासयोरिडोदरे चमसाःकर्णरंध्रे प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्च
र्वणं ते भगवन्नग्निहोत्रं ३६ दीक्षानुजन्मोपसदःशिरोधरं त्वं प्रायणीयोदयनीयदंष्ट्रः जिह्वा प्र
वर्ग्यस्तव शीर्षकं क्रतोः सत्यावसथ्यं चितयोऽसवो हि ते ३७ सोमस्तु रेतः सवनान्यवस्थितिः
संस्थाविभेदास्तव देव धातवः सत्राणि सर्वाणि शरीरसंधिस्त्वं सर्वयज्ञक्रतुरिष्टिबंधनः ३८

ग्निः तयोर्द्वैद्वैकं तत्तव क्रतुरूपस्य शीर्षं शिरः चितयः इष्टकाचयनानि पंचासवः प्राणाः ३७ प्रातःस
वनादीन्यवस्थितिरासने वाल्पाद्यवस्था वा अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्या
म इति संस्थाभेदाः त्वग्मांसादि सप्त धातवः सत्राणि द्वादशाहादीनि बहुयागसंघातरूपा
णि असोमो यज्ञः ससोमाः क्रतवः तद्रूपस्त्वं इष्टिर्यजनम् अनु ५८
ष्ठानं तदेव बंधनं यस्य सः ३८

58A सर्वोक्तमेवसपरिकरंकीर्त्तयंतः प्रणमति नमोनमइति अखिलमंत्रादिरूपायक्रियात्मने सामान्यव्याप
ररूपाय किंच वैराग्ययुक्तकर्मसाध्यासत्वशुद्धिः ततोभक्तिः ततआत्मजयश्चित्तस्थैर्यं तेनानुभाविते सा
तात्कृतेयज्ञानेतस्मै एवंभूतज्ञानप्रदायगुरवे ३९ हेभूधरसभूधरासपर्वतावनाउदकान्निर्गच्छतोगजेंद्र

नमोनमस्तेखिलमंत्रदेवताद्रव्यायसर्वक्रतवेक्रियात्मने वैराग्यभक्त्यात्म
जयानुभावितज्ञानायविद्यागुरवेनमोनमः ३९ दंष्ट्राग्रकोट्याभगवंस्त्व
याधृताविराजतेभूधरभूः सभूधरा यथावनान्निःसरतोदताधृतामतंगजे
द्रस्यसपत्रपद्मिनी ४० त्रयीमयंरूपमिदंचसौकरंभूमंडलेनाथदताधृतेते
नते चकास्तिशृंगोढघनेनभूयसाकुलाचलेंद्रस्ययथैवविभ्रमः ४१

स्यदताग्रेतेन ४० त्वयाधृताभूर्विराजतेइत्युक्तमिदानींभूमंडलेनत्वद्रूपंविराजतेइत्याहः त्रयीति अथेत्या
र्थांतरे तेरूपंत्वद्रूपंदताग्रेतेनधृतंयद्भूमंडलंतेनचकास्तिशोभतेशृंगेणाढ्योधृतोयोघनस्तेनभूयसातिमह
ता विभ्रमोविलासः ४१

श्री॰ भा॰ त॰ ५९ 59

लोकायलोकावस्थानार्थं तेपत्नीजगतांमातरंयतस्त्वंपितासि एवंसतितत्रस्थिताः संतः त्वयापित्रास
हास्यैश्वर्येमात्रे नममाविधेमनमनंकरिष्यामः नमस्कारेणपरिचरामेतिवा स्वतेजोधारणशक्तिंया
त्रिकामंत्रतोग्निमरणाविवाधाः निहितवानसि ५२ इदंचत्वयातिदुष्करंकृतमित्याहुः कइति हेप्रभोत

संस्थापयैनांजगतांसतस्थुषांलोकायपत्नीमसिमातरंपिता विधेमचास्यैनमसासहत्वयाय
स्यांस्वतेजोग्निमिवारणावधाः ५२ कः श्रद्दधीतान्यतमस्तवप्रभोरसांगतायाभुवउद्विवर्हणं
नविस्मयोसौत्वयिविश्वविस्मयेयोमाययेदंससृजेतिविस्मयं ५३ विधुन्वतावेदमयंनिजंव
पुर्जनस्तपः सत्यनिवासिनोवयं सटाशिखोद्धतशिवांवुविंदुभिर्विमृज्यमानाभृशमीशपाविताः ५४

त्वत्वयाकृतं भुवउद्विवर्हणमुद्धरणं त्वदन्यः कः श्रद्दधीत संहृयेदध्यवसेदित्यर्थः त्वयिष्ठनरसौविस्म
योनभवति यतोविश्वेसर्वेविस्मयाअस्मिन् ऽतोयोभवानिति विस्मयमत्यद्भुतमिदंविश्वंक्रियाविशेषणं
वा ससृजेसृष्टवान् ५३ विस्मयंदर्शयंतः प्रार्थयंते विधुन्वतेतिद्वाभ्यां सटानांशिखाभिरग्रैरुद्धताउच्छ
लिताये शिवाअंवुविंदवस्तैः सिच्यमानावयंपविश्रीकृता ५४ ५९

59A तवकर्मणांपारंयपृषतेः वलोकयितुंज्ञातमिच्छतीत्यर्थः यस्यतवयोगमाययायोगेणोः सहृयोगस्तेन
मोहितमतोविस्वस्यमंगलंविधेहि यथात्मानमचिंत्यानंतशक्तिंज्ञात्वाभजेत् तथानुग्रहाणप्रसादंकुर्वित्यर्थः ४५
उपस्थीयमानः स्वखराक्रांतइति जलेपिधारणाशक्त्याधानंदर्शयति अवितारत्नकः ४६ ४७ कथनीयानि

सवैवतभ्रष्टमतिस्तवैषतेयः कर्मणांपारमपारकर्मणः यद्योगमायागुणयोगमोहितंविश्वंसम
स्तंभगवन्विधेहिशं ४५ मैत्रेयः इत्युपस्थीयमानस्तैर्मुनिभिर्ब्रह्मवादिभिः सलिलेस्वखुराक्रांते
उपाधत्तावितावनिं ४६ सइत्थंभगवानुर्वीविष्वक्सेनःप्रजापतिः रसायालीलयोन्नीतामप्सुन्यस्यय
योहरिः ४७ यएवमेतांहरिमेधसोहरेः कथांसुभद्रांकथनीयमायिनः शृणोतिभक्त्याश्रवयेतवो
शतींजनार्दनोस्याशुहृदिप्रसीदति ४८ तस्मिन्प्रसन्नेसकलाशिषांप्रभौकिंदुर्लभंताभिरलंलवा
त्मभिः अनन्यदृष्ट्याभजतांगुहाशयःस्वयंविधत्तेस्वगतिंपरःप
मायीनिमायावंतिचरित्राणिश्रवयेत
कस्यमार्षमुशतींकमनीयां हृदिप्रसीदतिस्वमनसिसंतुष्यतीत्यर्थः ४८ यद्यपिसलभास्तथापिनप्रार्थनी
याइत्याह ताभिराशीर्भिरलं लवात्मभिः तुच्छाभिः नचतदाभजनस्यैवफलंप्रकाशनीयमित्याह श्रीभग
वद्भजनव्यतिरेकेणफलांतरदृष्टिंविनाभजतांस्वपदप्राप्तिंस्वयमेवविधत्ते गुहाशयत्वादहैतुकीभक्तिंजा

श्री॰ अतः कोनामपुराकथानांपूर्ववृत्तानांमध्ये कथंचिदापीयविरज्येतविरमेत् नरेतरंपशुंविना ५ इति
श्रीभावार्थदीपिकायांतृतीयस्कंधेत्रयोदशोऽध्यायः १३ चतुर्दशेनिदानंततद्वधेवक्तुमुच्यते संध्यायां
भा॰तृ॰
६॰
60

कोनाममलोकेपुरुषार्थसारवित्पुराकथानांभगवत्कथासुधां आपीयकर्णांजलिभिर्भवापहाम
होविरज्येतविनानरेतरं ५ इतिश्रीभागवतेतृतीयस्कंधेत्रयोदशः १३ शुकउ॰ निशम्यकौ
षारविणोपवर्णितांहरेः कथांकारणसूकरात्मनः पुनःसपप्रच्छतमुद्यतांजलिर्नचातितृप्तो
विदुरोधृतव्रतः १ विदुर॰ तेनैवतुमुनिश्रेष्ठहरिणायज्ञमूर्तिना आदिदैत्योहिरण्याक्षोहतइ
त्यनुशुश्रुम २ तस्यचोद्धरतःक्षौणींस्वदंष्ट्राग्रेणलीलया दैत्यराजस्यचब्रह्मन्कस्माद्धेतोरभू
न्मृधः ३ मैत्रेयउ॰ साधुवीरत्वयापृष्टमवतारकथांहरेः यत्त्वंपृच्छसिमर्त्यानांमृत्युपाशविशात
नी ४

कश्यपाद्गर्भसंभवःकामतोदितेः १ तेनैवयेनहरिणाभूमिरुद्धृताःनुशुश्रुमश्रुतवन्तोवात् २ मृधोयुद्धं ३ ६०
साधुत्वेहेतुः यद्यस्मात्त्वंहरेरवतारकथापृच्छसीति मृत्योःपाशविशातयतिमोचयतीतितथा ४

60A तद्देवदर्शयति यथा कथ्यया उत्तानपदः पुत्रो ध्रुवः मुनिना नारदेनार्भक एव यदा ध्रुवाय सुनंदादिभि
र्विमानमानीतं तदा स्वदेहत्यागोऽपेक्षितः स्यादिति मत्वा मृत्यावासन्नेपि देहं न तत्याज किंतु सोपान
वत्तस्य मूर्ध्नि पदं दत्त्वा विमानमारुह्य विष्णुपदमारूढः वक्ष्यति हि परीत्याभ्यर्च्य धिष्ण्याग्र्यं कृतस्वस्त्य
यनो द्विजैः इत्येवं तदधिष्ठानं विभ्रद्रूपं हिरण्मयमिति ५ तयोः संग्रामे हृतं वक्ष्यमितिहासं प्रस्तौति

यथोत्तानपदः पुत्रो मुनिना गीतयार्भकः मृत्योः कृत्वैव मूर्ध्न्यंघ्रिमारुरोह हरेः पदं ५
अथात्रापीतिहासोयं श्रुतो मे वर्णितः पुरा ब्रह्मणा देवदेवेन देवानामनुपृच्छतां ६
दितिर्दाक्षायणी क्षत्तर्मारीचं कश्यपं पतिं अपत्यकामा चकमे संध्यायां हृच्छयार्दिता ७
इष्ट्वाग्निजिह्वं पयसा पुरुषं यजुषां पतिं निम्लोचत्यर्क आसीनमग्न्यगारे समाहितं ८

अनुपृच्छतां देवानां ब्रह्मणा वर्णित इतिहासो मया श्रुतः ६ देवप्रश्नप्रस्तावाय प्रथमं हिरण्याक्षहिरण्य
कशिपूत्पत्तिप्रसंगमाह दितिरित्यादिना यावदध्यायसमाप्तिः मरीचेः पुत्रं हृच्छयः कामः तेनार्दिता
तः संध्यायामेव कामितवती ७ तदप्यग्निहोत्रशालायां तत्रापि समापिते अग्निजिह्वाय स्व
यजुषां यज्ञानां पतिं पुरुषं श्रीविष्णुं ८

श्री·
भा·तृ·
८१
61

कृपणां बहुभाषिणीमिति वक्ष्यति एषमामिति द्वाभ्यां कार्पण्यं भर्तरीति चतुर्भिश्च बहुभाषणं वर्ण्यते दु-
नोति पीडयति दुङ् उपतापे विक्रम्य शौर्यमाविर्भाव्य रंभां कदलीं ९ आयुङ्क्तां सर्वतोऽनन्तसम्यक्करोतु १०
भर्तरि प्राप्तमानानां स्त्रीणां मा विशाते व्याप्नोति प्रजया पुत्ररूपेण तज्जायाजाया भवति यदस्यां जायते पु-

दितिरुवाच एष मां त्वत्कृते विद्वन् कामआत्तशरासनः दुनोति दीनां विक्रम्य रंभामिव मतंगजः
९ तद्भवान् दह्यमानायां सपत्नीनां समृद्धिभिः प्रजावतीनां भद्रं ते मय्यायुंक्तामनुग्रहम् १० भर्तर्या
प्तोरुमानानां लोकानाविशते यशः पतिर्भवद्विधो यासां प्रजया ननु जायते ११ पुरा पिता नो भग
वान्दक्षो दुहितृवत्सलः कं वृणीत वरं वत्सा इत्यपृच्छत नः पृथक् १२ स विदित्वात्मजानां नो भावं
संतानभावनः त्रयोदशाददात्तासां यास्ते शीलमनुव्रताः १३ अथ मे कुरु कल्याणं कामं कंजवि
लोचन आर्तोपसर्पणं भूमन्नमोघं हि महीयसि १४ इति तां वीर मारीचः कृपणां बहुभाषिणीं
प्रत्याहानुनयन्वाचा प्रवृद्धानंगकश्मलां १५

नरिति श्रुतिः ११ नोऽस्माकं पिता नोऽस्मान्पृथगपृ
च्छदिति १२ अभवं भावः त्रयोदशानामप्यस्माकं त्वयि भावसाम्ये वैषम्याचरणं तवानुचितमिति १३ मो
घं न भवति हि महीयसि त्वादृशे महत्त्वमे १४ प्रवृद्धानंगेन कश्मलं मोहो यस्यास्तां १५ ८१

61A

संध्याकालवंचनाय भार्याप्रशंसा एष इति पंचभिः यतो यस्याः सकाशात् १७ सर्वाश्रमानुपादायेति तानप्य
न्नादिदानेन कृच्छ्रतस्तारयन् स्वयं तरतीत्यर्थः देहस्यार्धं कर्मसु द्वयोः सहाधिकारात् यच्छ्रेयानां तां तामि
तितृतीयस्योकेन संबंधः स्वधुरं गृहकर्मभारं विज्वरो निश्चिंतः १९ हेलाभिर्लीलाभिर्जयेमेति संभा

एष तेहं विधास्यामि प्रियं भीरु यदिच्छसि तस्याः कामं न कः कुर्यात्सिद्धिस्त्रैवर्गि
की यतः १७ सर्वाश्रमानुपादाय स्वाश्रमेण कलत्रवान् व्यसनार्णवमत्येति जल
यानैर्यथार्णवम् १८ यामाहुरात्मनो ह्यर्धं श्रेयस्कामस्य मानिनि यस्यां स्वधुरम
ध्यस्य पुमांश्चरति विज्वरः १९ यामाश्रित्येंद्रियारातीन्दुर्जयानितराश्रमैः वयं ज
येम हेलाभिर्दस्यून्दुर्गपतिर्यथा २० न वयं प्रभवस्तां त्वामनुकर्तुं गृहेश्वरि अ
प्यायुषा वा कार्त्स्न्येन ये चान्ये गुणगृध्नवः २१ स्को

यस्मादिंद्रियाणि प्रायेण ततस्ततो न सर्पंतीति २० तां त्वामनेकोपकारकर्त्रीं प्रत्युपकारैस्त्वत्सदृशीं भवितुं न प्र
भवो न समर्थाः ये चान्ये गुणगृध्नवो गुणग्राहिणस्तेपि न समर्थाः संसर्गेण नाप्यायुषा वा शाह्वाजन्मांतरैरपि न
प्रभवः समर्थाः २१

श्री· यद्यपित्वदनुकरणमशक्यं प्रजानांपुत्रोनातिवोचंतिननिंदंतिपालयप्रतीक्षस्व २१ निंदामगणयं
भा·द· तीभीषयन्श्रीमद्रुद्रमनुवर्णयति एषेतिसप्तभिः घोराणामेषावेलास्वयंचघोरदर्शना २२ भूता
६२ श्वतेपर्षदोभूतगणाः २३ तर्हितत्संमुखमात्रंवर्जनीयमितिचेत्तत्राह श्मशानेयश्चक्रानिलोवातमंड
62

अथापिकामममेतंतेप्रजात्यैकरवाणएदं यथामांनातिवोचंतिमृडतंप्रतिपालय २१ एषाघो
रतमावेलाघोराणांघोरदर्शिना चरंतियस्यांभूतानिभूतेशानुचराणिह २२ एतस्यांसाधि
संध्यायांभगवान्भूतभावनः परीतोभूतपर्षद्भिर्वृषेणाटतिभूतराट् २३ श्मशानचक्रानिल
धूलिधूम्रविकीर्णविद्योतजटाकलापः भस्मावगुंठामलरुक्मदेहोदेवस्त्रिभिःपश्यतिदेवर
स्ते २४

लीतस्मिन्याधूलिस्तयाधूम्रोविकीर्णोविततः विद्योतोद्युतिमान् जटाकलापोयस्य भस्मनावगुंठःभ
स्मप्रावृतः अमलोरुक्मवद्देहोयस्यसदेवः त्रिभिःसोमार्काग्निनेत्रैः पश्यतीत्यस्योत्तरश्लोकत्रयेणान्व ६२
यः एकसजामातरः परस्परंभ्रातरोव्यवह्रियंते अतोममभ्रातासौतवदेवरइत्यर्थः २४

62A

नन्वेतंथापिमहत्वेनादरणीयस्यस्वजनस्यचतत्वसर्वंवक्तमेतप्रवतत्राह यस्यस्वजनादिर्नास्तिसमत्वादी
श्वरस्यपैश्वर्ययोगमाह येनवरणापविद्धानिर्माल्यवद्दूरतस्त्यक्ता तेनभुक्तभोगामजोमायातत्सर्वयौवि
भूतिमहाप्रसादइत्याशास्महेवयंतेस्तमाराध्य २५ अनिषिद्धस्वत्यागादसौपिशाचश्चपद्मासोनकार्य

नयस्यलोकेस्वजनःपरोवानात्माद्दतोउतकश्चिद्विगर्ह्यः वयंत्वतेयत्त्वरणापवि
द्धामाशास्महेजांवतभुक्तभोगां २५ यस्यानवद्याचरितंमनीषिणोगृणंत्यवि
द्यापटलंविभित्सवः निरस्तसाम्यातिशयोपियत्स्वयंपिशाचचर्यामचरद्गतिःस
तां २६ हसंतियस्याचरितंहिदुर्भगाः स्वात्मन्रतस्यावि दुषःसमीहितं ये
वस्त्रमाल्याभरणानुलेपनैःश्वभोजनंस्वात्मतयोपलालितं २७

इत्याहद्वाभ्यां यस्यानवद्यंविषयासक्तिशून्यमाचरितंविभित्सवःभेत्तुमिच्छवः २६ समीहितमभिप्रेतंलोक
शिक्षार्थंअविदुषोऽविद्वांसः यद्वा नविद्वान्यस्मादितितस्यसर्वज्ञस्येत्यर्थः दुर्भगानेवाह यैरिति श्वभो
जनंश्वनांभोज्यंशरीरंस्वात्मनयायमेवात्मेतिबुद्ध्या २७

श्री॰ भा॰ त॰ ६३
63

अहोभ्रतर्कं तस्याचरणमित्याह ब्रह्मादयो येन कृतान्सेतून्स्वाधिकारान्पालयंति यः कारणं यस्य येन कृतमिदं विश्वं मायाच यस्याज्ञाकरी विभुः नः श्रीपरमेश्वरस्य विडंबनं मतर्क्यमित्यर्थः २८ भर्त्री निरूपके एवं संविदिते ज्ञापिते पि सति वृषलीवेश्येव २९ विकर्मणि निषिद्धे अदृष्टाय दैवरूपायेश्वरा

ब्रह्मादयो यत्कृतं सेतुं पालायत्कारणं विश्वमिदं च माया आज्ञाकरी तस्य पिशाचचर्याम्अहो विभूम्न स्वरितं विडंबनं २८ मैत्रेयः सैवं संविदिते भर्त्रा मन्मथोन्मथितेंद्रिया जग्राहवासो ब्रह्मर्षेर्वृषलीव गतत्रपा २९ सविदित्वाथभार्यायास्तं निर्बंधं विकर्मणि नत्वा दृष्टाय रहसि तया थोपविवेशह ३० अथोपस्पृश्य सलिलं प्राणानायम्य वाग्यतः ध्यायंजजाप विरजं ब्रह्म ज्योतिः सनातनं ३१ दितिस्तु व्रीडिता तेन कर्मावद्येन भारत उपसंगम्य विप्रर्षिमधोमुख्यभ्य भाषत ३२ दितिरुवाच नेमे गर्भमिमं ब्रह्मन्भूतानामृषभो वधीत् रुद्रः पतिर्हि भूतानां यस्याकरवमंहसम् ३३

य उपविवेशेति मैथुनं लल्पते ३० उपस्पृश्य स्नात्वा भर्गशब्दवाच्यं विरजं ज्योतिर्ध्यायन्सनातनं ब्रह्म गायत्रीप्रणवं वा जाप ३१ कर्मावद्येन कर्मदोषेण ३२ नावधीत् मा हंत्वित्यर्थः वधशंकाबीजमाह रुद्र इति अंहसमंहः पराधमकरवं कृतवत्यस्मि ३३ ६३

63A

रुद्रुः खंतद्रावयतीतिरुद्रस्तस्मैउग्रायाः नतिलंघ्याय मीढुषेसकामेषुफलसेचनकर्त्रेनिष्कामेषुशि
वाय वस्तेतोन्यस्तदंडाय उद्धृतदंडायमहारेमन्यवे ३४ भामोभगिनीभर्त्ता उरुरनुग्रहोयस्यव्याध
सनिर्दयस्यापि सतीपतिरित्यनेनस्त्रीणांस्वभावंस्वयमपिवेत्तीतिसूचयति ३५ स्वसर्गस्यस्वसंतानस्या

नमोरुद्रायमहतेदेवायोग्रायमीढुषे शिवायन्यस्तदंडायधृतदंडायमन्यवे ३४ सनःप्रसी
दतांभामोभगवानुर्वनुग्रहः व्याधस्याप्यनुकम्प्यानांस्त्रीणांदेवःसतीपतिः ३५ मैत्रेयः स्वस
र्गस्याशिषंलोक्यामाशासानांप्रवेपती निवृत्तसंध्यानियमोभार्यामाहप्रजापतिः ३६ कश्यपउ
अप्रायत्यादात्मनस्तेदोषान्मौहूर्तिकादुत मन्निदेशातिचारेणदेवानांचैवहेलनात् ३७ भवि
ष्यतस्तवाभद्रौजठरेजठराधमौ लोकान्सपालांस्त्रींश्चंडिमुहुराक्रंदयिष्यतः ३८

शिषं सुभांलोक्यांलोकद्वयार्हां संध्यायांयोनियमः सनिवृत्तोयस्य ३६ तेआत्मनश्चित्तस्याशायत्यादशुचि
त्वात् मौहूर्तिकात् संध्याक्षणात् उतापि ममनिदेशस्याज्ञाया अतिचारेणातिक्रमेणदेवानांरुद्रानुचरा
णां ३७ एतैस्त्रिभिः हेतुभिः जठराधमौपुत्रापशदौहेचंडिकोपने ३८

३९

श्री० भा० तृ० ६४ 64

शतपर्वधृग्वज्रधरः ॥ ४० ॥ स्वनाभेनोदारो वारूर्यस्य मत्स्यं मम कोपितेष्विस्युक्तत्वाच्छंकितचित्ता सती प्रार्थ-
यते ब्राह्मणान्माभूदिति ॥ ४१ ॥ नारकाश्चापि तथा यांयां योनिमसौ गतो भवति तत्रस्थाश्च नानुगृह्णंति कृ-
पां न कुर्वंति ॥ ४२ ॥ कृतो योपराधस्तेन शोकस्ततोनुतापस्तेन प्रत्यवमर्शनात् मुक्तामुक्तविचारणात् भग-

प्राणिनां हन्यमानानां दीनानामकृतागसां स्त्रीणां निगृह्यमाणानां कोपितेषु महात्मसु ॥ ३९ ॥ तदा
विश्वेश्वरः क्रुद्धो भगवाँल्लोकभावनः हनिष्यत्यवतीर्यासौ यथाद्रीन् शतपर्वधृक् ॥ ४० ॥ दितिः वधं भ-
गवता साक्षात्सुनाभोदारबाहुना आशासे पुत्रयोर्मह्यं मा क्रुद्धाद्ब्राह्मणात्प्रभो ॥ ४१ ॥ न ब्रह्मदंडदग्धस्य
न भूतभयदस्य च नारकाश्चानुगृह्णंति यांयां योनिमसौ गतः कश्यपः कृतशोकानुतापेन सद्यः
प्रत्यवमर्शनात् भगवत्युरुमानाच्च भवे मय्यपि चादरात् ॥ ४३ ॥ पुत्रस्यैव च पुत्राणां भवितैकः सतां
मतः गास्यंति यद्यशः शुद्धं भगवद्यशसा समं ॥ ४४ ॥ योगैर्हेमेव दुर्वर्णं भावयिष्यंति साधवः निर्वैरादिभि-

र्वति दैवो भवे श्रीरुद्रे ॥ ४५ ॥ एतैः पंचभिः कारणैः पुत्रस्य हिरण्यकशिपोः पुत्राणां मध्ये एकः सतां मतो भविष्यति
तमेव वर्णयति गास्यंतीति सार्धैः पंचभिः समं सदृशं वा ॥ ४४ ॥ हीनवर्णं हेम यथा योगैर्दाहादिभिरुपायैः शो-
ध्यते तथा पापस्वशीलं स्वभावमनुवर्तितमनुगंतं प्रांते निर्वैरादिभिर्योगैरात्मानं भावयिष्यति शोधयिष्यं

६४

64A

विश्वप्रसादहेतुर्यदात्मकं स्वहृक् आत्मसाक्षी यस्मात्तन्ययाभगवानेवसत्यइत्येवंभूतयादृशातोष्यते तोषंप्राप्स्यते ४८ तत्रहेतुः सवैइति महात्माःपरिच्छिन्नदृष्टिः महानुभावोमहाप्रभावः महतामपिमध्ये महिष्टः अतिशयेनमहान् प्रवृद्धयाभक्त्याःनुभाविते शोधितेचित्ते वैकुंठहृदिनिवेश्यदेहाद्यभिमानंत्य क्ष्यति ४९ महाभागवततमाह अलंपटः शीलधरःसमभावः गुणानांधैर्यादीनामाकरोजन्मभूमिः परे

यत्प्रसादादिदंविश्वंप्रसीदतियदात्मकं सस्वदृग्भगवान्यस्यतोष्यतेनन्ययादृशा ४८ सवैमहा भागवतोमहात्मामहानुभावोमहतांमहिष्टः प्रवृद्धभक्त्यानुविभावितांशयेनिवेश्यवैकुंठमि मंविहास्यति ४९ अलंपटःशीलधरोगुणाकरोहृष्टःपरर्ध्याव्यथितोदुःखितेषु अभूतशत्रुर्ज गतःशोकहर्तानै दाघिकंतापमिवोडुराजः ४८ अंतर्बहिश्चामलमब्जनेत्रंस्वपूरुषेच्छानु गृहीतरूपं पौत्रस्तवश्रीललनाललामंद्रष्टास्फुरत्कुंडलमंडितानन ४९

धांसमृद्ध्याहृष्टः परेषुदुःखितेषुसत्सुदुःखितः नभूतोजातःशत्रुर्यस्यनिदाघभवंतापंचंद्रोययाहरति एवं जगतःशोकहर्ताभविष्यति ४८ अपरिच्छिन्नदृष्टित्वमाहांतरिति स्वपुरुषाणामिच्छयाःपुनःपुनर्गृहीता निरुपाणियेन श्रीरेवललनासुंदरीतस्या ललामंमण्डनंद्रष्टाद्रक्ष्यति ४९

श्री० महामनाः सोत्साहं विना हरिणा महद्युद्धेन मरणे पुत्रयोः कीर्तिः संततिश्च भवेदिति ५ इतिश्रीभावा
भा०तृ० र्थदीपिकायांतृतीयस्कंधेचतुर्दशः १४ हृतश्रीभैः सुरैः पृष्टः प्राहपूर्वदशोविधिः तद्बीजंविप्रशापादिवै
६५ कुंठेविस्मृतयोः तदेवंदेवानांब्रह्मणश्चसंवादेप्रस्तावमुक्त्वेदानींतंसंवादंवक्तुमाह प्राजापत्यंकाश्यपं
65

मैत्रेयः श्रुत्वाभागवतंपौत्रममोदतदितिर्भृशं पुत्रयोश्चवधंकृस्नाद्विदित्वा
सीन्महामनाः ५ इतिश्रीभागवतेतृतीयेचतुर्दशः १४ मैत्रेयउ० प्राजाप
त्यंतुतत्तेजः परतेजोहनंदितिः दधारवर्षाणिशतंशंकमानासुरार्दनात् १
लोकेतेनहतालोकेलोकपालाहतौजसः न्यवेदयन्विश्वसृजेध्वांतव्यतिकरंदि ६
शां २ तमप्यतद्विभोवेत्थसंविग्नायद्वयंभृशं नह्यव्यक्तंभगवतःकालेना
स्पृष्टवर्त्मनः ३

तेजोवीर्यंपरेषांतेजोहंतीतितथा आर्षःस्वपुत्राभ्यांकश्यपेतेयत्सुरा
णांमर्दनंपीडनंतस्माच्छंकमाना १ तेनगर्भतेजसाहतालोकेनिरस्तसूर्यादिप्रकाशे हतौजसःहत
प्रभावाः ध्वांतेनव्यतिकरंसंकरं २ वेत्थज्ञानासिकिंविचारयसि यद्यतोवयंसंविग्नाभीताः अव्यक्त ६५
मज्ञातंनस्पृष्टंवर्त्मज्ञानप्रचारोयस्य ३

65A ब्रह्माणंपरमेश्वरंतेनस्तुवंतः प्रार्थयंते देवदेवेतिसप्तभिः लोकनाथानांशिखामणेभावदभिप्रायज्ञोसि
केनाभिप्रायेणदितेर्गर्भोवर्धते इतिजानासीत्यर्थः ४ विज्ञानंवीर्यंबलंयस्यमंब्रह्मदेहमुपेयुषेप्राप्तवते गृ
हीतोगुणभेदोरजोगुणोयेन व्यक्तस्यप्रपंचस्ययोनयेकारणाय नव्यक्ताकेनापिप्रमाणेनज्ञातायोनिर्यस्ये
तिच ५ सकामतयाप्रतिक्षणंदुःखमनुभवंतोनिष्कामभक्तान् स्तुवंतआऊर्द्वाभ्यां येत्वेति अनन्येननि

देवदेवजगद्धातर्लोकनाथशिखामणे परेषामपरेषांत्वंभूतानामसिभाववित् ४ न
मोविज्ञानवीर्यायमाययेदमुपेयुषे गृहीतगुणभेदायनमस्तेव्यक्तयोनये ५ ये
त्वानन्येनभावेनभावयंत्यात्मभावनं आत्मनिप्रोतभुवनंपरंसदसदात्मकं ६ ते
षांसुपक्वयोगानांजितश्वासेंद्रियात्मनां लब्धयुष्मत्प्रसादानांनकुतश्चित्पराभवः ७

ष्कामेन भावेनभक्त्याध्यायंति आत्मनोजीवन्भावयतीतितथास्वस्मिन्प्रोतानिग्रथितानिभुवनानियेनचेतना
चेतन प्रपंचकारणमित्यर्थः तत्रहेतुः सदसदात्मकंकार्यकारणरूपं वस्तुतस्ताभ्यांपरं ६ जितःश्वास
इंद्रियाणिचमनश्चयैः अतःसुपक्वयोगाः अतएवप्राप्तोयुष्मत्प्रसादोयैस्तेषां ७

श्री· अन्येतुनित्यंकर्मलोपिनइत्याहयस्येति तंत्यादामन्याआयत्ताआधीनाः मुख्यायनियंत्रेणप्राणरूपायेति
भा·टी· वा तथाचश्रुतिःतस्यवार्केत्रिर्नामानिदामानिइत्यादि ८ तमसाहोरात्रविभागाभावेनलुप्तानिकर्मा
६६ णियेषामापन्नानापद्गतान् अस्मान् ९ आपत्कारणमाहुः एषगर्भस्तस्यविशेषेणमर्पितंनिक्षिप्तंकाश्यप
66

यस्यवाचाप्रजाः सर्वागावस्तंत्येवयंत्रिताः हरंतिबलिमायत्तास्तस्मैमुख्यायतेनमः ८ सत्वंवि
धत्स्वशंभूमंस्तमसालुप्तकर्मणां अदभ्रदययादृष्ट्याआपन्नानर्हसीक्षितं ९ एषदेवदितेर्गर्भ
ओजःकाश्यपमर्पितं दिशस्तिमिरयन्सर्वावर्धतेग्निरिवैधसि १० मैत्रेयउ· सप्रहस्यमहाबा
होभगवान्शब्दगोचरः प्रत्याचष्टात्मभूर्देवान्प्रीणन्रुचिरयागिरा ११ ब्रह्मोवाच मानसामेसु
तायुष्मत्पूर्वजाःसनकादयः चेरुर्विहायसालोकाल्लोकेषुविगतस्पृहाः १२ तएकदाभग
वतोवैकुंठस्यामलात्मनः ययुर्वैकुंठनिलयंसर्वलोकनमस्कृतं १३

एमोजोवीर्यं दिशस्तिमिरयंस्तमोव्याप्ताःकुर्वन् १० दितेःकुचेष्टितंज्ञात्वाप्रहस्य देवानांयेशब्दाविज्ञप्ति ६६
वाक्यानि तेषांगोचरोविषयभूतः प्रत्यभाषत ११ युष्मत्सकाशात्पूर्वजाताः १२

तंवर्णयतिवसंतीत्यादिद्वादशभिः वैकुंठस्यहरेरिवमूर्तिर्येषांते निमित्तंफलंननिमित्तंप्रवर्तकंयस्मि
न्निष्कामेनधर्मेणाराधितवंतः १४ शब्दगोचरः वेदांतैकवेद्यः विरजंसत्त्वंमूर्तिंविष्टभ्यधृत्वा वृषःधर्ममू
र्तिःस्वानांनोस्मान् १५ तत्रत्यंवनंविशिनष्टि यत्रेतित्रिभिः सर्वेषुऋतुषुश्रीःपुष्पादिसम्पद्येषांतैः १६ चरिता

वसंतियत्रपुरुषाःसर्वेवैकुंठमूर्तयः येनिमित्तनिमित्तेनधर्मेणाराधयन्हरिं १४ यत्रचाद्यः
पुमानास्तेभगवान्शब्दगोचरः सत्त्वंविष्टभ्यविरजंस्वानांनोमृडयन्वृषः १५ यत्रनैःश्रेयसंना
मवनंकामदुघैर्द्रुमैः सर्वर्तुश्रीभिर्विभ्राजत्कैवल्यमिवमूर्तिमत् १६ वैमानिकाःसललनाश्च
रितानियत्रगायंतिलोकशमलक्षपणानिभर्तुः अंतर्जलेनुविकसन्मधुमाधवीनांगंधेनखं
डितधियोप्यनिलंक्षिपंतः १७ पारावतान्यभृतसारसचक्रवाकदात्यूहहंसशुकतित्तिरिबर्हिणांयः
॥ कोलाहलोविरमतेचिरमात्रमुच्चैर्भृंगाधिपेह

श्रीभागवतटीका २१

३

निचरित्राणि भर्तुःप्रभोःअनुविकसन्मधुःमकरंदःत
स्मिन्माधव्योवासंत्योलताः यद्वाअनुविकसन्मधवःप्रसरन्मकरंदाः माधव्योमधुकालीनाःसुमनसस्तासां
गंधेन खंडिताविक्षिताधीर्येषां तेपितद्गंधप्रापकमनिलंक्षिपंतः तिरस्कुर्वंतोगायंति अनेनभगवत्पार्षदा
नांनिरतिशयविषयसुखेपिभजनानंदासक्तिर्दर्शिता १७ अन्यभृताःकोकिलाःदात्यूहाःचातकाःअविरमा

श्री॰
भा॰ टी॰
६८
67

त्रं विरमति अनेन तत्रत्यपक्षिणामपि हरिकथाश्रवणादिपरमानंदो दर्शितः १८ मंदारपारिजातौ सुर
र्ममश्चनिर्द्वंद्वःसमदृक्स्वदृक् प्रत्यक्प्रशांतधीर्धीरःप्रशांतोर्मिरिवोदधिः ४४ वासुदेवेभगवति
सर्वज्ञेप्रत्यगात्मनि परेणभक्तिभावेनलब्धात्मामुक्तबंधनः ४५ आत्मानंसर्वभूतेषुभगवंतमव
स्थितं अपश्यत्सर्वभूतानिभगवत्यपिचात्मनि ४६ इच्छाद्वेषविहीनेनसर्वत्रसमचेतसा भगव
द्भक्तियुक्तेनप्राप्ताभागवतीगतिः ४७ इतिश्रीभागवतेतृतीयस्कंधेचतुर्विंशोध्यायः २४

परहिताधीर्यस्य ४४ तदेवंविधिकल्पितोपाधिनिवृत्तिमुक्त्वापरमेश्वरपदप्राप्तिमाह वासुदेवइतित्रिभिः
प्रतीचोजीवस्यात्मनिवलब्ध आत्माचित्तंयेन यतोमुक्तंबन्धनमहंकारोयस्य लब्धात्मतामेवाहात्मानमिति
४६ तदेवंतेनभागवतीगतिः प्राप्ता सएवतांगतिंप्राप्तइति ४७ इतितृतीयेचतुर्विंशः २४

श्री
भा॰ टी॰
११२
112

पंचविंशेजनन्यात्मएशेवन्धविमोचनं आदावाह परंभक्तिलक्षणांकपिलः स्मृतः कपिलेनार्पितामात्रेशप्रभावनि
यंत्रितायोगमाणिक्यमंजूषास्फुटमुद्घाट्यतेधुना उक्तानुवादएर्वकंकापिलेयोगंपृच्छति कपिलइतित्रिभिः
तत्वानांसंख्यातागणकः सांख्यप्रवर्तकइत्यर्थः अतएवस्वयंजात आत्मप्रज्ञप्तये आत्मतत्वज्ञापनायः १ पुंसामथे
वर्ष्मणः वृद्धस्य उत्तमस्येत्यर्थः सर्वयोगिनांमध्येवरिमाणः वरस्यभावोवरिमा भवितृप्रधानोयंनिर्देशः वरिष्ठस्ये

शौनकउ॰ कपिलस्तत्वसंख्याताभगवानात्ममायया जातःस्वयमजःसाक्षादात्मप्रज्ञप्तयेनृणां १
नत्वस्यवर्ष्मणःपुंसांवरिमाःसर्वयोगिनां विश्रुतौश्रुतदेवस्यभूरितृप्यंतिमेसवः २ यद्यद्विधत्तेभग
वान्स्वच्छंदात्मात्ममायया तानिमेश्रद्दधानस्यकीर्तन्यान्यनुकीर्तय ३ सूतउ॰ द्वैपायनसखस्त्वेवंमैत्रे
योभगवांस्तथा प्राहेदंविदुरंप्रीतआन्वीक्षिकींप्रचोदितः ४ मैत्रेयउ॰ पितरिप्रस्थितेरण्यंमातुःप्रियचि ५
कीर्षया तस्मिन्बिन्दुसरेवात्सीद्भगवान्कपिलःकि ६

त्यर्थः यद्वा परीयस्त्वादित्यर्थः विश्रुतौकीर्तौ अस ॥
वइंद्रियाणि भूरिस्खलेननतृप्यंति श्रुतेनश्रवणेनदीव्यतिद्योततेइतितथातस्य यद्वा भूरिवहुशः श्रुतोदेवोयेन
तस्यापिमेअसवइतिसंबंधः २ स्वानांछंदेनेच्छयात्मादेहोयस्यसः यद्यत्कर्मविधत्ते तानितानिकर्माणिकीर्तना॰
र्हाणएनुकीर्तय ३ यथात्वंमांप्रचोदयसिएवंप्रचोदितःसन् तथातत्वप्रज्ञानुसारेणआन्वीक्षिकामाविद्यायां ४

विंदुसरोविंदुसरसि ५ ॥

११२

112A

विंडमरभि तत्त्वमार्गस्याग्रेपदंदर्शयतीतितथा एषामानवितेगर्भप्रविष्टइत्यादिधातुर्वचः ९ असता ।
मिंद्रियाणांतर्पणात् विषयाभिलाषान्निर्विण्णाश्रांतास्मि येनसंभाव्यमानेनप्रर्थ्यमानेन ७ पारंगमयः ।
तीतिपारंगत्वमेवश्रेष्टंचक्षुर्मयालब्धं त्वदनुग्रहाज्जन्मनामंतेभाव्येसति ८ तमुपंचयति यइति सभग
तमासीनमकर्माणंतत्त्वमार्गाग्रदर्शिनं स्वसुतंदेवहूत्याहधातुःसंस्मरतीवचः ९ निर्विण्णाति
तरांभूमन्नसदिंद्रियतर्पणात् येनसंभाव्यमानेनप्रपन्नान्धंतमःप्रभो ७ तस्यत्वंतमसोंधस्य दुष्पारस्या
द्यपारगं सच्चक्षुर्जन्मनामंतेलब्धंमेत्वदनुग्रहात् ८ यआद्योभगवान्पुंसामीश्वरोवैभवान्किल
लोकस्यान्धतमोन्धस्यचक्षुःसूर्यइवोदितः ९ अथमेदेवसंमोहमपाक्रष्टुंत्वमर्हसि योवग्रहोहं
ममेतीत्येतस्मिन्योजितस्त्वया १० तंत्वागताहंशरणंशरण्यंस्वभृत्यसंसारतरोःकुठारम् जिज्ञा
सयाहंप्रकृतेःपुरुषस्यनमामिसद्धर्मविदांवरिष्टं ११ मैत्रेयउ० इतिस्वमातुर्निरवद्यमीप्सितंनि
शम्यपुंसामपवर्गवर्धनं धियाभिनंद्यात्मवतांसतांगतिर्वभाषईषत्स्मितशोभिताननः १२ सिद्धमानसंयस्य ९
वांश्चतत्त्वप्रदर्शितोयथासूर्यः ९ अपाक्रष्टुमपनेतुं कोसौसंमोहस्तमाह एतस्मिन्देहादौ त्वयैवयोजितो
योहंममेत्यवग्रहआग्रहः द्वितीयइतिशेषःस्तत्कार्यरागादिग्रहणार्थः १० प्रकृतेःपुरुषस्यजिज्ञासया
त्वामहंशरणंगतासती नमामीत्यन्वयः कुठारंछेत्तारं ११ अपवर्गवर्धनंमोक्षेरतिजनकं ईषत्स्मितेनशो

अध्यात्मिकआत्मनिष्ठः यत्रयस्मिन् १३ सर्वांगेनैपुणं चित्तसंयमादि १४ तत्रसर्वांगनैपुण्यंचित्तसंयमाधी
नमिति दर्शयन्नाह चेतइति अस्यात्मनोजीवस्य गुणेषुविषयेषु पुंसिपरमेश्वरे वाशहस्तशब्दार्थे १५
१

श्रीभगवानुः योगआध्यात्मिकः पुंसांमतोनिःश्रेयसायमे अत्यंतोपरतिर्यत्रदुःखस्यचसुखस्य
च १३ तमिमंतेप्रवक्ष्यामियमवोचंपुरानघे ऋषीणांश्रोतुकामानांयोगंसर्वांगनैपुणं १४ चेतः
खल्वस्यबंधायमुक्तयेचात्मनोमतं गुणेषुसक्तंबंधायरतंवापुंसिमुक्तये १५ अहंममाभिमा
नोत्थैःकामलोभादिभिर्मलैः वीतंयदामनःशुद्धमदुःखमसुखंसमं १६ तदापुरुषआत्मानं
केवलंप्रकृतेःपरं निरंतरंस्वयंज्योतिरणिमानमखंडितं १७ ज्ञानवैराग्ययुक्तेनभक्तियुक्तेन
चात्मना परिपश्यत्युदासीनंप्रकृतिंचहतौजसं १८ नयुज्यमानयाभक्त्याभगवत्यखिलात्म
नि सदृशोस्तिशिवःपंथायोगिनांब्रह्मसिद्धये १९
यथाचित्तसंयमेपुरुषार्थसिद्धिस्तद्दर्शयति अहमितित्रिभिः मलैर्वीतंविरहितंयदाशुद्धंमनोभवति मनः
शुद्धेर्लोपकमाह्दुःखमिति १६ निरंतरंनिर्भेदमणिमानंसूक्ष्ममखंडितमपरिच्छिन्नं १७ हतौजसंती
व्रबलां १८ मनः शुद्धौचभक्तिरेवांतरंगसाधनमित्याह नेति १९ ११३

113A

अस्य सर्वस्यापि मत्संगो मूलमित्याह प्रसंगमिति अपावृतं निरावरणं २० साधूनां लक्षणमाह तितिक्षव इति चतुर्भिः साधवः शास्त्रानुवर्तिनः साधुशीलं भूषणं येषां २१ २२ तपंति तापा आध्यात्मिकादयो न तपंति न तापयंति कुतो मद्गतं चेतो येषां तान् ये तापैर्नाभिभूयंते ते साधव इत्यर्थः २३ २४ सत्संगस्य फलमाह

प्रसंगमजरं पाशमात्मनः कवयो विदुः स एव साधुषु कृतो मोक्षद्वारमपावृतं २० तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनां अजातशत्रवः शांताः साधवः साधुभूषणाः २१ मय्यनन्येन भावेन भक्तिं कुर्वंति ये दृढां मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबांधवाः २२ मदाश्रयाः कथा मृष्टाः शृण्वंति कथयंति च तपंति विविधास्तापा नैतान्मद्गतचेतसः २३ त एते साधवः साध्वि सर्वसंगविवर्जिताः संगस्तेष्वथ ते प्रार्थ्यः संगदोषहरा हि ते २४ सतां प्रसंगान्मम वीर्यसंविदो भवंति हृत्कर्णरसायनाः कथाः तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति २५

तामुपपादयति सतामिति वीर्यस्य सम्यग्वेदनं यासु ताः वीर्यसंविदः हृत्कर्णयो रसायनाः सुखदाः तासां जोषणात्सेवनात् अपवर्गोऽविद्यानिवृत्तिर्वर्त्म यस्मिंस्तस्मिन्हरौ प्रथमं श्रद्धा ततो भक्तिरनुक्रमिष्यति क्रमेण भविष्यतीत्यर्थः २५

श्री॰ भा॰ त॰ ११४ ततःकिमतस्त्राह भक्तेति ममरचनायामरूपादिलीला तस्याअनुचिंतयायाभक्तिस्तयापैंद्रियात्स्वाज्ञातवि
रागःसन् दृष्टश्रुतादैहिकामुष्मिकात् ततोयत्नउद्युक्तःसन् चित्तस्यग्रहणेयतिष्यति ऋजुभिर्भक्तिप्रधानत्वा
दनायासैः २६ तदेवंप्रकृतेर्गुणानामसेवया ज्ञानादिभिश्चायंजीवः इहैवदेहेमामवरुन्धेप्राप्नोति २७ का

114

भक्त्यापुमान्जातविरागऐंद्रियाद्दृष्टश्रुतान्मद्रचनानुचिंतया चित्तस्ययत्तोग्रहणेयोगयुक्तोयति
ष्यतेऋजुभिर्योगमार्गैः २६ असेवयायंप्रकृतेर्गुणानांज्ञानेनवैराग्यविजृंभितेन योगेनमय्यर्पित
याचभक्त्यामांप्रत्यगात्मानमिहावरुंधे २७ देवहूतिरु॰ काचित्त्वय्युचिताभक्तिःकीदृशीममगो
चरा ययापदंतेनिर्वाणमंजसान्वाश्रवाम्यहं २८ योयोगोभगवद्बाणोनिर्वाणात्मंस्त्वयोदितः की
दृशःकतिचांगानियतस्तत्त्वावबोधनं २९ तदेतन्मेविजानीहियथाहंमंदधीर्हरे सुखंबुध्येयदु
र्बोधंयोषाभवदनुग्रहात् ३०

चिदिति कास्विदित्यर्थः उचितायोग्या तत्रापिममस्त्रियाः
कीदृशीगोचरायोग्या निर्वाणंमोक्षात्मकं तवपदंस्वरूपं अन्वाश्रवैअन्वश्नुवाम्यहंपाठः अनुअनंतरमेव
सर्वात्मना प्राप्स्यामि अंजसात्वितिपाठेअहंत्वितिसंबंधः २८ भगवद्बाणोयोभगवंतंलक्ष्यीकरोतीत्यर्थः ११४
यतोयस्माद्योगात् २९ विजानीहिविशेषेणज्ञापय सुखमनायासेन ३०

114A

इत्थं मातुरर्थं प्रयोजनं विदित्वा जातस्नेहस्तत्वेदेहतः यत्र यस्मात्तत्वाद्देहेनाविर्भूतः तत्वाम्नायंते अनुक्रमं
तेयस्मिन् किंतद्यत्सांख्यंप्रवदंतितत्प्रोवाच भक्तिवितानंचयोगंच ३१ काचित्त्वय्युचिताभक्तिरितिपृष्टाउत्तमा
भक्तिंलक्षयति गुणानांविषयाणांलिंगंयतेज्ञायंते यैस्तेषांदेवानांद्योतनात्मकानामिंद्रियाणांतदधिष्ठातॄणांवा स
त्वेसत्वश्रृतैर्हरावेव यावृत्तिःसाभक्तिःसिद्धेर्मुक्तेरपिगरीयसीसत्वनरेणान्वयः कथंभूता अनिमित्तानिष्कामास्वाभा

मैत्रेयः विदित्वार्थंकपिलोमातुरित्थंजातस्नेहोयत्रतन्वाऽभिजातः तत्वाम्नायंयत्प्रवदंतिसांख्यंप्रोवाच
वैभक्तिवितानयोगं ३१ श्रीभगवानुः देवानांगुणलिंगानामानुश्रविककर्मिणां सत्वएवैकमनसोवृत्तिः स्वा
स्वाभाविकीतुया ३२ अनिमित्ताभागवतीभक्तिःसिद्धेर्गरीयसी जरयत्याशुयाकोशंनिगीर्णमनलोयथा
३३ नैकात्मतांमेस्पृहयंतिकेचिन्मत्पादसेवाभिरतामदीहाः येन्योन्यतोभागवताःप्रसज्यसभाजयंतेमम भाविकीतुया ३८

विकीअप्रयत्नसिद्धा तेषामेवंविधत्वेहेतुमाह गुरोरुच्चारणमनुश्रूयतेइत्यनुश्रवोवेदः तद्विहितमानुश्रविकं तदे
वकर्मयेषामतएवैकमेकरूपमविकृतंमनोयस्यपुंसः शुद्धसत्वस्येत्यर्थः मुक्तिरप्रासंगिकीभवत्येवेत्याह याभक्तिःको
शंलिंगशरीरंजरयतिनाशयति स्वप्रयत्नंविनैवसिद्धौदृष्टांतः निगीर्णंभुक्तमन्नंतमनलोजाठरोयथाजरयति ३२ ३३
भक्तेर्गरिष्ठत्वमेवोपपादयति नैकात्मतायामितिपंचभिः एकात्मतांसायुज्यंमोक्षं मदर्थमीहाःक्रियायेषांप्रसज्य आ

सविकृता योरव्यानिचानि ३८

श्री॰ प्रसन्नानि वक्त्रारुणानि लोचनानि येषु तैर्मद्रूपैः साकं सह नित्यं परमेश्वरानुभवसुखं भक्तावधिकमि
भा॰तृ॰ तिभावः ३५ आत्मानन्दस्त्वव स्वयंभावी स्यात् तैरिति दर्शनीया मनोहरा अवयवा मुखनेत्रादयो येषु तैः
११५ हृतात्मा चित्तं येषां हृता आकृष्टाः प्राणाश्चेन्द्रियाणि येषां तान् भजतः अनिच्छतः इच्छादीनानपि अ
115 ण्वीं गतिं मुक्तिं प्रयुङ्क्ते प्रापयति कैः साधनैः हृतात्मानः उदारैर्विलासादिभिः तत्र विलासो लीला वाम

पश्यंति ते मे रुचिराण्यंब सन्तः प्रसन्नवक्त्रारुणलोचनानि रूपाणि दिव्या
निवरप्रदानि साकं वाचं स्पृहणीयां वदंति ३५ तैर्दर्शनीयावयवैरुदारवि
लासहासेक्षितवामसूक्तैः हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो मेग
= ण्वीं तिमण्वीं प्रयुंक्ते ३६ अथो विभूतिं मम मायाविनस्तामैश्वर्यमष्टांगमनुप्र
वृत्तम् श्रियं भागवतीं वास्पृहयंति भद्रां परस्य मे तेश्नुवते तु लोके ३७

मनोहरं सूक्तं मधुरभाषणं ३६ विभक्त्याधिक्यं च तत्राधिकमित्याह अथो अविद्यानिवृत्त्यनंतरं विभूतिं स
त्यलोकादिगतां भोगसंपत्तिं अणिमाद्यष्टांगमैश्वर्यमनुप्रवृत्तं भक्तिमनु स्वत एव प्राप्तमपि भागवतीं च १२५
श्रियं वैकुंठस्थां संपत्तिमस्पृहयंति तेयद्यपि नस्पृहयंतीत्यर्थः तथापि ते मे लोके वैकुंठे अश्नुवते प्राप्नुवंत्येव ३७

नन्वेवंतर्हिलोकत्वाविशेषात्स्वर्गादिवद्भोक्तृभोग्यानांकदाचिद्विनाशःस्यात्तत्राह हेशांतरूपे यद्वा शांतंशुद्धं
रूपंसत्वंतद्रूपे वैकुंठेमत्पराःकदाचिदपिननंक्ष्यंतिभोग्यहीनानभवंति अनिमिषोमेहेतिर्मदीयंकालचक्रंच नो
लेढितान्नग्रसति तत्रहेतुः येषामिति सुतवत्स्नेहविषयः सखेवविश्वासास्पदं गुरुरिवोपदेष्टा सुहृदिवद्धित
कारीइष्टंदैवमिवपूज्यः एवंसर्वभावेनमांयेभजंतितान्मदीयंकालचक्रंनग्रसतीत्यर्थः ३८ एवंभूतानांतुभक्तियुक्तो

नकर्हिचिन्मत्पराःशांतरूपेनंक्ष्यंतिनोनिमिषोलेढिहेतिः येषामहंप्रियआत्मासुतश्चसखागुरुः
सुहृदोदैवमिष्टं ३८ इमंलोकंतथैवामुमात्मानमुभयायिनं आत्मानमनुयेचेहयेरायःपशवोगृहाः
३९ विसृज्यसर्वानन्यांश्चमामेवंविश्वतोमुखं भजंत्यनन्ययाभक्त्यातान्मृत्योरतिपारये ४० नान्यत्र
मद्भगवतःप्रधानपुरुषेश्वरात् आत्मनःसर्वभूतानांभयंतीव्रंनिवर्तते ४१ मद्भयाद्वातिवातोयंसूर्य

नभक्तेभ्योददामीत्याह इममितिद्वाभ्यां उभ स्तपतिमद्भयात् वर्षतीन्द्रोदहत्यग्निर्मृत्युश्चरतिमद्भयात्
यायिनंलोकद्वयगामिनंआत्मानंसोपाधिकं आत्मानमनुपुत्रकलत्रादयः येचयस्माद्धेतोरायःधनानि ३९ अ
न्यांश्चपरित्यज्य मृत्योःसंसारादतिपारयेतितारयामि ४० अभक्तानांतुकथंचिदपिनमोक्षइत्याह मद्भगवतो
न्यत्रभगवतोमत्तोविना सर्वभूतानामात्मनः भगवत्त्वादिविशेषणत्रयेण सामर्थ्यंनिरपेक्षत्वंहितकारित्वंचोक्तं
४१ ऐश्वर्यंस्फुटयतिश्रुतिश्च भीषास्माद्वातःपवतेभीषोदेतिसूर्यःभीषास्मादग्निश्चेंद्रश्चमृत्युर्धावतिपंचम

श्री॰
भा॰टी॰
११९
116

मद्भजनादेवमोक्षस्तत्रसदाचारंप्रमाणयति ज्ञानेति ४३ उपसंहरति एतावानिति मय्यर्पितंसन्मनः
स्थिरंभवतीत्यर्थः एतावानेव ४४ इतितृतीयेपंचविंशः २५ षड्विंशेतुप्रकृत्यात्मविवेकायोपवर्ण्यते
सांख्येनसर्वभावानांजन्मलक्षणभेदतः धात्रापुत्रायययत्प्रोक्तंतत्तेमिश्राप्तस्तेनयन् मात्रेसांख्यंतदाध्यात्म
प्राधान्येनात्रतत्ववित् तत्त्वाम्नायंयत्प्रवदंतिसांख्यमित्यत्र सांख्यंभक्तियोगश्चेतित्रयमुपदिष्टं तत्रभक्ति

ज्ञानवैराग्ययुक्तेनभक्तियोगेनयोगिनः क्षेमायपादमूलंमेप्रविशंत्यकुतोभयं ४३ एतावानेव
लोकेस्मिन्पुंसांनिःश्रेयसोदयः तीव्रेणभक्तियोगेनमनोमय्यर्पितंस्थिरं ४४ इतिश्रीभागवते
महापुराणेतृतीयस्कंधेपंचविंशोध्यायः २५ श्रीभगवानुवाच अथतेसंप्रवक्ष्यामितत्वानांलक्ष
णंपृथक् यद्विदित्वाविमुच्येतपुरुषःप्रकृतेर्गुणैः १ ज्ञानंनिःश्रेयसार्थायपुरुषस्यात्मदर्श
नम् यदाहुर्वर्णयेतत्तेहृदयग्रंथिभेदनम्

पूर्वोक्तेदानींसांख्यमाहाथेति १ ननुमुक्तिरात्मज्ञानादेवनतत्त्वलक्षणज्ञानात् तमेवविदित्वातिमृत्यु
मेतीतिश्रुतेः अतआह ज्ञानमिति आत्मदर्शनरूपंज्ञानमतएव हृदयग्रंथिभेदनमहंकारनिवर्तकं प्र
कृतिवियोगोनिःश्रेयसमितिसांख्याः निःश्रेयसप्रयोजनाययदाहुस्तत्तेवर्णयामि तत्वलक्षणज्ञानादेव
विविक्तात्मज्ञानंभवतीतिभावः २ ॥ ११९

116A तत्र पुरुषं लक्षयति अनादिरिति आत्मैव पुरुषः पुरि पुरि शेते इति कोऽसावात्मा प्रत्यक् प्रतिलोमं धाम ते-
जः स्फूर्तिर्यस्य क्षणिकपक्षं व्यावर्तयति अनादिरिति स एष प्रकृतिं सूक्ष्मामिति तथा चोक्तं सांख्ये सौक्ष्म्यात्
तदनुपलब्धिर्नाभावात्कार्यतस्तदुपलब्धेः महदादि तच्च कार्यं प्रकृतिविरूपं सरूपं चेति त्रिगुणत्वादिना तत्सारूप्यं
बुद्ध्यादेर्हेतुमत्त्वं प्रकृतिरहेतुमती इति वैरूप्यं सांसारिकपक्षं व्यावर्तयति प्रकृतेः परः अन्योऽसंगः ज्ञानादिगुण-
वत्त्वं वारयति निर्गुणः ज्ञानं तु तस्य स्वरूपमेव मीमांसकाद्यभिमतं ज्ञानविषयत्वं वारयति स्वयंज्योति अनेनैव
प्राभाकराभिमतं ज्ञानाद्यारंभकत्वेन स्फुरणम् अपि निरस्तं स्वयंज्योतिष्ट्वे हेतुः विश्वं येन समन्वितं प्रकाशते इति श्री-

अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः प्रत्यग्धामा स्वयंज्योतिर्विश्वं येन समन्वितम् ३
स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः यदृच्छयैवोपगतामभ्यपद्यत लीलया ४

धः एतैरेव हेतुभिः पुरुषस्य प्रकृतेः परत्वमपि सिद्धं ३ अत्रावरणविक्षेपशक्तिभेदेन प्रकृतिर्द्विविधा तत्रा-
वरणशक्त्या सैव जीवोपाधिरविद्या विक्षेपशक्त्या सैव माया पारमेश्वरी पुरुषश्च जीवेश्वररूपेण द्विविधः तत्र यः प्र-
कृत्यविवेकेन संसरति स जीवः यस्तु प्रकृतिं वशीकृत्य विश्वसृष्ट्यादि करोति स परमेश्वरः शरीरादि कार्योपाधिर-
यं जीवः कारणोपाधिरीश्वरः सर्वेशो यद्वशे माया स जीवो यस्तयार्दितः तत्र प्रकृत्यविवेकेन जीवस्य संसारप्रकार-
माह स एष इति पंचभिः सूक्ष्मामव्यक्तां दैवीं देवस्य विष्णोः शक्तिं लीलयोपगतां यदृच्छयैवाभिपद्यतेत्यन्व-

श्री तस्य तीत्वमाह गुणैरिति ज्ञानं गूहति आवृणोतीति ज्ञानगूहा तया तथा च श्रुतिः अजामेकां लोहितशुक्ल
कृष्णां बह्वीः प्रजाः जनयंतीं सरूपां अजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्यः इति मुमुक्षुरा
भा.टी. त्मानं विस्मृतवान् ५ पराभिध्यानं प्रकृत्यध्यासः अन्यस्मिन्नन्यधर्मावभासोध्यासः अन्यधर्माध्यासस्तेन प्रकृ
११७ तेर्गुणैः कर्मसु क्रियमाणेषु कर्तृत्वमात्मनि मन्यते ६ तदिति कर्तृत्वमननमेवास्य पुरुषस्य साक्षिमात्रत्वाद
117 कर्तुरेवमतः कर्मभिर्बंधः ईशस्य स्वतंत्रस्यैव कर्मबंधकृतं भोगे पारतंत्र्यं निर्वृतात्मनः सर्वात्मकस्यैव सं

गुणैर्विचित्राः सृजंतीं सरूपाः प्रकृतिं प्रजाः विलोक्य मुमुहे सद्यः सइह ज्ञानगूहया ५ एवं पराभिध्यानेन
कर्तृत्वं प्रकृतेः पुमान् कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ६ तदस्य संसृतिर्बंधः पारतंत्र्यं च तत्कृते
भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः ७ कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः भोक्तृत्वे सुखदुः
खानां पुरुषं प्रकृतेः परं ८

सृतिर्जन्ममरणप्रवाहः प्रकृत्यविवेककृतमेतत्सर्वं भवतीत्यर्थः ७ ननु
चैतन्यसामानाधिकरण्येनैव कर्तृत्वादिप्रतीतेः तस्यैव तदंगीक्रियतां नेत्याह कार्यं शरीरं कारणमिंद्रियं कर्तृदे
वतावर्गः तद्भावापत्तौ पुरुषस्य प्रकृतिं कारणं विदुः कूटस्थस्य तस्य विकाराभावात् प्रकृतिपरिणामश्च तद्देहाद्य
हंकारकृतमेव कर्तृत्वादिकमित्यर्थः भोक्तृत्वे तु पुरुषं कारणं विदुरित्यस्यायं भावः यद्यप्यहंकारगतमेव कर्तृत्वा ११७
दिकं भोक्तृत्वं च तथापि विकारस्य जडत्वमानत्वादुपाधिप्राधान्यं भोगस्य चिद्रसात्वात्तदुपहितप्राधान्यमिति ८

117A

तदेवं संसारिणं पुरुषं तद्धेतुं प्रकृतिं च ज्ञात्वेदानीं जगत्कारणमीश्वरं तत्त्वतिं च पृच्छति प्रकृतेरिति अस्य वि
श्वस्य सदसद्रूपस्य लक्ष्यं लक्ष्मं च कार्यं यदात्मकं तयोः प्रकृतिपुरुषयोः ९ तत्र प्रकृतिं लक्षयति यत्प्रधानं तदेव
प्रकृतिं प्राहुः किं तत्प्रधानं सत्वतो विशेषं सत्वरजस्तमसां साम्यावस्थेति वचनात् विशेषवत् विशेषाणां
महदहंकारकार्याणामाश्रयः तर्हि किं ब्रह्मन त्रिगुणं सुखदुःखमोहात्मयोगुणाः अनेन सत्वादीनामात्म

देवव्रतिरुवाच प्रकृतेः पुरुषस्यापि लक्षणं पुरुषोत्तम बुद्धिकारणयोरस्य सदसद्वयदात्मकं ९
श्रीभगवानुवाच यत्तत्रिगुणमव्यक्तं नित्यं सदसदात्मकं प्रधानं प्रकृतिं प्राहुरविशेषं विशेष
वत् १ पंचभिः पंचभिर्ब्रह्मचतुर्भिर्दशभिस्तथा एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः ११
महाभूतानि पंचैव भूरापोग्निर्मरुन्नभः तन्मात्राणि च तावंति गंधादीनि मतानि मे १२ इंद्रियाणि
दशश्रोत्रं त्वग्दृग्रसननासिकाः वाक्करौ चरणौ मेढ्रं पायुर्दशम उच्यते १३

गुणत्वं निरस्तं किं महत्तत्वादि न अव्यक्तमकार्यं महत्तत्वं कार्यमिति भावः किं कालादि न सदसदात्म
कं कार्यकारणरूपं किं जीवः प्रकृतिं न नित्यं प्रधानमित्यर्थः १० अन्येषां तत्त्वानां लक्षणं वक्तुं तानि गणय
ति पंचभिरित्यादि संख्याभेदेन एतच्चतुर्विंशतिकमेतानि चतुर्विंशतिर्यस्मिन्गणे तं गणं प्राधानिकं प्रधा
न कार्यात्मकं ब्रह्मविदुः ११ एतद्विवृणोति महाभूतानीति त्रिभिः तावंति पंचैव १२ १३

श्री॰ संकल्पविकल्पात्मकंमनः निश्चयात्मिकाबुद्धिः अंतरात्मकमंतःकरणं लक्षणरूपयाध्यवच्छेदिकया मनः

भा॰तृ॰ सोवृत्तिःसंकल्पः बुद्धेर्वृत्तिर्निश्चयः अहंकारस्याभिमानं १४ यावान्मयाप्रोक्तः एतावानेव संख्यातोगणितस्त

११८ त्त्वैः कालेतमत्तद्रूपमाहुर्यःकालःसपंचविंशकः प्रकृतेरेवावस्थाविशेषइत्यर्थः यद्वा यःपुरुषइतिप्रसिद्धः

118 सकालःपंचविंशकः १५ एकेत्वपौरुषंपुरुषस्येश्वरस्य प्रभावंप्रभावलक्षणंविक्रमंकालमाहुः तमेवकालंदे

धापलक्षयति यतोभयंभवति कस्यप्रकृतिमीयुषः प्राप्तस्य अतएवदेहेआत्माभिमानिनः अहमेवमत्त इत्यहंका

मनोबुद्धिरहंकारश्चित्तमित्यंतरात्मकं चतुर्धालक्ष्यतेभेदोवृत्त्यालक्षणरूपया १४ एतावानेवसंख्यातोब्रह्म

णःसगुणस्यह सन्निवेशोमयाप्रोक्तोयःकालःपंचविंशकः १५ प्रभावंपौरुषंप्राहुःकालमेकेयतोभयं अ

हंकारविमूढस्यकर्तुःप्रकृतिमीयुषः १६ प्रकृतेर्गुणसाम्यस्यनिर्विशेषस्यमानवि चेष्टायतःसभगवा

न्कालइत्युपलक्षितः अंतःपुरुषरूपेणकालरूपेणयोबहिः समन्वेत्येषसत्त्वानांभगवानात्ममायया १८

रेणाविमूढस्यकर्तृत्वेजीवस्य अनेनसंहारकत्वेनलक्षितः १६ सृष्टिहेतुत्वेनलक्षयति प्रकृतेरिति १७ कोसौभगवा

न्तमाह अंतःसर्वप्राणिनांयःपुरुषरूपेणनियंतृत्वेन समन्वेति सम्यक्तदधिकाररहितएवानुस्यूतोवर्तते बहिश्च

कालरूपेणैषभगवान् यद्वा यःपुरुषइतिप्रसिद्धःसकालःपंचविंशकःएकेतुपुरुषस्यप्रभावंकालमाहुःप्रभाव ११८

मेवलक्षणं यतइति पुरुषमेवकालत्वेहेतुः प्रकृतेरिति उभयथाविवक्षायांहेतुरेतदिति शेषंसमानं १८

118A

तदेवं प्रकृतेरष्टाविंशतिभेदाः जीवेश्वरयोरैक्यविवक्षयाऽतः पंचविंशतितत्त्वानि भवंति तयोर्भेदविवक्षायां
षड्विंशतिर्भवंति इदानीं तत्त्वानामुत्पत्तिपूर्वकं लक्षणान्याह एतान्यसंहत्येत्यतः प्राकृतेनेत्यंतेन चित्तस्यास्था
ति सर्वं लक्षणमाह चतुर्भिः देवात् जीवादृष्टात् क्षुभितात् धर्माद्गुणाः यस्यां योनौ अभिव्यक्तिस्थाने प्रकृतौ वी
र्यं चिच्छक्तिं सा प्रकृतिर्महत्तत्त्वमसूत महतः स्वरूपमाह हिरण्मयं प्रकाशबहुलं १९ विश्वमहंकारादिप्रपंच
मात्मगतं स्वस्मिन् सूक्ष्मरूपेण स्थितं व्यंजन्महत्तमोऽपिबत् कूटस्थालयविक्षेपस्वरूपः आत्मानं प्रस्वापयतितत्ता य
दैवात्क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान् अधत्त वीर्यं सासूत महत्तत्त्वं हिरण्मयं १९ विश्वमात्मग
तं व्यंजन्कूटस्थो जगदंकुरः स्वतेजसापिबत्तीव्रमात्मप्रस्वापनं तमः २० यत्तत्सत्त्वगुणं स्वच्छं शांतं भ
गवतः पदं यदाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकं २१ स्वच्छत्वमविकारित्वं शांतत्वमिति चेतसः वृ
त्तिभिर्लक्षणं प्रोक्तं यथापां प्रकृतिः परा २२ महत्तत्त्वादिकुर्वाणाद्भगवद्वीर्यसंभवात् क्रियाशक्तिरहंकारस्त्रि

विषः समष्टिगत २४

नात्मद्दिसर्गः २५ अहंकारस्योत्पत्तिसर्वकतात्त्वमाहस्वर्गः क्रियात्मक्षा
क्रियाश्रयः क्रियामक्तिः २६

विधः समष्टिगतं महत्तत्त्वं प्रकृतौ विलापयामासेत्यर्थः २ प्रसंगाच्चित्तस्य दोपासनमाह सर्वागमप्रसिद्धत्वमाह स्वच्छं
शांतं रागादिरहितं भगवतः पदमुपलब्धिस्थानं मतमेव वासुदेवाख्यं यदाहुः अयमर्थः अधिभूतरूपेण तस्यैव महानिति
संज्ञा अध्यात्मरूपेण चित्तमिति उपास्यरूपेण वासुदेव इति अधिष्ठाता तु तस्य क्षेत्रज्ञः एवमहंकारे संकर्षण उपास्यः रुद्रो
ऽधिष्ठाता मनसि अनिरुद्ध उपास्यश्चंद्रोऽधिष्ठाता बुद्धौ प्रद्युम्न उपास्यो ब्रह्माधिष्ठातेति ज्ञातव्यं २१ स्वच्छत्वं भगवद्बिंबग्राहि
त्वं अविकारित्वं लयविक्षेपराहित्यं अपां प्रकृतिः फेनतरंगादिरहितावस्था पराभूतसंसर्गात्प्राक्तनी सा यथा स्वच्छा शां

श्री॰
भा॰ टी॰
११९
119

त्रैविध्यमाह तस्य कार्यमाह यतो यस्मान्मनआदीनां भव उत्पत्तिः २४ तस्मिन्नुपास्यव्यूहमाह २५ कर्तृत्वं देव-
तारूपेण करणत्वमिंद्रियरूपेण कार्यत्वं भूतरूपेण शांतत्वादिकं तत्तत्कारणगुणत्रयभूतरूपेण २६ मनसउत्प
त्तिं स्वं च लक्षणमाह द्वाभ्यां संकल्पश्चिंतनं विकल्पो विशेषचिंतनं यस्य मनसः संकल्पविकल्पाभ्यां काम
संभवो वर्तते इति कामस्यावृत्तिः लक्षणत्वेनोक्ता न त्वप्रद्युम्नव्यूहो यतिस्तस्य संकल्पादिकार्यत्वाभावात् उ
वैकारिकस्तैजसश्च तामसश्च यतो भवः मनसश्चेंद्रियाणां च भूतानां महतामपि २४ सहस्रशिरसं
साक्षाद्यमनंतं प्रचक्षते संकर्षणाख्यं पुरुषं भूतेंद्रियमनोमयं २५ कर्तृत्वं करणत्वं च कार्यत्वं चेति ल
क्षणं शांतघोरविमूढत्वमिति वा स्यादहंकृतेः २६ वैकारिकाद्विकुर्वाणान्मनस्तत्त्वमजायत यत्सं
कल्पविकल्पाभ्यां वर्तते कामसंभवः २७ यद्विदुर्ह्यनिरुद्धाख्यं हृषीकाणामधीश्वरं शारदेंदीवरश्या
मं संराध्यं योगिभिः शनैः २८ तैजसात्तु विकुर्वाणाद्बुद्धितत्त्वमभूत्सति द्रव्यस्फुरणविज्ञानमिंद्रिया
णामनुग्रहः २९ संशयोथ विपर्यासो निश्चयः स्मृतिरेव च स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ३०
पास्यव्यूहस्यानिरुद्धस्योक्तेः २७ शरत्कालीननीलोत्पलवच्छ्यामं शनैः संराध्यं वशीकर्तुं योग्यं दुर्ग्रहत्वात् २८
बुद्धेरुत्पत्तिं स्वं च लक्षणमाह द्वाभ्यां हे सति द्रव्यस्फुरणविज्ञानमिति चित्तव्याहृत्यर्थमुक्तं इंद्रियाणाम
नुग्रह इति सविकल्पज्ञाने हृषीकाणामधीश्वर इति यदुक्तं तन्निर्विकल्पकज्ञाने २९ द्रव्यस्फुरणस्यैव प्रपं
चः संशयादिः विपर्यासो मिथ्याज्ञानं निश्चयः प्रमाणज्ञानं स्वापो निद्रा प्रमाणविपर्ययविकल्पनिद्रास्मृ

तत्पदशिपाजनकृत्तोक्तेः ३०

११९

119A ६८

इंद्रियाणामुत्पत्तिमाह तैजसानि तैजसादहंकारज्जातानि ज्ञानेंद्रियाणां वैकारिकत्वशंकानिवृत्त्यर्थमेवकारः द्विविधान्यपींद्रियाणि तैजसान्येवेत्यन्वयः तत्र हेतुः प्राणस्येति हि यस्मात्प्राणस्य क्रियाशक्तिः बुद्धेश्च विज्ञानशक्तिना अतः प्राणस्य तैजसत्वात् तत्क्रियाशक्तिमतामिंद्रियाणां तैजसत्वं तथा बुद्धेस्तैजसत्वात्तदीयज्ञानशक्तिमतामपींद्रियाणां तैजसत्वमित्यर्थः ३१ तन्मात्रोत्पत्तिश्चैकमाह

तैजसानींद्रियाण्येव क्रियाज्ञानविभागशः प्राणस्य हि क्रियाशक्तिर्बुद्धेर्विज्ञान
शक्तिता ३१ तामसाच्च विकुर्वाणाद्भगवद्वीर्यचोदितात् शब्दमात्रमभूत्तस्मान्नभः
श्रोत्रं तु शब्दगं ३२ अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिंगत्वमेव च तन्मात्रत्वं च नभसो ल
क्षणं कवयो विदुः ३३

शादिमहाभूतोत्पत्तिं तल्लक्षणं चाह पंचदशभिः श्रोत्रं तु शब्दगमित्यादिभिः विषयोत्पत्त्यनंतरं तत्संबंधमात्रं कथ्यते न तत्पत्तिः प्रागेवोत्पन्नत्वाच्छब्दं गच्छति प्राप्नोतीति शब्दगं ३२ शब्दस्य लक्षणमाह अर्थाश्रयत्वमर्थवाचकत्वं द्रष्टुर्लिंगत्वं कुड्यांतरितस्य वक्तुर्ज्ञापकत्वं तदुक्तं लिंगं यद्दृष्टदृश्ययोरिति नभसस्तन्मात्रत्वं शब्दस्य लक्षणमित्यन्वयः ३३

छिद्रदातृत्वमवकाशदातृत्वं बहिरंतर्व्यवहारास्पदत्वं आत्मामनः प्राणादीनांधिष्ण्यत्वमाश्रयत्वं नाड्यादिछि-
श्री॰ द्ररूपेणवृत्तिकार्यमेवलक्षणंवृत्तिलक्षणं एवमुत्तरत्रापि एकेनश्लोकेनतन्मात्रमहाभूतयोरुत्पत्तिः द्वितीयेनतन्मा
भा॰त॰ त्रलक्षणं तृतीयेनमहाभूतलक्षणमित्यनुसंधेयं ३४ कार्यात्मकस्पर्शस्यसंग्रहः सम्यक्ग्रहणं पुंस्त्वनियतलिं
१२॰ गत्वात् यद्वा स्पर्शस्यसंग्रहोयतोभवतीतिशेषः शब्दतन्मात्रादित्यादितन्मात्राणामुत्तरोत्तरान्वयार्थमुक्तं ३५
120

भूतानांछिद्रदातृत्वंबहिरंतरमेवच प्राणेंद्रियात्मधिष्ण्यत्वंनभसोवृत्तिलक्षणं ३४ नभसःशब्दतन्मात्रात्का
लगत्याविकुर्वतः स्पर्शोभवत्ततोवायुस्त्वक्स्पर्शस्यचसंग्रहः मृदुत्वंकठिनत्वंचशैत्यमुष्णत्वमेवच एतत्स्प
र्शस्यस्पर्शत्वंतन्मात्रत्वंनभस्वतः ३६ चालनंव्यूहनंप्राप्तिर्नेतृत्वंद्रव्यशब्दयोः सर्वेंद्रियाणामात्मत्वंवायोःक ब
र्माभिलक्षणं ३७ वायोश्चस्पर्शतन्मात्राद्रूपंदैवेरितादभूत समुत्थितंततस्तेजश्चक्षूरूपोपलंभनं ३८

स्पर्शत्वंस्वरूपलक्षणमित्यर्थः नभस्वतोवायोस्तन्मात्रत्वं ३६ चालनंवृक्षशाखादेः व्यूहनंमेलनंतृणादेः प्राप्तिः
संयोगः द्रव्यस्यगंधवतोघ्राणंप्रति तथाशैत्यादिमतःस्पर्शनंप्रति शब्दस्यश्रोत्रंप्रतिनेतृत्वं सर्वेंद्रियाणामा १२०
त्मत्वमुपोद्बलकत्वं कर्मणाकार्येणाभिलक्षणं भावेल्युट् कर्मैवाभिलक्षणमितिविग्रहेतुकरणे ३७ ३८

120A

द्रव्याकृतित्वं द्रव्यस्याकारसमर्पकत्वं गुणत्वाद्द्रव्योपसर्जनत्वप्रतीतिः शब्दस्य स्वातंत्र्येणैव प्रतीतिः स्प
र्शस्य तु द्रव्यस्य गंधादेरपि स्वातंत्र्येणैव प्रतीतिः रूपस्य त्वनेवमिति तस्मायं विशेष उक्तः व्यक्तिसंस्थात्वं द्रव्य
स्य या संस्थासन्निवेशः सैव संस्था यस्य द्रव्यपरिणामतया प्रतीतिरित्यर्थः तेजसस्तेजस्त्वमसाधारणत्वं ३९
द्योतनं प्रकाशनं पचनं तंडुलादेः क्षुच्च तृट्च अशना च पिपासा च तद्द्वारेण पानमदनं च ४० जिह्वा रसनेंद्रियं

द्रव्याकृतित्वं गुणता व्यक्तिसंस्थात्वमेव च तेजस्त्वं तेजसः साध्वि रूपमात्रस्य वृत्तयः ३९ द्योतनं पचनं पान
मदनं हिममर्दनं तेजसो वृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च ४० रूपमात्राद्विकुर्वाणात्तेजसो दैवचोदि
तात् रसमात्रमभूत्तस्मादंभो जिह्वा रसग्रहः ४१ कषायो मधुरस्तिक्तः कट्वम्ल इति नैकधा भौतिकानां
विकारेण रस एको विभिद्यते ४२ क्लेदनं पिंडनं तृप्तिः प्राणनाप्यायनोन्दनं तापापनोदो भूयस्त्वमंभसो
वृत्तयस्त्विमाः ४३ रसमात्राद्विकुर्वाणादंभसो दैवचोदितात् गंधमात्रमभूत्तस्मात्पृथ्वी घ्राणस्तु गन्धगः ४४

रसो गृह्यतेऽनयेति रसग्रहा यद्वा रसग्रहस्ततो भवतीति शेषः ४१ कषायादिषु लवणोऽपि द्रष्टव्यः भौतिकानां संस
र्गिद्रव्याणां स एको मधुर एव सन्नेवमनेकधा भिद्यते स रस इत्यर्थः ४२ क्लेदनमार्द्रीकरणं पिंडनं मृदादेः पिंडी
करणं तृप्तिदातृत्वं प्राणनं जीवनं आपोमयः प्राण इति श्रुतेः आप्यायनं तद्दौर्बल्यनिवर्तनं उन्दनं मृदुकरणं
उन्दनमिति पाठे स एवार्थः भूयस्त्वं कूपादावुद्धृतस्यापि पुनः पुनरुद्गमः ४३ गंधं प्राप्नोतीति गंधगः ४४

श्री॰ करंभोमिश्रगंधः यथाव्यंजनादीनांहिंग्वादिसंस्कारेण पूतिगंधिः दुर्गंधः सौरभ्यंकर्पूरादेः शांतःशतप॰
त्रादेः उग्रोलशुनादेःसंसर्गिणा द्रव्यावयवानांवैषम्याद्यएवंविभिद्यतेसगंधइत्यर्थः ४५ ब्रह्मणोभावनंप्र
भा॰ टी॰ तिमादिरूपेणाप्साकारतापादनं स्थानंजलादिविलक्षणतयानैरपेक्ष्येण स्थितिःधारणंजलाद्याधारत्वंसता
१२१ माकाशादीनांविशेषणंपरिच्छेदकत्वं सर्वेषांसत्वानांप्राणिनां तद्गुणानांचपुंस्त्वादीनामुद्भेदः परिणा

121

करंभपूतिसौगंध्यशांतोग्राम्लादिभिःपृथक् द्रव्यावयववैषम्याद्गंधएकोविभिद्यते ४५ भावनं
ब्रह्मणःस्थानंधारणंसद्विशेषणं सर्वसत्वगुणोद्भेदः पृथिवीवृत्तिलक्षणं ४६ नभोगुणविशेषो
र्थोयस्यतच्छ्रोत्रमुच्यते वायुर्गुणविशेषोर्थोयस्यतत्स्पर्शनंविदुः ४७ तेजोगुणविशेषोर्थोयस्य
तच्चक्षुरुच्यते अंभोगुणविशेषोर्थोयस्यतद्रसनंविदुः भूमेर्गुणविशेषोर्थोयस्यसघ्राणउच्यते ४८
परस्यदृश्यतेधर्मोह्यपरस्मिन्समन्वयात् अतोविशेषोभावानांभूमावेवोपलक्ष्यते ४९

मविशेषैःप्रकटीकरणं ४८ श्रोत्रादीनांशब्दादिग्राहकत्वमुक्तंतेषांचलक्षणंतदेवेत्याहपंचभिः नभसोगुणविशे
षःशब्दोयस्यार्थोविषयः ४७ ४८ गुणविशेषशब्दव्यावर्त्यंदर्शयति परस्येति परस्यकारणस्यधर्मःशब्दादिः अपर॰
स्मिन्कार्येवाय्वादौ कारणान्वयाद्दृश्यते अतोभावानामाकाशादीनांविशेषोगुणः सर्वोपिशब्दादिः भूमावेवोपलभ्य ११
तेतत्रतत्रान्वयात् जलादिषुयथान्वयमेवनसर्वः आकाशेत्वन्वयाभावादेकएवेति ४९

121A

एवंकारणोत्पत्तिमुक्त्वाकार्योत्पत्तिमाहस्तोर्थैः एतान्यसंहत्यामिलित्वायदास्थितानि तदाजगदादिरीश्वरःप्रा
विशत् सप्तेतिवैइतिप्राधान्याभिप्रायेणोक्तं प्रवेशस्तुसर्वेष्वपिविवक्षितएव ५० अनुविद्धेभ्यःक्षुभितेभ्यः य
स्मादंडादसौविराट् पुरुषउत्तिष्ठत् ५१ भगवतोरूपमितिपुरुषाभेदाभिप्रायेण ५२ तस्मिन्नध्यात्मादिविभागमा

एतान्यसंहत्ययदामहदादीनिसप्तवै कालकर्मगुणोपेतोजगदादिरुपाविशत् ५० ततस्तेनानु
विद्धेभ्योयुक्तेभ्योंडमचेतनं उत्थितंपुरुषोयस्मादुदतिष्ठदसौविराट् ५१ एतदंडंविशेषाख्यंक्र
मवृद्धैर्दशोत्तरैः तोयादिभिःपरिवृतंप्रधानेनावृतैर्बहिः ५२ यत्रलोकवितानोयंरूपंभगवतोहरेः
हिरण्मयादंडकोशादुत्थायसलिलेशयात् तमाविश्यमहादेवोबहुधानिर्बिभेदखं ५३ निरभिद्य
तास्यप्रथमंमुखंवाणीततोभवत् वाण्यावह्निरथोनासेप्राणोतोघ्राणएतयोः ५४ घ्राणाद्वायुर
भिद्येतामक्षिणीचक्षुरेतयोः तस्मात्सूर्योव्यभिद्येतांकर्णौश्रोत्रंततोदिशः ५५

हनवभिः उत्थायऔदासीन्यंविहायतमाविश्यअधिष्ठाय महांश्चासौदेवश्चखंछिद्रं ५३ वाण्यासहवह्निरभव
त् प्राविशत् नासेनिरभिद्येतांप्राणेनऊतःस्यूतः सन्घ्राणएतयोर्नासिकयोरभवदित्यनुषंगः ५४ घ्राणा
दनंतरंवायुश्च प्राणोत् इतिविशेषणंसर्वेंद्रियेष्वपिद्रष्टव्यंव्यभिद्येतामन्वभिद्येतामितिपाठद्वयेप्येकएवार्थः

ततोदिशप्रविशत ५५

श्री॰
भा॰ टी॰
१२२
122

आदिशब्देनकेशाः ५६ ५७ स्वराडिंद्रोहरिर्विष्णुः ५८ आसृतंजातं ५९ बुद्ध्यादिषुहृदयमेवाधिष्ठानं गि
रांपतिःब्रह्मा ६० चैत्तःतेत्रज्ञः ६१ अन्वयव्यतिरेकाभ्यांक्षेत्रज्ञंविविक्तंसर्वेषांपुनःप्रवेशमाह नवभिः ६२

निर्बिभिदविराजस्त्वग्रोमश्मश्र्वादयस्ततः ततओषधयश्चासन्शिश्नंनिर्बिभिदेततः ५६ रेतस्त
स्मादापआसन्निरभिद्यतवैगुदं गुदादपानोपानाच्चमृत्युर्लोकभयंकरः हस्तौचनिरभिद्येतांबलं
ताभ्यांततःस्वराट् पादौचनिरभिद्येतांगतिस्ताभ्यांततोहरिः नाड्योस्यनिरभिद्यंततताभ्योलोहितमा
भृतं नद्यस्ततःसमभवन्नुदरंनिरभिद्यत ५९ क्षुत्पिपासेततःस्यातांसमुद्रस्त्वेतयोरभूत् अथास्यहृदयं
भिन्नंहृदयान्मनउत्थितं मनसश्चंद्रमाजातोबुद्धिर्बुद्धेर्गिरांपतिः अहंकारस्ततोरुद्रश्चित्तंचैत्यस्ततोभ
वत् एतेह्यभ्युत्थितादेवानैवास्योत्थापनेशकन् पुनराविविशुःखानितमुत्थापयितुंक्रमात् वह्निर्वा
चामुखंभेजेनोदतिष्ठत्तदाविराट् ६२ अतिर्णीचक्षुषादित्योनोदतिष्ठत्तदाविराट् घ्राणेननासिकेवायु
र्नोदतिष्ठत्तदाविराट् श्रोत्रेणकर्णौचदिशोनोदतिष्ठत्तदाविराट् त्वचंरोमभिरोषध्योनोदतिष्ठत्तदावि
राट् ६४ रेतसाशिश्नमापस्तुनोदतिष्ठत्तदाविराट् गुदंमृत्युरपानेननोनोदतिष्ठत्तदाविराट् हस्ताविं
६३ ६४ ६५ ६६ द्रोबलेनैवनोदतिष्ठत्तदाविराट् विष्णुर्गत्यैवचरणौनोदतिष्ठत्तदा

१२२

122A

153

८ ११ विराड्देहस्यव्यष्टिदेहंदर्शांतेनदर्शयन्सांख्यानुकथनस्यप्रयोजनमाह यथेतिद्वाभ्यां ७० प्रथमं
श्रीपरमेश्वरेभक्तिस्ततोन्यत्रविरक्तिस्ततोयोगप्रवृत्त्याधीरेकाग्रचित्तं ततोयज्ज्ञानंतेन प्रत्यगात्मानंतत्र
तं अस्मिन्नात्मनिकारणसंघातेविविच्यचिंतयेत् ७१ इतितृतीयेषड्विंशोध्यायः २६ सप्तविंशेततःसा

नांज्योनद्योलोदितेननोदतिष्ठत्तदाविराट् त्वचात्वग्रामुदरंसिन्धुर्नोदतिष्ठत्तदाविराट् ६७ हृदयं
मनसाचंद्रोनोदतिष्ठत्तदाविराट् बुद्ध्याब्रह्मापिहृदयंनोदतिष्ठत्तदाविराट् रुद्रोभिमत्याहृदयं
नोदतिष्ठत्तदाविराट् ६८ चित्तेनहृदयंचैत्यःक्षेत्रज्ञःप्राविशद्यदा विराट्तदैवपुरुषःसलिलादुद
तिष्ठत ६९ यथाप्रसुप्तंपुरुषंप्राणेंद्रियमनोधियः प्रभवंतिविनायेननोत्थापयितुमोजसा ७०
तमस्मिन्प्रत्यगात्मानंधियायोगप्रवृत्तया भक्त्याविरक्त्याज्ञानेनविविच्यात्मनिचिंतयेत् ७१ इति
तृतीयेषड्विंशः २६ श्रीभगवानुवाच प्रकृतिस्थोपिपुरुषोनाज्यतेप्राकृतैर्गुणैः अविकारादक
र्तृत्वान्निर्गुणत्वाज्जलार्कवत् १ सएषयर्हिप्रकृतेर्गुणेष्वभिविषज्जते अहंक्रियाविमूढात्माकर्तास्मी

म्यरवड्साधनयोगतः पुंप्रकृत्योर्विवेकेनमोक्षमीतिनिरूप्यते विवेकज्ञानेनमोक्षमुपपादयितुंमुक्तस्यैवपुरुष
स्यदेवोक्तेःप्रकृत्याविवेकतःसंसारमनुस्मारयति प्रकृतिस्थोपीतित्रिभिः देहस्थोपिनाज्यतेनलिप्यते गुणैस्तत्कृ
तैःसुखदुःखादिभिः निर्गुणत्वादकर्तृत्वे ततोविकारित्वंतस्मात् १२

टीभप्रते ३॥

अनिर्वृतः सनप्रकृतिसंगकृतैः सदसन्मिश्रयोनिषु देवतिर्यङ्नरादिषु संसारपदवीं प्राप्नोति ३ ननु तर्हि
श्री॰ वात्मवत्त्वात्संसृतेः किं तन्निवृत्तिप्रयासेनेत्यत आह ४ यतो विषयध्यानमनर्थहेतुरतो मनो नियंतव्यमित्याह
भा॰ टी॰ असक्तामिंद्रियाणां पथि विषयमार्गे तीव्रेण दृढेन विरक्त्या च तीव्रया ५ भक्तिविरक्त्योस्तीव्रत्वे कारणमि
१२३ तेन संसारपदवीमवशोभ्येत्यनिर्वृतः प्रासंगिकैः कर्मदोषैः सदसन्मिश्रयोनिषु ३ अर्थे ह्यविद्यमा
123 नेपि संसृतिर्न निवर्तते ध्यायतो विषयानस्य स्वप्नेनर्थागमो यथा ४ अत एव शनैश्चित्तं प्रसक्तम
सतां पथि भक्तियोगेन तीव्रेण विरक्त्या च नयेद्वशं ५ यमादिभिर्योगपथैरभ्यसन् श्रद्धयान्वितः
मयि भावेन सत्येन मत्कथाश्रवणेन वा ६ सर्वभूतसमत्वेन निर्वैरेणाप्रसंगतः ब्रह्मचर्येण मौनेन
स्वधर्मेण बलीयसा ७ यदृच्छयोपलब्धेन संतुष्टो मितभुङ्मुनिः विविक्तशरणः शान्तो मैत्रः करुण
आत्मवान् ८ सानुबंधे च देहेस्मिन्नकुर्वन्नसदाग्रहं ज्ञानेन दृष्टतत्त्वेन प्रकृतेः पुरुषस्य च ९

वर्णयन् ज्ञानेन मोक्षप्रकारमाह षड्भिः यमादिभिर्योगमार्गैश्चित्तमभ्यसन् पुनः पुनरेकाग्रीकुर्वन्नात्मान
मुपलभ्य सर्वानुस्यूतमद्वयपरमात्मानं प्रतिपद्यत इति षष्ठेनान्वयः सत्येन निष्कपटेन भावेन प्रेम्णा
६ अप्रसंगतः बलीयसा ईश्वरार्पितेन ७ विविक्तशरणः एकांतवासी ८ असदाग्रहमहंममतां प्र १२३
कृतेः पुरुषस्य च दृष्टतत्त्वं येन तेन ज्ञानेन ९

123A

निवृत्तानिबुद्ध्यवस्थानानिजाग्रदादीनियस्यसः अतएवदूरीभूतमन्यदर्शनंयस्यआत्मनाहंकारावच्छिन्नेना-
त्मानंशुद्धमुपलभ्य एकस्यैवावच्छेदानवच्छेदाभ्यांकरणत्वकर्मत्वेदृष्टांतमाह चक्षुषाचक्षुरवच्छिन्नेनार्केणग-
गनस्थमर्कमिव एवमात्मदृक् शुद्धमात्मानंपश्यन् १० मुक्तलिंगंनिरुपाधिकं असतिमिथ्याभूतेअहंकारे
सदाभासंसद्रूपेणाभासमानंब्रह्मप्राप्नोति शुद्धजीवस्वरूपादिविशेषमाह सतःकारणस्यप्रधानस्यबंधुमधि

निवृत्तबुद्ध्यवस्थानोदूरीभूतान्यदर्शनः उपलभ्यात्मनात्मानंचक्षुषेवार्कमात्मदृक् १०
मुक्तलिंगंसदाभासमसतिप्रतिपद्यते सतोबंधुमसच्चक्षुः सर्वानुस्यूतमद्वयं ११ य-
थाजलस्थआभासःस्थलस्थेनावदृश्यते स्वाभासेनयथासूर्योजलस्थेनदिविस्थितः १२

ष्ठाने असतःकार्यस्यचक्षुरिवप्रकाशकं सर्वेषुकार्यकारणेष्वनुस्यूतमद्वयंपरिपूर्णं ॥ अहंकारोपहितेनशु-
द्धब्रह्मप्रतिपत्तिंसदृष्टांतमाह जलेस्थितआभासः सूर्यप्रतिबिंबोयदागृहांतर्वर्तिभित्तौस्फुरति तदागृहको-
णस्थितैःपुरुषैःभित्त्यादौस्थलेस्थितेन स्वाभासेनसूर्यप्रतिबिंबेन यथाप्रथमंजलस्थआभासोवदृश्यतेल-
क्ष्यते गगनस्थसूर्यमध्यप्रतिबिंबायोगात् चार्थेयथाशब्दः यथाचेत्यर्थः यथाचजलस्थेनदिविस्थःसूर्यो

श्री० एवंभूतेंद्रियमनोभिरवच्छिन्नैः स्वाभासैरात्मप्रतिबिंबैः त्रिगुणोहंकारः सतोब्रह्मणआभासोयस्मिंस्तेन
रूपेणलक्षितः अहंकारस्याभासंविनाविषयाभासानुपपत्तेः अनेनवाहंकारेणसदाभासवता परमार्थज्ञ
भा० टी० प्तिरूपश्चात्मालक्ष्यतेइत्यर्थः १३ इदानींसुषुप्तिसाक्षित्वेनशुद्धंप्रतिपत्तिमनुभवतोदर्शयतित्रिभिः भूतादिषु
१२४ असतिअसत्त्वेऽव्याकृतेनिद्रयालीनेषुसत्सु यस्तत्रतदाविनिद्रोनिरहंक्रियः तमात्मानंप्रतिपद्येतेर

124

एवंत्रिवृदहंकारोभूतेंद्रियमनोमयैः स्वाभासैर्लक्षितोनेनसदाभासेनसत्यदृक् १३
भूतसूक्ष्मेंद्रियमनोबुद्ध्यादिष्विहनिद्रया लीनेष्वसतियस्तत्रविनिद्रोनिरहंक्रियः १४
मन्यमानस्तदात्मानमनष्टोनष्टवन्मृषा नष्टेहंकरणेद्रष्टानष्टवित्तइवातुरः १५

तितृतीयेनान्वयः १४ ननुयदितदाविनिद्रोसावस्तितर्हिजाग्रत्स्वप्नयोरिवस्फुटः किंनावभासतेतत्राह
स्वंसदृष्टांतोदृष्टत्वेनसविकल्पतयास्फुटंप्रतीतेः सुषुप्तौतुभूतादेरहंकारविषयस्यलीनत्वात् तद्विषये
हंकारेनष्टेसति स्वयमनष्टोपिमृषैवात्मानंनष्टवन्मन्यतेयः अन्यस्यनाशेअन्यस्यनष्टत्वेदृष्टांतःन १२४
ष्टवित्तोयथा आतुरोविवशोनष्टवद्भवतीत्यर्थः १५

124A

ननुसुषुप्तौनकिंचिदनुभूयते नैवं सुखमहमस्वाप्संनकिंचिदवेदिषमितिविशेषज्ञानंविनाकेवलस्यात्मनःप्र
तिसंधानादित्याह एवमिति ननुप्रतिसंधानेसाहंकारस्यप्रतीतेः कथंनिरहंक्रियत्वंतत्राह साहंकारस्यद्रव्यस्य
कारणसंघातस्यानुग्रहः प्रकाशनं अवस्थानंच द्रव्यविशेषणतयाहंकारस्यापिदृश्यत्वाच्च तत्रद्रष्टात्मातद्व्य
तिरिक्तस्तमात्मानमित्यन्वयः १६ भक्तिविरक्तिभ्यांसत्यपिविवेकेप्रकृतिपुरुषयोःपरस्परत्यागाभावात्कथंमुक्ति

एवंप्रत्यवमृश्यासावात्मानंप्रतिपद्यते साहंकारस्यद्रव्यस्ययोवस्थानमनुग्रहः १६ देवहूतिरुवा॰
पुरुषंप्रकृतिर्ब्रह्मन्नविमुंचतिकर्हिचित् अन्योन्यापाश्रयत्वाच्चनित्यत्वादनयोःप्रभो १७ यथागंधस्य
भूमेश्चनभावोव्यतिरेकतः अपांरसस्यचयथातथाबुद्धेःपरस्यच १८ अकर्तुःकर्मबंधोयंपुरुषस्यय
दाश्रयः गुणेषुसत्सुप्रकृतेःकैवल्यंतेष्वतःकथं १९ क्वचित्तत्त्वावमर्शेननिवृत्तंभयमुल्बणं अनिवृ
\\ त्तनिमित्तत्वात्पुनःप्रत्यवतिष्ठते २०

रितिपृच्छति पुरुषमितिचतुर्भिः १७ व्यतिरेकभावमाह
दृष्टांतः यथाव्यतिरेकतोभावःसत्तानास्ति गंधस्यकदाचिदपितदर्शनाद्दृष्टांतांतरमपामितिप्रकृतेः परस्यच
पुरुषस्यच १८ ततःकिमतआह येगुणाआश्रयायस्यसः तेषुप्रतेर्गुणेषुसत्सुपुरुषस्यकैवल्यंकथं १९ अ
तएवक्वचिन्निवृत्तप्रायस्यापिसंसारभयस्यपुनरुद्भवोदृश्यतेइत्याह क्वचिदिति २०

रू

नप्रकृतिसंबंधमात्रंबंधहेतुः किंतुगुणबुद्ध्यातदासक्तिस्तन्निवृत्तौसत्यांमोक्षोघटतेक्वचिदिवस्तुसाधनैवे
श्री॰ त्यादिमभिप्रेत्यसाधनातिशयंकथयन्परिहरतित्रिभिः निमित्तंफलंतन्ननिमित्तंप्रवर्तकंयस्मिन् निष्कामे
भा॰टी॰ नधर्मेण स्वमलात्मनातिनिर्मलेनमनसा श्रुतेनकथाश्रवणेन संभृतयापुष्टया २१ २२ दह्यमानाभिभूयमानातिरो
१२५

श्रीभगवानु॰ अनिमित्तनिमित्तेनस्वधर्मेणामलात्मना तीव्रयामयिभक्त्याचश्रुतसंभृतयाचिरं २१
ज्ञानेनदृष्टतत्वेनवैराग्येणबलीयसा तपोयुक्तेनयोगेनतीव्रेणात्मसमाधिना प्रकृतिःपुरुषस्येहदह्य
मानात्वहर्निशं तिरोभवित्रीशनकैरग्नेर्योनिरिवारणिः २३ भुक्तभोगापरित्यक्तादृष्टदोषाचनित्यशः
नेश्वरस्याशुभंधत्तेस्वेमहिम्निस्थितस्यच २४ यथाह्यप्रतिबुद्धस्यप्रस्वापोबह्वनर्थभृत् सएवप्रतिबु
द्धस्यनवैमोहायकल्पते २५ एवंविदिततत्वस्यप्रकृतिर्मयिमानसं युंजतोनापकुरुतेआत्मारामस्य
कर्हिचित् २६ यदैवमध्यात्मरतःकालेनबहुजन्मना सर्वत्रजातवैराग्यआब्रह्मभुवनान्मुनिः २७

हिताभवति २३ एवंचसतिपुनरुद्भवोनास्तीत्याह भुक्तोभोगोयस्याःनित्यशःसदादृष्टोदोषोयस्याः अतएवपरित्य
क्तासतीईश्वरस्यापरतंत्रस्य स्वेमहिम्निस्थितस्यस्वानंदपूर्णस्य २४ अविवेकावस्थायामनर्थहेतुरपिविवे
कानंतरंनभवतीतिदृष्टांतमाहद्वाभ्यां प्रस्वापःस्वप्नोबह्वनर्थान्बिभर्तिपुष्णाति उद्बुद्धसंस्कारवशेनस्मर १२५

तोषि २५ उपसंहरतित्रिभिः २६ बहूनिजन्मानियस्मिन्काले २७

प्रतिबुद्धार्थो विदितात्मतत्त्वः कैवल्याख्यं स्वसंस्थानं देहादिव्यतिरिक्तं स्वरूपं मदाश्रयं निःश्रेयसं निरतिशया
नंदं २८ स्वदृशा आत्मज्ञानेन छिन्नाः संशया मिथ्याज्ञानानि यस्य लिंगाद्विनिर्गमे लिंगशरीरनाशे सतीत्यर्थः २९ न
दावणिमादिसिद्धयस्तेनरायप्सूपाभवंति नास्वयोगेनोपचितासु समृद्धासु न योगादन्योहेतुर्यासां तासु यदा
सिद्धस्य चेतो न विषज्जते अंग वहेमातः अथ तदा अनंतमतिक्रांता येहं मा तस्य संबंधिनी यत्र यस्यां गतौ मृत्युहासो न भव

मद्भक्तः प्रतिबुद्धार्थो मत्प्रसादेन भूयसा निःश्रेयसं स्वसंस्थानं कैवल्याख्यं मदाश्रयः २८ प्राप्नोतीहां
जसा धीरः स्वदृशाच्छिन्नसंशयः यद्गत्वा न निवर्तेत योगी लिंगाद्विनिर्गमे २९ यदा न योगोपचितासु
चेतो मायासु सिद्धस्य विषज्जते अंग अनन्यहेतुष्वथ मे गतिः स्यादात्यंतिकी यत्र न मृत्युहासः ३० इति श्री
भागवते तृतीयस्कंधे सप्तविंशोध्यायः २७ श्रीभगवानुवाच योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे म
नो येनैव विधिना प्रसन्नं याति सत्पथं १ स्वधर्माचरणं शक्त्या विधर्माच्च निवर्तनं दैवाल्लब्धेन संतोष
आत्मविच्चरणार्चनं २ ॥

ति विषक्तो न सिद्धोपि मायावशीकृत इति मृत्योर्हासो गर्वो भवतीत्यर्थः ३० इति श्रीभावार्थदीपिकायां तृतीय
स्कंधे सप्तविंशोध्यायः २७ अष्टाविंशे ततोष्टांगयोगेन ध्यानयोगाभिना सर्वोपाधिविनिर्मुक्तं स्वरूपज्ञानमीर्यते भक्ति
तेदेयतः योगसांख्यमाख्यायुतिस्तत्र अथाद्वैलवयो यममष्टांगं कपिलोब्रवीत् सबीजस्य सालंबनस्य प्रस
न्नमत १ तत्र यमनियमानाह द्वाभ्यामर्द्धयाधिकैः २ ॥

श्री· भा·टी· १२९ 126

ग्राम्यैर्वैसर्गिकोधर्मस्तस्मान्निवृत्तिः मितंचतन्मेध्यंशुद्धंचतस्यादनं तत्रमितंनाम द्वौभागौपूरयेदन्नैस्तोये
नैकंप्रपूरयेत्मारुतस्यप्रचारार्थंचतुर्थमवशेषयेदितिप्रसिद्धं विविक्तंविजनं देशंनिर्बाधं तस्यस्थान-
स्यसेवनं ३ यावतार्थः प्रयोजनंतावन्मात्रस्यपरिग्रहः ४ आसनादीन्यंगान्याहत्रिभिः सतआसनस्यज
येनस्थैर्यं ५ स्वधिष्ण्यानांप्राणस्थानानांमूलाधारादीनांमध्ये एकस्मिन्देशेमनसासहप्राणस्यधारणं

ग्राम्यधर्मनिवृत्तिश्चमोक्षधर्मरतिस्तथा मितमेध्यादनंशश्वद्विविक्तदेशसेवनं ३ अहिंसासत्यम
स्तेयंयावदर्थपरिग्रहः ब्रह्मचर्यंतपःशौचंस्वाध्यायः पुरुषार्चनं मौनंसदासनजयः स्थैर्यंप्रा
णजयः शनैः प्रत्याहारश्चेंद्रियाणांविषयान्मनसाहृदि ५ स्वधिष्ण्यानामेकदेशेमनसाप्राणधा
रणं वैकुंठलीलाभिध्यानंसमाधानंतथात्मनः एतैरन्यैश्चपथिभिर्मनोदुष्टमसत्पथं बुद्ध्यायुं
जीतशनकैर्जितप्राणोह्यतंद्रितः ७ शुचौदेशेप्रतिष्ठाप्यविजितासनआसनं तस्मिन्स्वस्तिसमा सीनऋजुकायः समभ्यसेत ८

आत्मनोमनससमाधानमात्माकारता ६ अन्यैश्चव्रतदानादिभिःपथिभिरुपायैः ७ आसनादीनिप्रपंचय-
ति शुचाविति[illegible]समाप्तिः आसनं कुशाजिनचैलोत्तरंप्रतिष्ठाप्य स्वस्तिकासनेनवा समभ्यसेत्प्राण
मितिशेषः ऊरूउभेचांतरादायपादाग्रेजानुमध्यगे योगिनोपदवस्थानेस्वस्तिकंतद्विदुर्बुधाः ८

126A

बाह्यवायोरंतः प्रवेशनं पूरकः प्रवेशितस्य धारणं कुंभकः पुनस्तस्य बहिर्निःसारणं रेचकः प्रतिकूलेन रेचकपूरक
कुंभकैः यद्वा इडया पूर्य पिंगलया रेचनं पिंगलया पूर्य इडया रेचनमित्येवं प्रतिकूलेन वायोः स्वमार्गे स्थिरं सत्तेन
रपि चंचलं चेद्यथा न भवति तथा शोधयेत् ९ ध्मातं संतप्तमग्निमध्ये लोहं सुवर्णं च यथा मलं त्यजति तथा मनो
विरजं स्यात् ततश्च चलनं स्यादिति भावः १० प्राणायामादीनां समाधौ द्वारतामाह दोषान् वातपित्तश्लेष्मादीन्

प्राणस्य शोधयेन्मार्गं पूरकुंभकरेचकैः प्रतिकूलेन वा चित्तं यथा स्थिरमचंचलं ९ मनोचिरा
त्स्याद्विरजं जितश्वासस्य योगिनः वाय्वग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलं १० प्राणायामैर्द
हेद्दोषान्धारणाभिश्च किल्बिषान् प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् ११ यदा मनः
स्वं विरजं योगिनः सुसमाहितं काष्ठां भगवतो ध्यायेत्स्वनासाग्रावलोकनः १२ प्रसन्नवदनाम्भो
जं पद्मगर्भारुणेक्षणं नीलोत्पलदलश्यामं शंखचक्रगदाधरं १३ ॥

संसर्गान्विषयसंगान् अनीश्वरान्गुणान्रागादीन् वा पुनः स्वं मनसः स्थिरीकरणं धारणा स्थिरस्य वृत्तिसंहृति
ध्याने वृत्तिनिरोधः समाधिरिति भेदः ११ सुसमाहितं स्थिरं जाते काष्ठां कलां मूर्तिमित्यर्थः स्वनासाग्रावलो
कनं यस्य यतः लयविक्षेपयोः परिहाराय १२ ध्येयं हरिमाह सप्तभिः प्रसन्नं वदनाम्भोजं यस्य तं ध्यायेदिति
शेषेणान्वयः पद्मगर्भवदरुणे ईक्षणे यस्य नीलोत्पलश्यामं १३ ॥

श्री· लसत्पंकजकिंजल्कवत्पीते कौशेयवाससी यस्य भ्राजत्कौस्तुभेन आमुक्ता संश्लिष्टा कंधरा यस्य १४ मत्तद्विरेफा
णां कलो मधुरो ध्वनिर्यस्यां तया परीतं व्याप्तं परार्ध्यान्यमूल्यानि हारादीनि यस्य १५ कांचीगुणेनोल्लसती श्रो
भा· टी· णिर्यस्य भक्तानां हृदयांभोजमेव विष्टरमासनं यस्य भक्तानां मनोनयनानि वर्धयति हर्षयति १६ अपीच्यम

१२७ लसत्पंकजकिंजल्कपीतकौशेयवाससं श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकंधरं १४ मत्तद्विरेफ
127 कलया परीतं वनमालया परार्ध्यहारवलयकिरीटांगदनूपुरं १५ कांचीगुणोल्लसच्छ्रोणिं हृदयां
भोजविष्टरं दर्शनीयतमं शांतं मनोनयनमालया परार्ध्यहारवलय वर्धनं अपीच्यदर्शनं शश्वत्स मं
र्वलोकनमस्कृतं स्थितं वयसि कैशोरे भृत्यानुग्रहकातरं १७ कीर्तन्यतीर्थयशसं पुण्यश्लोकयशस्कं यं
रं ध्यायेद्देवं समग्रांगं यावन्न च्यवते मनः १८ स्थितं व्रजंतमासीनं शयानं वा गुहाशयं प्रेक्षणीयेहितं
ध्यायेच्छुद्धभावेन चेतसा १९ तस्मिंल्लब्धपदं चित्तं सर्वावयवसंस्थितं विलक्ष्यैकत्र संयुज्यादंगे भग व

तिसुंदरं भक्तविषयं दर्शनं यस्य कैशोरे तारुण्ये वयसि संस्थितं भृत्यानामनुग्रहे कातरं व्यग्रं १७ कीर्तन्यं कीर्तना
र्हं तीर्थं यशो यस्य पुण्यश्लोकाबलिप्रमुखास्तेषां यशस्करं समग्राण्यंगानि तस्मिन् न च्यवते नापयाति न पर्ययेति १८
प्रेक्षणीयमीहितं लीला यस्य १९ तदेवं समग्रध्यानमुक्त्वा एकैकावयवध्यानमाह तस्मिंल्लब्धपदं स्थितिर्येन तत

य

स्थितं विशेषणत्वहलीकृत्य पद्यैकस्मिंस्तेषु समर्थः २ १२७

127A तदेवपादादिक्रमेणाहत्रयोदशभिः सम्यक्चिंतयेत् पादेरेखात्मकानिवज्रादीनिलांछनानि तैराद्धंश
कं उत्तुंगाश्चरक्ताश्चविलसंतोनखास्तेषांचक्रवालंमंडलंयस्य तस्यज्योत्स्नाभिराहृतोमहृतांध्वांतरूपोहृद्यान्ध
कारोयेन एतत्सर्वमुपादेयविशेषणंध्येयत्वेनैवोच्यते २१ किंच यस्यशौचेनक्षालनेननिःसृतायाःसरित्प्रवरा
यागंगाया उदकेन तीर्थेनसंसारतारकेन मूर्ध्निअधिकृतेनधृतेनशिवोपि शिवोभूत् अस्यधिकंस्वस्वप्रापेस्मर्यः

संचिंतयेद्भगवतश्चरणारविंदंवज्रांकुशध्वजसरोरुहलांछनाढ्यं उत्तुंगरक्तविलसन्नखचक्रवालज्यो
त्स्नाभिराहृतमहद्धृदयान्धकारं २१ यच्छौचनिःसृतसरित्प्रवरोदकेनतीर्थेनमूर्ध्न्यधिकृतेनशिवःशिवो
भूत् ध्यातुर्मनःशमलशैलनिसृष्टवज्रंध्यायेच्चिरंभगवतश्चरणारविंदं २२ जानुद्वयंजलजलोचनया
जनन्यालक्ष्म्याखिलस्यसुरवंदितयाविधातुः ऊर्वोर्निधायकरपल्लवरोचिषायत्संलालितंहृदिविभोरभ वर्ण ऊर्योग २३

ध्यातुर्मनसियःशमलशैलःपापपर्वतःतस्मिन्निसृष्टंत्यक्तंवज्रमिवयत् यद्वा शमलशैलेनिसृष्टंस्वलांछन
रूपंवज्रंयेनतत् २२ विभोर्जानुद्वयंतत्पर्यंतंजंघाद्वयं अखिलस्यविधातुर्ब्रह्मणोजनन्यालक्ष्म्यासंलालितंस
म्यक्चालितंयेनसंसेवितं संसारित्वमिवप्रतीतंवारयतिअभ
वेस्मेति हृदिकुर्यान्ध्यायेत् २३

सुपर्णासभुजयोः स्कंधयोरधिउपरि ओजसोबलस्यनिधीआधारौ अतसिकाकुसुमवत्कांत्यावभासमानौ व्या
श्री· लम्बिश्याशुल्कलेवमानंयस्पीतांबरवाससस्तस्मिन्वर्तमानोयः कांचीकलापस्तेनपरिरंभःसंश्लेषोविद्यतेयस्य त
भा·द· द्विभोःनितम्बविंबंहृदिकुर्यादितिशेषंवैएोवान्वयः २४ अमुष्यहरेःनाभिह्रदंध्यायेत् कथंभूतं भुवनानांकोश
१२८ समसमूहस्यगुहापिष्ठानंयदुदरंतत्रस्थितं यत्रनाभिह्रदे आत्मयोनेःब्रह्मणोधिष्ण्यंधिष्ण्य मखिललोकात्मकं
128

दुत्सुपर्णभुजयोरधिशोभमानावोजोनिधीअतसिकाकुसुमावभासौ व्यालंबिपीतवरवाससिवर्त्त
मानकांचीकलापपरिरंभिनितंबविंबं २४ नाभीह्रदंभुवनकोशगुहोदरस्थंयत्रात्मयोनिधिषणाखि
ललोकपद्मं व्यूढंहरिन्मणिवृषस्तनयोरमुष्यध्यायेद्द्वयंविषदहारमयूखगौरं २५ वक्षोधिवासमृषभ
स्यमहाविभूतेः पुंसांमनोनयननिर्वृतिमादधानं कंठंचकौस्तुभमणेरधिभूषणार्थंकुर्यान्मनस्यखिल
\\ लोकनमस्कृतस्य २६

पद्मं व्यूढमुत्थितं तयाहरिन्मणिवृषौ मरकतमणिश्रेष्ठाविवयौस्तनौतयो
र्द्वयंध्यायेत् विषदहाराणांमयूखैः गौरंश्वेतं २५ ऋषभस्यश्रेष्ठस्यमहाविभूतेर्महालक्ष्म्याः अधिवासंस्थानंवक्षः
कंठंचमनसिकुर्यात्कथंभूतंकंठं कौस्तुभमणेरपिभूषणार्थंधृतः तस्याधिकंभूषणमर्थः प्रयोजनंयस्य कौस्तुभ १२८
मणिमेवस्वयमलंकुर्वंतमित्यर्थः पुंसांस्मर्तॄणांद्रष्टॄणांचमनोनयनानांनिर्वृतिमादधानमित्युभयोर्विशेषणं २६

128A निर्णिक्तानि उज्वलीकृतानि वाहुवलयानि शृंगारानि येषु प्रतिबिम्बिता लोकपाला येषु दशशतारे वज्रे नमस्तेजो
यस्य करसरोरुहे राजहंसमिव २७ अरातयो ये भटा योद्धारस्तेषां शोणितमेव कर्दमस्तेन दिग्धां लिप्तां अस्य कंठे मालो
मणिचरणेन मधुव्रतानां वरूथस्य गिरोपजुष्टां नादितां चैतन्यस्य जीवस्य तत्त्वं तदुक्तं कौस्तुभव्याजेन जगतो नि
र्लेपमगुणममलं विभर्ति कौस्तुभमणिस्वरूपं भगवान् हरिरिति २८ भक्तेष्वनुकम्पिता कृता तनुः कम्याया पोस्ययारः

वाहूंश्चमंदरगिरेः परिवर्त्तनेन निर्णिक्तवाहुवलयानपि लोकपालान् संचिंतयेद्दशशतारमसह्य
तेजः शंखं च तत्करसरोरुहराजहंसं २७ कौमोदकीं भगवतो दयितां स्मरेत दिग्धामरातिभटशोणितक
र्दमेन मालां मधुव्रतवरूथगिरोपजुष्टां चैत्यस्य तत्त्वममलं मणिमस्य कंठे २८ भक्तानुकम्पितधियेह
गृहीतमूर्तेः संचिंतयेद्भगवतो वदनारविंदं यद्विस्फुरन्मकरकुंडलवल्गितेन विद्योतितामलकपो
लमुदारनासं २९ यच्छ्रीनिकेतमलिभिः परिसेव्यमानं भूत्यास्वया कुटिलकुन्तलवृंदजुष्टं मीनद्वया
श्रयमधिक्षिपदब्जनेत्रं ध्यायेन्मनोमयमतंद्रित उल्लसद्भ्रु ३० ॥

हृदीनामूर्त्तिर्यन तस्य स्फुरंती ये मकरकुंडले तयोर्वल्गितेन स्प° वलनेन विद्योतिता अमला कपोला यस्मिंस्तत् २९ यच्च
श्रिया भृत्या शोभया अलिभिः परिसेव्यमाने मीनद्वयाश्रयं श्रीनिकेतनं पद्ममधिक्षिपद्दर्शनेन ध्यायेत् नवकुंतलैरली
नामधिपैः नेत्रद्वयेन मीनद्वयस्य आश्रितं स्थानं पद्मं तस्य श्रियं निरस्य पद्ममंडलं समोत्पुल्ल यस्मिन् मनोमयं मनसा

॥ [illegible]

कृपयाधिकमित्यर्थः अक्षिभ्यां निसृष्टं प्रयुक्तं स्निग्धस्मितेनानुगुणितं विपुलः प्रसादो यस्मिन् गुहायां हृदि
॥३१॥ अवनता ये खिललोकास्तेषां तीव्रशोकेन यान्यश्रूणि तेषां सागरं शोषयति तथा तं हरेर्हासं अत्युदारं
भ्रूमंडलं च ध्यायेत् कथंभूतं निजमायया मकरध्वजस्यापि संमोहनाय रचितं मुनिकृते मुनीनामुपकारा
य मुनीनां संमोहने प्रवृत्तं काममेव मोहयितुमित्यर्थः ॥३२॥ मन्दहासध्यानमुक्त्वा स्फुटहासध्यानमाह प्रहसि

तस्यावलोकमधिकं कृपयातिघोरतापत्रयोपशमनाय निसृष्टमक्ष्णोः स्निग्धस्मितानुगुणितं वि
पुलप्रसादं ध्यायेच्चिरं विपुलभावनया गुहायां ॥३१॥ हासं हरेरवनताखिललोकतीव्रशोकाश्रुसागरविशो
षणमत्युदारं संमोहनाय रचितं निजमाययास्य भ्रूमंडलं मुनिकृते मकरध्वजस्य ॥३२॥ ध्यानायनं प्रहसित
बहुलाधरोष्ठभासारुणायिततनुद्विजकुंदपंक्ति ध्यायेत्स्वदेहकुहरेवसितस्य विष्णोर्भक्त्यार्द्रयार्पित
मना न पृथग्दिदृक्षेत् ॥३३॥

तस्यैव हरेः स्मितं ध्यायेत् कीदृशं ध्यानायनं प्रतिसुंदरतया प्रयत्नं विनैव ध्यानस्य विष
यभूतं सौंदर्यमेवाह बहुलयाधिकयाधरौष्ठस्य भासा कांत्या अरुणीभूतास्तनवः सूक्ष्मा द्विजा एव कुंदमुकुला
नि तेषां पंक्तिः स्फुरति यस्मिन् ततः हृदयकुहरे हृदयाकाशे अवसितस्य जातस्य विष्णोः प्रेमरसार्द्रया भक्त्या तस्मि
न्नेवार्पितमनाः सन् पृथक् तद्व्यतिरिक्तं द्रष्टुं नेच्छेत् चित्तं न विचालयेदित्यर्थः ॥३३॥

129A

समाधिमारूढाभ्यां निर्बीजः सबीजश्चेति योगो द्विविधः तत्र निर्बीजयोगे यतो यतो निश्चरति मनश्चंचलम-
स्थिरं ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् इति गीतोक्तमार्गेण क्रियमाणोपि दुष्करः समाधिः सबीजस्तु सु-
करः तत्र हृदि परमानंदमूर्त्तौ ध्यायमाने यत्र तत्रैव चित्तोपरमो भवति यदुक्तं हृतात्मनो हृतप्राणांश्च भक्तिर-
निच्छतो गतिमण्वीं प्रयुंक्ते इति अतः स एवोपक्षिप्तः योगस्य लक्षणं वदंस्सबीजस्येति तदेवायत्नसिद्धत्वं दर्श-
यति एवं ध्यानमार्गेण प्रतिलब्धो भावः प्रेमा येन सः तथा भक्त्या द्रवद्धृदयं यस्य प्रमोदादुद्गतानि पुलकानि यस्य

ति एवं हृदि भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात् औत्कंठ्यबाष्पकलया मुहुरर्द्यमानस्त-
दापि चित्तबडिशं शनकैर्वियुंक्ते ३४ मुक्ताश्रयं यर्हि निर्विषयं विरक्तं निर्वाणमृच्छति मनः सहसा यथार्चिः
औत्कंठ्यं प्रवृत्ताश्रुकलया च मुहुरर्द्यमा॥ आत्मानमत्र पुरुषोऽव्यवधानमेकमन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः ३५
नस्त्वानंदसंप्लवे निमज्जमानः दुर्ग्रहस्य भगवतो ग्रहणे बडिशं मत्स्यबंधनमिवोपायभूतं चित्तमपि ध्येयाद्वियुंक्ते
तद्द्वारेण शिथिलप्रयत्नो भवतीत्यर्थः ३४ यर्हि यदैव निर्विषयं भवति अतएव मुक्ताश्रयं च ध्येयसंबंधं विनाध्या-
तुरेवास्थानासंभवात् न च स्वदेहवत्स्वादिविषयः स्यात् यतस्तत्र विरक्तं परमानंदानुभवेनातो निर्वाणं लयमृच्छति
दृत्तिरूपतां पतितज्वलज्ज्वालाकारेण परिणमते इत्यर्थः यथार्चिर्ज्वाला आश्रयविषयापगमे ज्योतीरूपेण परिणमते अतो
संसारदशायामव्यवधानं ध्यातृध्येयविभागशून्यमेकमखंडमात्मानमनुगतमीक्षते अत्र हेतुः प्रतिनिवृत्तोपगतः गुण

प्रबोधचन्द्रोदयटीका ६५

श्री॰ नचस्वप्नोत्थितस्स्वपुनः संस्मरतीत्याह सोपिसएवपुरुषः तस्मिन्महिम्निब्रह्मस्वरूपेऽवसितः अवसानंनिष्ठांप्रा
भा॰टी॰ प्तः कयामनसोनिवृत्त्याचरमयाअविद्यारहितयेति सुषुप्ताद्विशेषः तत्रस्यविद्यास्तिनत्विदानीं अत्रहेतुः प
११॰ तयायोगाभ्यासकृतयेत्यर्थः नन्वेवमपिसुखदुःखयोरात्मधर्मत्वेनज्ञातोबंधःस्यात्तत्राह दुःखयोःसुखदुःख
130 योः हेतुत्वंभोक्तृत्वंयत्सर्वमासीत्तदप्यसतिअविद्याकृतेकर्त्तरिअहंकारे विधत्तेतन्निष्ठमेवपश्यतीत्यर्थः

सोप्येतयाचरमयामनसोनिवृत्त्यातस्मिन्महिम्न्यवसितःसुखदुःखबाह्ये हेतुत्वमप्यसतिकर्तरिदुः
खयोर्यत्स्वात्मन्विधत्तउपलब्धपरात्मकाष्ठः ३९ देहंचतंनचरमःस्थितमुत्थितंवासिद्धोविपश्यप
तियतोध्यगमत्स्वरूपं दैवादुपेतमथदैववशादपेतंवासोयथापरिकृतंमदिरामदांधः ३०

यतउपलब्धपरात्मकाष्ठः अपरोक्षीकृतात्मतत्त्वः ३९ तस्यजीवन्मुक्तिमाहद्वाभ्यां चरमउक्तलक्षणः सिद्धो
देहमपिनविपश्यति अतःसुखदुःखे आसनादुत्थितमुत्थायपतत्रैवस्थितं तत्रस्थानादपेतं ततोदैववशा
त्पुनरप्युपेतंवा नविपश्यति यतःस्वरूपंप्राप्तःयतोदेहात्स्वरूपमध्यगमत्तंदेहमितिवा सतोप्यननुसंधानेदृ
ष्टांतः वासःपरिकृतं कृटितटोपरिवेष्टितं स्थितंगतंवामदिरामदीरामदीनान्योयथानपश्यति ३०

130A

ननु देहस्य प्रवृत्तिनिवृत्तौ जीवनं वा कथं तत्राह देहं च सर्वं संस्कारस्तद्वशेन गच्छन् यावत्स्वारंभकं कर्मास्ति ताव
त्प्रतिसमीक्षते जीवन्नेव सासुः सेंद्रियः ननु तर्हि तस्मिन्पुनः संगः स्यात्तत्राह तं देहं स्वप्नदेहादितुल्यं सप्रपंचं पुत्रा
दिसहितं पुनर्न भजते अहं ममेति नाभिमन्यते अपि तु रूढः प्राप्तः समाधिपर्यंतो योगो येन अत एव प्रतिबुद्धं वस्तु आ
त्मतत्त्वं येन सः ३७ प्रतिबोधप्रकारमाह षड्भिः अतिस्नेहवशादात्मत्वेनाभिमतादपि पुत्रादेः मर्त्यः पुत्रादिः पुरुषो दे

देहोऽपि दैववशगः खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः तं सप्रपंचमधिरूढसमाधियोगः
स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ३८ यथा पुत्राच्च वित्ताच्च पृथङ्मर्त्यः प्रतीयते अप्यात्मत्वेनाभिमताद्दे
हादेः पुरुषस्तथा ३९ यथोल्मुकाद्विस्फुलिंगाद्धूमाद्वापि स्वसंभवात् अप्यात्मत्वेनाभिमताद्यथाग्निः पृ
थगुल्मुकात् ४० भूतेंद्रियांतःकरणात्प्रधानाज्जीवसंज्ञितात् आत्मा तथा पृथग्द्रष्टा भगवान्ब्रह्मसंज्ञि
तः ४१ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ईक्षेतानन्यभावेन भूतेष्विव तदात्मतो ४२

हादेर्द्रष्टा ३९ पृथगवस्थानाभावेऽपि भेदं सदृष्टांतमाह यथोल्मुकादिदानीं ज्वलतः काष्ठात् स्वसंभवादग्नेः संभूता
त्तस्माद्वा आत्मत्वेनाग्नेः स्वरूपत्वेनाभिमतादपि अत्यंताविवेकिनो हि धूमेऽप्यग्न्यभिमानोस्ति उल्मुकात्सर्वेभ्यो
पि तद्दाहकः प्रकाशकश्चाग्निः पृथगेव ४० भूतादेर्द्रष्टा तेभ्यः पृथक् तस्मादपि जीवसंज्ञिताद्ब्रह्मसंज्ञितः पृथक्
तथा प्रधानादपि तत्प्रवर्तको भगवान्पृथगित्यर्थः ४१ उपाधितो विवेकमुक्त्वा तत्सैक्यमाह भूतेषु च तद्विधेषु त

[illegible]तां ४२

धर्मभेदस्याप्यौपाधिकतां सदृष्टांतामाह स्वयोनिषु काष्ठेषु ज्योतिरग्निः गुणवैषम्याद्दीर्घह्रस्वादिभेदात्
प्रकृतौ देहे ४३ स्वांशस्य जीवस्य बंधहेतुं दैवीं देवस्य विष्णोः शक्तिं पराभाव्य तत्स्वसादेनैव जित्वा स्वरूपेण
वृत्तेनावतिष्ठते ४४ ततितृतीयेऽष्टविंशः २८ एकोनत्रिंशके भक्तियोगस्तु बहुधोच्यते कालस्य च बलं चो
ग्रं संसृतिश्च विरक्तये उक्तानुवादपूर्वं भक्तिमार्गभेदान्पृच्छति द्वाभ्यां लक्षणं महदादीनां यथासांख्येषु कथितं

स्वयोनिषु यथा ज्योतिरेकं नाना प्रतीयते योनीनां गुणवैषम्यात्तथात्मा प्रकृतौ स्थितः ४३ तस्मादिमां
स्वां प्रकृतिं दैवीं सदसदात्मिकां दुर्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठते ४४ इति तृतीयेऽष्टाविंशः २८
देवहूतिः लक्षणं महदादीनां प्रकृतेः पुरुषस्य च स्वरूपं लक्ष्यतेऽमीषां येन तत्पारमार्थिकं १ यथा सां
ख्येषु कथितं यन्मूलं तत्प्रचक्षते भक्तियोगस्य मे मार्गं ब्रूहि विस्तरतः प्रभो २ विरागो येन पुरुषो भग
वत्सर्वतो भवेत् आचक्ष्व जीवलोकस्य विविधानेकसंसृतीः ३ कालस्येश्वररूपस्य परेषां च परस्य ते
स्वरूपं बत कुर्वंति यद्धेतोः कुशलं जनाः ४

तथा येन लक्षणेन तत्पारमार्थिकं परस्परविभक्तमित्यर्थः १ यो भक्तियोगो मूलं प्रयोजनं यस्य तद्यन्मूलं तत्क
थितं तस्य भक्तियोगस्य मार्गं प्रकारं विस्तरतो मे ब्रूहि २ येन संसृतीनामाख्यानेन विगतरागो भवेत् ३ ईश्वररू १३१
पस्य महाप्रभावस्य ते त्वदात्मकस्य यद्धेतोर्यद्भयात्कुशलं पुण्यं कुर्वंति ४

131A अवतुषः अतस्मात्तोमिथ्याभूतेदेहादौअभिमतिरहंकारोयस्मात्तः कर्मस्वनुविद्धयासक्तयाधियाश्रांतस्यात्य
वानाश्रयेपारतमसिसंसारे चिरप्रसुप्तस्यलोकस्य प्रबोधायत्वंयोगप्रकाशकोभास्करः किलाविर्भूतोसि ५ स्न
त्तणांसदरं ६ मार्गैः प्रकारविशेषैः तानेवाह स्वभावभूतायेगुणास्तेषांमार्गेणवृत्तिभेदेन भावोभिप्रायः फल
संकल्पभेदाद्भक्तिभेद इत्यर्थः ७ अभिसंधायसंकल्प्यसंरंभीक्षुभितः भिन्नदृक् भेददर्शी योभावंभक्तिंकुर्या
लोकस्यमिथ्याभिमतेरचक्षुषश्चिरंप्रसुप्तस्यतमस्यनाश्रये श्रांतस्यकर्मस्वनुविद्धयाधियात्वमाविरासीः
किलयोगभास्करः ५ मैत्रेयउ० इतिमातुर्वचः श्लक्ष्णंप्रतिनंद्यमहामुनिः आबभाषेकुरुश्रेष्ठप्रीतस्तां
करुणार्दितः ६ श्रीभगवानु० भक्तियोगोबहुविधोमार्गैर्भामिनिभाव्यते स्वभावगुणमार्गेणपुंसांभा
वोविभिद्यते ७ अभिसंधाययोहिंसांदंभंमात्सर्यमेववा संरंभीभिन्नदृग्भावंमयिकुर्यात्सतामसः ८
विषयानभिसंधाययशऐश्वर्यमेववा अर्चादावर्चयेद्योमांपृथग्भावःसराजसः ९ कर्मनिर्हारमुद्दिश्य
सत्रिविधोपितामसः ८ पृथग्भावोभेद परस्मिन्वातदर्पणं यजेद्यष्टव्यमितिवापृथग्भावःससात्विकः
दर्शी ९ कर्मनिर्हारंपापक्षयंपरस्मिन्परमेश्वरे तदर्पणंकर्मार्पणं भागवतमितिसमुद्दिश्येत्यर्थः यष्टव्यमितिवि
धिसिद्धिमुद्दिश्येत्यर्थः भेददर्शित्वमर्चादावर्चनं त्रिष्वपिसमानं तदेवंतामसादिभक्तित्रयस्यत्रयोभेदास्तासच
यथोत्तरंश्रेष्ठमेवंचश्रवणकीर्तनादयोपिनव प्रत्येकंनवनवभेदाः तदेवंसगुणभक्तिरेकाशीतिभेदा १०

श्री· भा·टी·
१३२
132

निर्गुणातुभक्तिरेकविधैवतामाहद्वाभ्यां अविच्छिन्नासंतता ॥ अहैतुकीफलाभिसंध्यानशून्या अव्यवहिता
भेददर्शनरहिताच मद्गुणश्रुतिमात्रेणमयिपुरुषोत्तमेमनोगतिरितिभक्तिः सानिर्गुणस्यभक्तियोगस्यलक्ष
णमितिन्वयः लक्षणंस्वरूपं १२ भक्तानांनिष्कामतांकैमुत्यन्यायेनाह सालोक्यंमयासहैकस्मिंलोकेवासः सार्ष्टिः
समानैश्वर्यंसामीप्यंनिकटवर्तित्वं सारूप्यंसमानरूपता एकत्वंसायुज्यं उतापिदीयमानमपिनगृह्णन्ति कुतस्तत्कामा॥

मद्गुणश्रुतिमात्रेणमयिसर्वगुहाशये मनोगतिरविच्छिन्नायथागंगांभसोंबुधौ ॥ लक्षणंभक्तियोगस्य
निर्गुणस्यह्युदाहृतं अहैतुक्यव्यवहितायाभक्तिःपुरुषोत्तमे सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्यु
त दीयमानंनगृह्णन्तिविनामत्सेवनंजनाः १३ सएवभक्तियोगाख्यआत्यंतिकउदाहृतः येनातिव्रज्य
त्रिगुणंमद्भावायोपपद्यते १४ निषेवितेनानिमित्तेनस्वधर्मेणमहीयसा क्रियायोगेनशस्तेननातिहिंस्रे
णनित्यशः १५ मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवन्दनैः भूतेषुमद्भावनयासत्वेनासंगमेनच १६

मनेत्यर्थः १३ किमितितर्हिभजंतेभक्तेरेवपरमफलत्वादित्याह ननुत्रैगुण्यंहित्वाब्रह्मत्वशक्तिःपरमफलंप्रसिद्धं
सत्यंतत्तुभक्त्यानुषंगिकमित्याह येनभक्तियोगेन मद्भावायब्रह्मत्वाय १४ एवंभूतायाःभक्तेःसाधनान्याह
पंचभिः निषेवितेनसम्यगनुष्ठितेन अनमित्तेन स्वधर्मेणनित्यनैमित्तिकेन महीयसाश्रद्धादियुक्तेन क्रियायो १३२
गेनपंचरात्राद्युक्तपूजाप्रकारेण शस्तेननिष्कामेन १५ मद्धिष्ण्यंमत्प्रतिमादि तस्यदर्शनादिभिः सत्वेनधैर्येण अ

१८ १९ मद्धर्मिणो भगवद्धर्मानुष्ठातः पुरुषस्याशयस्थितं १९ प्रयत्नं विनैव प्राप्नोतीदृष्टांतः वातोरथः घ्राणकोयस्याशा
यातस्थानात् आहृत्ते स्वात्मसात्करोति अविकारिसमंयच्चेतः २० चित्तशुद्धिश्च सर्वभूतात्मदृष्ट्यैव भवतीति वक्तुं केवल
प्रतिमादिनिष्ठं निंदन्नाह सप्तभिः अर्चैव विडंबनमनुकरणमर्चायां पूजायां विडंबनमिति वा अवज्ञायोपेक्ष्य २१ द्वेषिनि

महतां बहुमानेन दीनानामनुकम्पया मैत्र्या चैवात्मतुल्येषु यमेन नियमेन च १७ आध्यात्मिकानुश्रवणान्ना
मसंकीर्तनाच्च मे आर्जवेनार्यसंगेन निरहंक्रियया तथा १८ मद्धर्मिणो गुणैरेतैः परिसंशुद्ध आशयः पुरु
षस्यांजसाभ्येति श्रुतमात्रगुणं हि मां १९ यथा वातरथो घ्राणमावृंक्ते गंध आशयात् एवं योगरतं चेत आत्मा
नमविकारि यत् २० अहं सर्वेषु भूतेषु भूतात्मावस्थितः सदा तमवज्ञाय मां मर्त्यः कुरुतेर्चाविडंबनं २१ यो मां स
र्वेषु भूतेषु संतमात्मानमीश्वरं हित्वार्चां भजते मौढ्याद्भस्मन्येव जुहोति सः द्विषतः परकाये मां मानिनो भिन्नद
र्शिनः भूतेषु बद्धवैरस्य न मनः शांतिमृच्छति २३ अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे नैव तुष्येर्चितोर्चायां
भूतग्रामावमानिनः २४ अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत् यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितं २५

दाक्रमेण चतसृभिर्निषिध्यते हित्वा उपेक्ष्य २२ २३ द्रव्यैरुत्पन्नया क्रियया भूतग्रामावमानिनस्तन्निंदकस्य २४ तर्हि कि
मर्चादावर्चनमनर्थकमेव नेत्याह सर्वभूतेष्ववस्थितं मां स्वहृदि यावन्न वेद स्वकर्मकृत् कर्माविरोधेन यथावकाश
मेनेन क र्मनिष्ठाया अपि समपवार्थपरित्वमुक्तं भवति २५

श्री॰ अंतरानंतरंभेदं उदय्यरमल्पमपिभेदंयःपश्यतीत्यर्थः यद्वा अंतरामध्ये उदरंशरीरं मत्सवद्दंतस्यभयंविदधेकरो
मि २६ अथातः सर्वभूतेषुकृतवासं तत्रहेतुः भूतानामात्मानमंतर्यामिणं अभिन्नेनचक्षुषासमदर्शनेन २७ तत्रा
भा॰ टि॰ पियथोत्तरंमानाद्यतिशयःकर्तव्यइतिवक्तुंतारतम्यमाहसार्धैःषड्भिः अजीवानामचेतनेभ्यः ततस्तेष्वपिप्राण
१३३ भृतः प्राणवृत्तिमंतः सचित्ताज्ज्ञानवंतः इंद्रियाणांवृत्तयोयेषु २८ इंद्रियवृत्तयोवृत्तीनामपिसूक्ष्माः संतेव न
133

आत्मनश्चपरस्यापियःकरोत्यंतरोदरं तस्यभिन्नदृशोमृत्युर्विदधेभयमुल्बणं २६ अथमांसर्वभूतेषुभू
तात्मानंकृतालयं अर्हयेद्दानमानाभ्यांमैत्र्याभिन्नेनचक्षुषा २७ जीवाःश्रेष्ठाह्यजीवानांततःप्राणभृतःशु
भे ततःसचित्ताःप्रवरास्ततश्चेंद्रियवृत्तयः २८ तत्रापिस्पर्शवेदिभ्यःप्रवरारसवेदिनः तेभ्योगंधविदःश्रे
ष्ठास्ततःशब्दविदोवराः २९ रूपभेदविदस्तत्रततश्चोभयतोदतः तेभ्योबहुपदःश्रेष्ठाश्चतुष्पादस्ततो
द्विपात् ३० ततोवर्णाश्चचत्वारस्तेषांब्राह्मणउत्तमः ब्राह्मणेष्वपिवेदज्ञोह्यर्थज्ञोभ्यधिकस्ततः ३१

ह्यादिमहाभारते मोक्षधर्मेषुस्पर्धतेतस्मात्पश्यंतिपादपाजिघ्रंतिपादपास्ततइत्यादिप्रभृतात्तुस्पर्शेनेंद्रियवृ
त्तिरेवातस्तेभ्यः स्पर्शवेदिभ्योरसवेदिनोमत्स्यादयःश्रेष्ठाः गंधविदोभ्रमरादयः शब्दविदः सर्पादयः २९ रूप
भेदविदः काकादयः उभयतोदंतायेषांतेअपादेभ्यस्ततोबहुपादास्तेभ्यश्चतुष्पादाइत्यर्थः द्विपान्मनुष्याः १३३
३० ततस्तेषुवर्णाः ३१ म

133A

संशयच्छेत्ता मीमांसकः ततोपि केवलात्स्वकर्मकृत् मुक्तसंगस्य लक्षणमात्मनोर्धर्ममदोग्धानिष्काम इत्यर्थः ३२
अर्पिताअशेषाःक्रियाअर्थायस्तत्फलानि आत्मादेहश्च येनात एव निरंतरोव्यवहितः अकर्तुः कर्तृत्वाभिमानशून्यात्
३३ जीवानांकलयापरिकलनेनांतर्यामितयाप्रविष्ट इति द्रष्टेत्यर्थः ३४ उक्तंभक्तियोगं एवोक्तेनाष्टांगयोगेनस

अर्थज्ञात्संशयच्छेत्ता ततः श्रेयान्स्वकर्मकृत् मुक्तसंगस्ततो भूयानदोग्धा धर्ममात्मनः ३२ तस्मान्मय्य
र्पिताशेषक्रियार्थात्मा निरंतरः मय्यर्पितात्मनः पुंसो मयि संन्यस्तकर्मणः न पश्यामि परं भूतमकर्तुः
समदर्शनात् ३३ मनसैतानि भूतानि प्रणमेद्बहुमानयन् ईश्वरो जीवकलया प्रविष्टो भगवानिति ३४
भक्तियोगश्च योगश्च मया मानव्युदीरितः ययोरेकतरेणैव पुरुषः पुरुषं व्रजेत् ३५ एतद्भगवतो रूपं ब्रह्म
णः परमात्मनः परं प्रधानं पुरुषं दैवं कर्मविचेष्टितं रूपभेदास्पदं दिव्यं काल इत्यभिधीयते ३६

द्वोपसंहरति हेमानवि पुरुषं परमेश्वरं ३५ यदन्यत्वं जीवस्य संसृतिः कालस्य स्वरूपं चावश्येति तदाह सार्धे
न एतत्सर्वनियंतृ यद्भगवतो रूपं कीदृशं प्रधानपुरुषात्मकं परं तद्व्यतिरिक्तं च एतदेव दैवमित्यभिधीयते की
दृशं रूपभेदास्पदं वस्तूनामन्यथात्वस्यास्पदमाश्रयः कारणं उक्तं हि कालाद्गुणव्यतिकर इति वक्ष्यति च गुण
व्यतिकरः काल इति दिव्यमद्भुतप्रभावं ३६

श्री॰ तदेवाहयावत्समाप्तिः महदादीनांतत्तदभिमानिनांजीवानांभयहेतुत्वमाह यइति भूतैरेवभूतान्यत्तिसंहरति २
भा॰ तं॰ अधियज्ञोफलदाता कलयतांवशीकुर्वतां ३८ ३९ यद्यस्माद्भीताः ४१ इंधेदीप्यतेगिरिभिःभूःअदोनभःयन्नि
१३४ यमायदात्तया ४२ महात्महत्तत्त्वमंकुरात्मकंस्वदेहंलोकात्वेन तनुतेविस्तारयति गुणाभिमानिनोगुणानि
134

भूतानांमहदादीनांयतोभिन्नद्दष्टांभयं यांतःप्रविश्यभूतानिभूतैरत्त्यखिलाश्रयः ३७ सविष्वाख्यो
धियत्तोसौकालःकलयतांप्रभुः नचास्यकश्चिद्दयितोनद्वेष्योनचबांधवः आविशत्यप्रमत्तोसौप्रमत्तंज
नमंतकृत् यद्भयाद्वातिवातोयंसूर्यस्तपतियद्भयात् ३९ यद्भयाद्वर्षतेदेवोभगणोभातितद्भयात् यद्व
नस्पतयोभीतालताश्चौषधिभिःसह ४० स्वेस्वेकालेभिगृह्णंतिपुष्पाणिचफलानिच स्रवंतिस
रितोभीतानोत्सर्पत्युदधिर्यतः ४१ अग्निरिंधेसगिरिभिर्भूर्नमज्जतियद्भयात् नभोददातिश्वसतांपदंयन्नि
यमाददः ४२ लोकंस्वदेहंतनुतेमहान्सप्तभिरावृतं गुणाभिमानिनोदेवाःसर्गादिष्वस्ययद्भयात् वर्ततेऽ
नुयुगंयेषांवशएतच्चराचरं ४३ सोनंतोंतकरःकालोनादिरादिकृदव्ययः जनंजनेनजनयन्मारयन्मृ
सिनांगर्भे स्य इतिश्रीतृतीयेएकोनत्रिंशः २९

यंताः देवाब्रह्मादयः अस्यविश्वस्यसर्गादिषुवर्तंते अनुयुगंवारंवारमित्यर्थः ४३ जनेनपित्रादिनाजनंपुत्रादि १३४
जनयन् आदिकृत् मृत्युनान्तकमपिमारयन्नंतकरः अनादिरनंतोऽव्ययश्च ४४ इतितृतीयेएकोनत्रिंशः २९

134A

विंशेतकायकांतादिलालनाकुलचेतसां कामिनांतामसीपापादयोगतिरुधीर्यते कालप्रभाववर्णनेनसर्वकंवै
रागपायविचित्रकर्मकृतांसंसृतिमध्यायत्रयेणप्रपंचयति तस्यैतस्यवलिनःकालस्य वलिनेतिपाठः काल्यमानोवि
चाल्यमानोपि वायोर्विक्रमंयथामेघपंक्तिर्नवेद १ विक्रममेवाह यंयमर्थंदुःखेनप्रयासेन उपाधत्तेआपादयति
तंतंभगवान्कालोधुनोतिविनाशयति यत्कृतेयन्निमित्तं २ शोकेहेतुः यद्यस्मात्सानुवंधस्यकलत्रादिसहित

श्रीकपिलउवाच तस्यैतस्यजनोनूनंनायंवेदोरुविक्रमं काल्यमानोपिवलिनावायोरिवघनावलिः १
यंयमर्थमुपादत्तेदुःखेनसुखहेतवे तंतंधुनोतिभगवान्पुमान्शोचतियत्कृते २ यदध्रुवस्यदेहस्यसा
नुवंधस्यदुर्मतिः ध्रुवाणिमन्यतेमोहाद्गृहक्षेत्रवसूनिच ३ जंतुर्वैभवएतस्मिन्यांयांयोनिमनुव्रजेत
तस्यांतस्यांसलभतेनिर्वृतिंनविरज्यते नरकस्थोपिदेहंवैनपुमांस्त्यक्तुमिच्छति नारक्यांनिर्वृतौस
त्यांदेवमायाविमोहितः ५ आत्मजायासुतागारपशुद्रविणवन्धुषु निरूढमूलहृदयआत्मानंवहुम
न्यते ६ सन्दह्यमानसर्वांगएषामुद्वहनादिना करोत्यविरतंमूढोदुरितानिदुराशयः ७

स्यदेहस्यसंवंधीनिवसुद्रव्यं प्रकृतमसमुच्चयार्थश्चकारः ३ दुर्मतितंदर्शयन्दुःखंप्रपंचयतिचतुर्दशभिः ४ नारक्यां
नरकादावादिभिजातायां ५ निरूढमूलंप्ररूढमनोरथंहृदयंयस्य वहुमन्यते कृतार्थोहमितिश्लाघते ६ उ
द्वहनादिनापोषणचिंतयादुराशयत्वमाह ७

श्री॰ भा॰ तृ॰ १३५ 135

आक्षिप्तआत्माइंद्रियाणिचयस्य कया असतीनांपुंश्चलीनांरहसिरचितयासंभोगादिरूपयामधुरभाषिणांशि
शूनांआलापैश्च सुखवन्मन्यतेइत्युत्तरेणान्वयः ८ कूटाः वित्तशाठ्यादिबहुलाधर्मायेषुदुःखप्रधानेषु ९ येषां
पोषणेनाधोयातितान्पुष्णाति शेषभुगितिभोगोपितस्यदुर्लभइत्यर्थः १० वार्तायांजीविकायांनिःसत्वः असमर्थः

आक्षिप्तात्मेंद्रियः स्त्रीणामसतीनांचमायया रहोरचितयालापैः शिशूनांकलभाषिणां ८ गृहेषुकू
टधर्मेषुदुःखतंत्रेष्वतंद्रितः कुर्वन्दुःखप्रतीकारंसुखवन्मन्यतेगृही ९ अर्थैरापादितैर्गुर्व्याहिंसयेत
स्ततश्चतान् पुष्णातियेषांपोषेणशेषभुग्यात्यधः स्वयम् १० वार्तायांलुप्यमानायामारब्धायांपुनः पुनः
लोभाभिभूतोनिःसत्वः परार्थेकुरुतेस्पृहां ११ कुटंबभरणाकल्पोमंदभाग्योवृथोद्यमः श्रियाविहीनः
कृपणोध्यायन्श्वसितिमूढधीः १२ एवंस्वभरणाकल्पंतत्कलत्रादयस्तथा नाद्रियंतेयथापूर्वंकीना
शाइवगोजरं १३ तत्राप्यजातनिर्वेदोभ्रियमाणः स्वयंभृतैः जरयोपात्तवैरूप्योमरणाभिमुखोगृहे १४
आस्तेऽवमत्योपन्यस्तंगृहपालइवाहरन् आमयाव्यप्रदीप्ताग्निरल्पाहारोल्पचेष्टितः १५

परार्थेपरस्वे ११ अकल्पोसमर्थः १२ एवंयथानाद्रियन्तेतथादरंनकुर्वंति कीनाशाः कृपणाः कृषीवलागोज
रंवृद्धंबलीवर्दम् १३ भ्रियमाणः पोष्यमाणः १४ अवमत्यावज्ञायउपन्यस्तंसमीपेप्रक्षिप्तं गृहपालः श्वाआ १३५
हरन्भुंजानः आमयावीरोगी १५

135A

उत्तारो बहिर्निर्गतनेत्रः कफेन संरुद्धा नाडयो यस्य कासश्वासाभ्यां कृतश्चायासो यस्य घुरघुर इति शब्दं करोति १९
परवीतः परिवेष्टितः वाच्यमानो बंधो तातेत्याहूयमानः ७ अस्तधीः नष्टमति ८ मृतस्य पुण्यपापाभ्यां द्वे ग
तीतत्र पापगतिमाह सरभसे सक्रोधमीलत्तूणयोर्यमयोर्दृष्ट्वा ९ आहृत्य निरुध्य १० तर्जनैः निर्भिन्नहृदये यस्मात्तः स

वायुनोत्क्रामितो नारः कफसंरुद्धनाडिकः कासश्वासकृतायासः कंठे घुरघुरायते ६ शयानः परि
योवृद्धिः परिवीतः स्ववंधुभिः वाच्यमानोपि नश्रुते कालपाशवशंगतः ७ एवं ऊर्द्धं बमरणोध्याएता
त्माजितेंद्रियः शाकन्मत्र म्रियते रुदतां स्वानामुरुवेदनया स्तथी यमदूतौ तदा प्राप्तौ भीमौ सरभसेत्तु
तौ महदृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुंचति ९ यातनादेहमाहृत्य पाशैर्वद्ध्वा गले बलात् नयतो दीर्घ
मध्वानं दंडाराजभटा यथा १० तयोर्निर्भिन्नहृदयस्तर्जनैर्जातवेपथुः पथिश्वभिर्भक्षमाणआर्तोघं स्वम
नुस्मरन् ११ तृषाररपरीतोर्कदवानलानिलैः संतप्यमानः पथि तप्तवालुके कृच्छ्रेण पृष्ठे कशया च ताडि
तश्चलन्स्वशक्तोपि निराश्रयोदके १२ तत्र तत्र पतञ्छ्रांतो मूर्छितः पुनरुत्थितः यथा पापीयसा नीतस्तम
सायमसादने १३ योजनानां सहस्राणि नवतिं नव चाध्वनः त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीतः प्राप्नोति यातनाः १४

न चलतीति द्वितीयेनान्वयः ११ तृषयाग्रं परीतो व्याप्तः तप्ता वालुका यस्मिन् निर्गतं आश्रयो विश्रामस्थानमुदकं
च यस्मिन् १२ यमसादनं नीतो भवती १३ तत्रैव विशेषमाह अध्वनः संबंधिनां योजनानां नवतिं नव च सहस्राणि

पथिश्वभिर्भक्ष्यमाणार्तः स्व ११

श्री·
भा·टी·
१३६
136

यातनाः संतेपतोदर्शयतिचतुर्भिः आदीपनं प्रज्वलनं प्राप्नोति स्वेनकृतमन्येनवाकृतेछिन्ने यत्तस्यमांसंत
स्यभक्षणमित्यर्थः २५ आत्मनोवैशसंपीडां २६ भिदापनंभेदप्रापणं २७ मिथुः अन्योन्यंमेलनेननिर्मिताः कृ
ताः २८ नचैतदसंभावितमत्रापिदृश्यमानत्वादित्याह २९ उभयंकुटुंबंस्वदेहंच ३० उपार्जितधनंभुंजतेवद

आदीपनंस्वगात्राणांवेष्टयित्वोल्मुकादिभिः आत्ममांसादनंक्वापिस्वकृतंपरतोपिवा ३१ जीवत
श्चांत्राभ्युद्धारः श्वगृध्रैर्यमसादने सर्पवृश्चिकदंशाद्यैर्दशद्भिश्चात्मवैशसं ३२ कृंतनंचावयवशोगजा
दिभ्योभिदापनं पातनंगिरिशृंगेभ्योरोधनंचांबुगर्तयोः ३३ यास्तामिस्रांधतामिस्रारौरवाद्याश्चयातनाः
भुंक्तेनरोवानारीवामिथःसंगेननिर्मिताः ३४ अत्रैवनरकःस्वर्गइतिमातःप्रचक्षते यायातनावैनारक्यस्ता
इहाप्युपलक्षिताः ३५ एवंकुटुंबंबिभ्राणउदरंभरएववा विसृज्येहोभयंप्रेत्यभुंक्तेतत्फलमीदृशं ३६ ए
कःप्रपद्यतेध्वांतंहित्वेदंस्वकलेवरं कुशलेतरपाथेयोभूतद्रोहेणयद्भृतं ३७ दैवेनासादितंतस्यशम
लंनिरयेपुमान् भुंक्तेकुटुंबपोषस्यहृतवित्तइवातुरः ३८ केवलेनह्यधर्मेणकुटुंबभरणोत्सुकः याति
जीवोंधतामिस्रंचरमंतमसःपदं ३९
वः कुतैवतनरकंयास्यतीत्याह भूतद्रोहेणपुष्टंतत्स्थूलंकलेवरमिहैव \\
वदित्वा कुशलादितरत्पापं तदेवपाथेयंभोग्यंयस्य ३७ ननुकुटुंबपोषणायामपिविद्यागच्छतत्राह तस्यकुटुं
बपोषणस्यग्रासमलंपापं दैवेनेश्वरेणप्रापितंभुंक्ते ३८ ननुकुटुंबपोषणंविहितमेवतत्राह तमसोनरकस्यचरमंप

स्मरध्वि

१३६

136A

पुनर्मनुष्यशरीरप्राप्तिकारणमाह मनुष्यदेहस्य प्राप्तेरर्वाक् यावतीर्यातनाः आदिशब्देन सूकरादियोनि
पर्यंतास्ताः सर्वाः क्रमेण संप्राप्य भोगेन क्षीणपापः सन् अत्र पुनर्नरत्वं प्राप्नोतीत्यर्थः ३४ इति तृतीये त्रिंशः ३०
एकत्रिंशे विमिश्रैस्तु पुण्यपापैरिहोत्तरा मनुष्ययोनिसंप्राप्तिर्वर्ण्यते राजसी गतिः पुनर्गर्भजन्मादिदुःखं तदेव
विशेषतो दर्शयति कर्मणा पूर्वकृतेन दैवमीश्वरस्तदेव नेत्रं नेतृ प्रवर्तकं यस्य प्रविष्टो भवति १ कलिलं शु-

अथ तस्मान्नरलोकस्य यावतीर्यातनादयः क्रमशः समनुक्रम्य पुनरत्राव्रजेच्छुचिः ३४ इति तृतीये त्रिं
शः ३० श्रीभगवानुः कर्मणा दैवनेत्रेण जंतुर्देहोपपत्तये स्त्रियाः प्रविष्ट उदरं पुंसो रेतःकणाश्रयः
१ कलिलं त्वेकरात्रेण पंचरात्रेण बुद्बुदं दशाहेन तु कर्कंधुः पेश्यंडं वा ततः परं २ मासेन तु शिरो द्वा
भ्यां बाह्वंघ्र्याद्यंगविग्रहः नखलोमास्थिचर्माणि लिंगच्छिद्रोद्भवस्त्रिभिः ३ चतुर्भिर्धातवः सप्त पंच
भिः क्षुत्तृडुद्भवः षड्भिर्जरायुणा वीतः कुक्षौ भ्राम्यति दक्षिणे ४ मातुर्जग्धान्नपानाद्यैरेधद्धातुरसम्म

क्रशोणितमिश्रितं भवति बुद्बुदं वर्तुलं भवति कर्कंधुर्बदरीफलं तदाकारं कठिनं पेशी मांसपिंडाकारः अंडे वा योन्यं
तरे २ बाह्वंघ्र्याद्यंगानां विग्रहो विभागः लिंगं च छिद्राणि च तेषामुद्भवः ३ जरायुणा गर्भवेष्टनेन वीतः आवृतः ४ मा
तुर्जग्धेन भक्षितेनान्नेन पानाद्यैश्च एधमानो धातुर्वा यस्य जंतोर्नासंभवो यस्मिन् असंमते विषमे गर्ते शेते तथा च मार्कं
डेयपुराणे नाडी चाप्यायनी नाम नाभ्यां तस्य निबध्यते स्त्रीणां तथांत्रसुषिरे सा निबद्धोपजायते क्रमंते भुक्तपीतानि स्त्री

श्री॰ भा॰ तृ॰ १३७

137

तत्रत्यैः क्रिमिभिः खादद्भिः सौकुमार्यात्कोमलत्वेन क्षतानि सर्वांगानि यस्य ६ उल्बणैः उ॰ सर्वेष्वंगेषूत्थिता वेद
ना यस्य आस्ते इत्यत्र नेरणान्वयः ७ उल्बेन जरायुणा भुग्नं कुटिलीभूतं पृष्ठं शिरोधरा ग्रीवा च यस्य ८ दैवात्
केवलं कर्मैव या लब्धा स्मृतिर्येन सः ९ दीर्घं दुरंतं अनुच्छ्वासं यथा भवति तथा तत्र स्थितः सन् सूतिरेतैर्वातैर्वे
पितः सोदरः समानोदरजन्मा विष्ठाभूर्विष्ठोत्पन्नः क्रिमिरिव १० नाथमानो याचमानः उपतप्यमान इति ऋषिः

क्रिमिभिः क्षतसर्वांगः सौकुमार्यात्प्रतिक्षणं मूर्छामाप्नोत्युरुक्लेशस्तत्रत्यैः क्षुधितैर्मुहुः ६ कटुती
क्ष्णोष्णलवणरूक्षाम्लादिभिरुल्बणैः मातृभुक्तैरुपस्पृष्टः सर्वांगोत्थितवेदनः ७ उल्बेन संवृतस्तस्मिन्नं
त्रैश्च बहिरावृतः आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठशिरोधरः ८ अकल्पः स्वांगचेष्टायां शकुंत इव पंजरे तत्र ल
ब्धस्मृतिर्दैवात्कर्म जन्मशतोद्भवं ९ स्मरन्दीर्घमनुच्छ्वासं शर्म किं नाम विंदते आरभ्य सप्तमान्मासाल्ल
ब्धबोधोऽपि वेपितः नैकत्रास्ते सूतिवातैर्विष्ठाभूरिव सोदरः १० नाथमान ऋषिर्भीतः सप्तवध्रिः कृतांज
लिः स्तुवीत तं विक्लवया वाचा येनोदरेऽर्पितः ११ जीव उ॰ तस्योपसन्नमवितुं जगदिच्छयात्तनानातनो
र्भुवि चलच्चरणारविंदं सोऽहं व्रजामि शरणं [illegible] १२

देहात्मदर्शी भीतः पुनर्गर्भवासात् सप्तवध्रयो वेपनभूता धात
वो यस्य विक्लवया आकुलया ११ उपसन्नं जगदवितुं स्वेच्छया गृहीतनानाशरीरस्य भगवतश्चरणारविंदं अकुतोभयं
सोऽहं शरणं व्रजामि भुवि चलदिति श्रीकृष्णावताराभिप्रायेण असतोऽर्जुनस्य मे अनुरूपा योग्या येनेदृशी गर्भवा

[illegible]

[illegible] १२

१३७

137A

ननुकोसौयंशरणंव्रजसिकोवातस्यविशेषोयेनसेव्यकत्वमित्यपेक्षायामाह यस्त्विति अत्रमातर्देहे भूतें
द्रियाशयमयींदेहाकारपरिणतां मायामवलंब्याश्रित्य कर्मभिराहृतस्वरूपस्त्वबद्धइवास्ते सोहंयस्त्वत्रै
वतंनमामि कथंभूतमित्यपेक्षायांतुशब्दोक्तंविशेषंदर्शयति आतप्यमानेहृदयेऽवसितंप्रतीतमेवमप्यवि
कारं नत्कृतोविशुद्धंनिरुपाधिं नत्कृतोअखंडोबोधोयस्यतं १६ ननुत्वमपिवस्तुतःशुद्धएवअसंगोस्ययंतु

यस्त्वत्रबद्धइवकर्मभिरावृतात्माभूतेंद्रियाशयमयीमवलंब्यमायां आस्तेविशुद्धमविकारम
खंडबोधमातप्यमानहृदयेवसितंनमामि १६ यःपंचभूतरचितेरहितःशरीरेछन्नोयथेंद्रिय
गुणार्थचिदात्मकोहं तेनाविकुंठमहिमानमृषिंतमेनंवंदेपरंप्रकृतिपूरुषयोःपुमांसं १७

रुषइत्यादिकृतेः तत्कथंयुवयोरयंविशेषस्तत्राह यःपंचभिःभूतैरचितेशरीरे अयथामिथ्यैवछन्नोनव
स्तुतः यतस्तेनशरीरेणरहितोऽसंगः अतःयथैवेंद्रियगुणार्थचिदात्मकः इंद्रियाणिगुणाश्चार्थाश्चचिदा
भासश्चतदात्मकः सोहंतंवंदे कथंभूतंतेनशरीरेणअविकुंठोमहिमायस्यतं अवगुंठेतिपाठे अवसन्नंगुणाव
रणंयस्यसमहिमायस्येत्यर्थः तत्रहेतुः प्रकृतिपुरुषयोःपरंनियंतारं अतएवसर्वज्ञंविद्याशक्तिमित्य
र्थः विद्याविद्याशक्तिकृतोविशेषइतिभावः १७

ननुज्ञानेनायंबंधोनिवर्तिष्यतेकिंपरमेश्वरवन्दनेनतत्राह यस्यमाययानष्टस्मृतिः सन् संसारसंबंधिनिपथितदति
श्रमेण तत्कृतेनक्लेशेनचरन्नयंजीवो महत्तमस्येश्वरस्यानुग्रहंविना पुनःकयाप्रवृत्त्यालोकंनिजस्वरूपंप्रवृणी
तंसंभजेत श्रतिश्रमदेतत्तेनपंथानंविशिनष्टि उरूणिगुणानिमित्तानिकर्माणिबंधनानियस्मिन् ईश्वरप्रसादंवि
नाज्ञानाभावात्सएवसेव्यइत्यर्थः १५ ईश्वरएवज्ञानदइत्युपपादयन्नाह यदेतत्त्रिकालविषयंज्ञानंतत् तंविनाकतमो

यन्मायययोरुगुणकर्मनिबंधनेस्मिन्सांसारिकेपथिचरंस्तदतिश्रमेण नष्टस्मृतिःपुनरयंप्रवृणीतलो
कंयुक्त्याकयामहदनुग्रहमंतरेण १५ ज्ञानंयदेतददधात्कतमःसदेवस्त्रैकालिकंस्थिरचरेष्वनुवर्तितांशः
तंजीवकर्मपदवीमनुवर्तमानास्तापत्रयोपशमनायवयंभजेम १६ देह्यन्यदेहविवरेजठराग्निनाऽसृग्वि
ण्मूत्रकूपपतितोभृशतप्तदेहः इच्छन्नितोविवसितुंगणयन्स्वमासान्निर्वास्यतेकृपणधीर्भगवन्कदानु २

मध्यदथानकोपि किंतु सदेवईश्वरएवश्रन्यः प्रकृष्टोजीवोदधातुनेत्याह जीवरूपांकर्मपदवीमनुवर्तमानाःव
यमितितद्व्यतिरेकेणनकोपिसमर्थइत्यर्थः अन्यत्राप्यसंभवमुक्त्वातस्यसंभवमाह स्थिरेषुचरेषुचांतर्यामिरूपे
णानुवर्तितंअंशोयेनतंभजेम १६ स्वदुःखंविज्ञापयन्नाह अन्यदेहविवरेमातुरुदरेजठरे यःअसृग्विण्मूत्रकूपस्त
स्मिन्पतितःतत्रजठराग्निनाभृशंतप्तोदेहोयस्यातएवकृपणधीयस्य इतोविवराद्विवसितुंनिर्गन्तुमिच्छन् स्वमासान्गण

138A

तत्कृतमुपकारं स्मरन्नाह येनेदृशीं गतिं ज्ञानं भवादृशेनेति निरुपमेनेत्यर्थः स्वकृतेनैव स्वयं तुष्यतु अंजलि
मात्रं विना तत्कृतोपकारकः प्रत्युपकारं कुर्यादित्यर्थः १८ ईदृशीं गतिमित्यनेन जातं नरविलक्षणं ज्ञानं प्रापि
तवानित्युक्तं तदेव वैलक्षण्यमाह अयमपरः पश्वादिः सप्तवध्रिः जीवः स्वदेहे शारीरके शरीरके शरीरभवे सुख
दुःखे केवलं ननु पश्यति अहं पुनर्यत्सृष्टया धिषणया यद्दत्तेन विवेकज्ञानेन दमशरीरी दमस्योपलक्षणं शा

येनेदृशीं गतिमसौ दशमास ईश संग्राहितः पुरुदयेन भवादृशेन स्वेनैव तुष्यतु कृतेन स दीननाथः
को नाम तत्प्रति विनाञ्जलिमस्य कुर्यात् १८ पश्यत्ययं धिषणया ननु सप्तवध्रिः शारीरके दमशरीर्यपरः स्व
देहे यत्सृष्टयासं तमहं पुरुषं पुराणं पश्येद्बहिर्हृदि च चैत्यमिव प्रतीतं १९ सोऽहं वसन्नपि विभो बहुदुःख
वासं गर्भान्न निर्जिगमिषे बहिरंधकूपे यत्रोपयातमुपसर्पति देवमाया मिथ्यामतिर्यदनु संसृतिचक्रमे

दमशमादियुक्तशरीरवान् आसमभवं तमेव पुराणमनादिं पुरुषं हरिं बहिर्हृदि मध्ये च पश्ये पश्यामीत्य
न्वयः कथमःपरोक्षतया प्रतीतं चैत्यमिवाहंकारास्पदं भोक्तारमिवेत्यर्थः १९ विवेकज्ञानकृतं संसारोद्वेगमनु
वदन्मोक्षमार्गमेवाप्यवसातुं द्वाभ्यां हे विभो बहुदुःखवासं यथा भवति तथा गर्भे वसन्नपि सोऽहं गर्भाद्बहिर्नि
र्गंतुमिच्छामि तत्र हेतुः अंधकूपप्रायेऽपत्र बहिरुपयातं गतं प्राणिनं देवस्य तव मायोपसर्पति प्राप्नोति यदनु
या माया अत्र मिथ्यामतिर्देहेऽहंबुद्धिः संसृतिचक्रं च पुत्रकलत्रादिसंबंधादुपसर्पति २०

तस्मादत्रैवस्थितोपिअव्याकुलःसन् सुहृदात्मनासारथिरूपयाबुद्ध्याएवात्मानं तमसःसंसाराद्धरिष्यामि यथ
नेकरन्ध्रनानागर्भवासरूपंव्यसनं एतद्व्यसनंऽःस्वयथामेमाभविष्यत् नभविष्यतितथा कांतवात्रसाधन
सामग्रीनचाह उपसादितौहृदयंप्रापितौविष्णोःपादौयेनमयासः २१ दशमासाःपरिच्छेदकायस्येति एर्वलब्ध

तस्मादहंविगतविक्लवउद्धरिष्यआत्मानमाशुतमसःसुहृदात्मनैव भूयोयथाव्यसनमेतदनेकरंध्रं
मामेभविष्यदुपसादितविष्णुपादः २१ कपिलउ॰ एवंकृतमतिर्गर्भेदशमास्यःस्तुवन्नृषिः सद्यःक्षिप
त्यवाचीनंप्रसूत्यैसूतिमारुतः २२ तेनावसृष्टःसहसाकृत्वावाक्शिरआतुरः विनिष्क्रामतिकृच्छ्रेण
निरुच्छ्वासोहतस्मृतिः २३ पतितोभुविविण्मूत्रेविष्ठाभूरिवचेष्टते रोरूयतिगतेज्ञानेविपरीतांगतिंग
तः २४ परच्छन्दमविदुषापुष्यमाणोजनेनसः अनभिप्रेतमापन्नःप्रत्याख्यातुमनीश्वरः २५ शायि
तोऽशुचिपर्यंकेजंतुःस्वेदजदूषिते नेशःकंडूयनेगानामासनोत्थानचेष्टने २६

णतारृषिर्जीवःसद्यस्तत्क्षणमेवावाचीनमधोमुखंसूतिहेतुर्मारुतःक्षिपति २२ अवसृष्टःअधःक्षिप्तःसन् २३ रोरूयति
रोदिति २४ परस्यच्छन्दमभिप्रायमविदुषाजनेनानभिप्रेते स्तन्यार्थंरोदनेनोदरव्यथायाःप्रकल्प्यनिवारण
नं उदरव्यथयारोदनेस्तन्यपानमित्यादि २५ आसनोत्थानचेष्टनेचानीशःसन् रोरूयतीत्यनुषंगः २६ १३९

139A

आमाकोमलात्तग्यपस्यतंविगतंगर्भजातंज्ञानंयस्य २८ पौशावंपंचवर्षाणि ततःपौगंडंयौवनादर्वाक् २८
तत्रचाध्ययनादिदुःखमाह सार्धैस्त्रिभिः अलब्धाभीप्सितत्वेनशुचार्दितः प्राप्तःअज्ञानादिद्धोदीप्तोमन्युर्यस्य
सः देहेनसहैववर्धमानेनमन्युनाचविरोधंकरोति आत्मनोनंतायनाशाय २९ अज्ञानंप्रपंचयति भूतैरार

ब्धंदेहंयामत्तंचेदंशामषकामत्कारणादयः इदंतंविगतज्ञानंक्रिमयःक्रिमिकंयथा २८ इत्येवंशैश
वंभुंक्तेदुःखंपौगंडमेवच २९ अलब्धाभीप्सितोज्ञानादिद्धमन्युःशुचार्दितः सहदेहेनमानेनवर्ध
मानेनमन्युनाकरोतिविग्रहंकामीकामिष्वंतायचात्मनः २९ भूतैःपंचभिरारब्धेदेहेदेह्यबुधोस
कृत् अहंममेत्यसद्ग्राहःकरोतिकुमतिर्मतिं ३० तदर्थंकुरुतेकर्मयद्बद्धोयातिसंसृतिम् यो
नुयातिददत्क्लेशमविद्याकर्मबंधनः ३१ यद्यसद्भिःपथिपुनःशिश्नोदरकृतोद्यमैः आस्थितो
रमतेजंतुस्तमोविशतिपूर्ववत् ३२ सत्यंशौचंदयामौनंबुद्धिःश्रीर्ह्रीर्यशःक्षमा शमोदमोभग

व्येदेहेम असदाग्रहोऽहंममेति करोति ३० तदर्थंदेहार्थं येनकर्म ॥ श्चेतियत्संगाद्यातिसंक्षयं ३३
णावद्धोदेहः अनुयातिपुनःपुनरायाति अनुवर्तततेइतिवा कुतः अविद्याकर्मभ्यांनिबध्यतेइतितथा ३१
यद्यसद्भिरधिष्ठितःसन् तेषांपथिरमते सन्मार्गेआस्थितोपियद्यसद्भिःसहरमतेइतिवा तर्हियातनादेह
प्राप्त्येत्यादिपूर्वोक्तप्रकारेणनरकंप्रविशति ३२ असत्संगंनिंदतित्रिभिः ३३

श्री॰
भा॰टी॰
१५॰
140

खंडितात्मसुदेहात्मबुद्धिषु योषितांक्रीडामृगवदधीनेषु ३४ यथाचयोषित्संगिनांसंगतोबंधः तथा
न्यप्रसंगतोनभवेत् ३५ योषित्संगस्यानर्थहेतुतांप्रपंचयतिसप्तभिः रोहिद्भूतांमृगीरूपांसतीमृक्षरू

तेष्वशांतेषुमूढेषुखंडितात्मस्वसाधुषु संगंनकुर्याच्छोच्येषुयोषित्क्रीडामृगेषुच ३४
नतथास्यभवेन्मोहोबंधश्चान्यप्रसंगतः योषित्संगाद्यथापुंसोयथातत्संगिसंगतः ३५
प्रजापतिर्दुहितरंदृष्ट्वातद्रूपधर्षितः रोहिद्भूतांसोनुधावदृक्षरूपीहतत्रपः ३६ तत्सृ
ष्टसृष्टसृष्टेषुकोन्वखंडितधीःपुमान् ऋषिंनारायणमृतेयोषिन्मय्येहमायया ३७ ब
लंमेपश्यमायायाःस्त्रीमय्याजयिनोदिशां याकरोतिपदाक्रांतान्भ्रूविजृंभेणकेवलं ३८
संगंनकुर्यात्प्रमदासुजातुयोगस्यपारंपरमारुरुक्षुः मत्सेवयाप्रतिलब्धात्मलाभोवदंति
यानिरयद्वारमस्य ३९

पोमृगरूपः निर्लज्जःसन् ३६ तेनब्रह्मणासृष्टायेमरीच्यादयः पुत्रास्तैःसृष्टाःकश्यपादयस्तैरपिदेवमनु
ष्यादयस्तेषुकोनुपुमानखंडितधीरनाकृष्टमनाः ३७ दिशांजयिनःशूरानपि ३८ प्रतिलब्धआत्मस्वरूपो
लाभोयेन अस्यमुमुक्षोः यांप्रमदांनिरयद्वारंवदंतियोगिनः ३९

140A

शनैःशुश्रूषणादिभिर्वशेणोपयाति यायोषिद्रूपामाया मत्तंप्रतिकूलमीहते ५० स्त्रियंप्रत्येतिदेवाद् यामि
तिहाम्या ऋषभायंतीवृकृषवदाचरंती यामस्मायांवित्तादिप्रदंपतिमन्यते स्त्रीसंगतःअंतकालेस्त्रीध्यानेनस्त्री
त्वंप्राप्तोजीवः ५१ तांपत्यादिरूपांमृत्युंजानीयात् मृगयोर्लुब्धकस्य गायनमनुकूलत्वेनप्रतीयमानमपि
यथामृगस्यमृत्युः ५२ तदेवंजीवस्यसंसृतिःप्रपंचितातत्रचतस्यकर्मवशेनलोकाल्लोकांतरगमनंजन्म १४१

योपयातिशनैर्मायायोषिद्देवविनिर्मिता तामीक्षेतात्मनोमृत्युंतृणैःकूपमिवावृतं ५०
यांमन्यतेपतिंमोहान्मन्मायामृषभायंती स्त्रीत्वंस्त्रीसंगतःप्राप्तोवित्तापत्यगृहप्रदं ५१ तां
मात्मनोविजानीयात्पत्यपत्यगृहात्मिकां दैवोपसादितंमृत्युंमृगयोर्गायनंयथा ५२ दे
हेनजीवभूतेनलोकाल्लोकमनुव्रजन् भुंजानएवकर्माणिकरोतिविरतंपुमान् ५३

मरणंचोक्तं तत्रैवंशंकते ननुव्यापकस्यकथंलोकाल्लोकांतरगमनं नित्यस्यचकथंजन्ममरणेभोगेनकर्म
क्षयेचसतिजन्ममरणेचेष्यतेतत्कृतः पुनरपितस्यकर्मसंभवइति तत्रलोकांतरगमनंकर्मचसंभवतीत्याह दे
हेनजीवस्योपाधितयाभूतेनज्ञातेन लोकांतरमनुव्रजन्नविरतंकर्माणिकरोतीति ५३

श्री·
भा·तृ·
१५१
151

कर्मणामसमाप्तिरूपाजन्ममरणसंभवमाह जीवोजीवोपाधिर्लिंगदेहः अस्यानुगतोनुवर्त्ती भूतेंद्रिय
मनोमयः स्थूलभूतादिविकारोदेहः भोगायतनं तस्यनिरोधःकार्यायोग्यता तदस्यजीवस्यमरणमुच्यते
आविर्भावस्तुसंभवोजन्मोच्यते ४४ एतदेवदृष्टांतेनस्पष्टयति द्रव्योपलब्धिस्थानस्यनेत्रगोलकादेः द्रव्येक्षा
यांरूपादिदर्शनेकाचकामलादिदोषेणयदायोग्यतातदैवचक्षुषइंद्रियस्याप्ययोग्यता अनयोःस्थानचक्षुषोर्यदा

जीवोस्यानुगतोदेहोभूतेंद्रियमनोमयः तन्निरोधोस्यमरणमाविर्भावस्तुसंभवः ४४ द्र
व्योपलब्धिस्थानस्यद्रव्येक्षायोग्यतायदा तदैवचक्षुषोर्द्रष्टुर्द्रष्टृत्वायोग्यतानयोः ४५
तत्पंचत्वमहंमानादुत्पत्तिर्द्रव्यदर्शनं यथाक्ष्णोर्द्रव्यावयवदर्शनायोग्यतायदा ४६

योग्यता तदैवद्रष्टुर्जीवस्यद्रष्टृत्वायोग्यता एवंस्थूलदेहवैकल्येलिंगदेहस्यवैकल्यं तदेवजीवस्यमरणंश
रीरादपसर्पणंनस्वतइत्यर्थः ४५ मरणेदृष्टांतः क्वचिदयमेकःश्लोकोधिकःपठ्यते तत्रायमर्थः द्रव्योपल
ब्धिस्थानस्यस्थूलशरीरस्य द्रव्येक्षायांयदायोग्यता तत्पंचत्वंमरणं अहंमानादिदमेवाहमित्यभिमानेन द्र १५१
व्यस्यस्थूलशरीरस्यदर्शनमुत्पत्तिः अक्ष्णोःगोलकयोः द्रव्यावयवस्यरूपादेर्दर्शनेयोग्यताशेषंसमानं ४६

141A

यस्मान्नवस्तुतोजीवस्यजन्ममरणादितस्मान्मरणात्संत्रासोनकार्यः जीवनेचनकार्पण्यंकार्यं सम्भ्रमा
श्चजीवनप्रयत्ने ४७ ननसर्वथामुक्तसंगत्वेकथंजीवितमतआह सम्यक्पश्यतिविचारयतीति तया
बुद्ध्यामायाविरचितेलोकेकलेवरंन्यस्यनिक्षिप्यतस्मिन्नाममतांत्यक्त्वाचचरेदित्यर्थः ४८ इतिश्रीभावार्थदी

तस्मान्नकार्यः संत्रासोनकार्पण्यंनसंभ्रमः बुद्ध्वाजीवगतिंधीरोमुक्तसंगश्चरेदिह ४७
सम्यग्दर्शनयाबुद्ध्यायोगवैराग्ययुक्तया मायाविरचितेलोकेचरेन्न्यस्यकलेवरं ४८
इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेजीवगतिर्नामएकत्रिंशोध्यायः ३१ कपिलउ॰
अथयोगृहमेधीयान्धर्मानेवावसन्गृहे काममर्थंचधर्मंचदोग्धिभूयःपिपर्तितान् १

पिकायांतृतीयेएकत्रिंशः ३१ द्वात्रिंशेसात्विकीधर्मैरूर्ध्वागतिरुदीर्यते तत्त्वज्ञानविहीनस्यततश्चपुनरागतिः
ततएवपापकर्मणांगतिमुक्त्वाइदानींकाम्यकर्मणांगतिमाह चतुर्भिः योगृहेएवावसन्स्वान्धर्मान्दोग्धि
दोहमाह काममर्थंचतान्दुग्ध्वाधर्मान्भूयःपिपर्तिपूरयतिअनुतिष्ठति १

सोपिभगवदाराधनरूपाद्धर्मात्पराङ्मुखः सन् प्राकृतान्देवान्पितॄंश्च यजते २ किंतत्त इत्याह तेषांश्रद्धया
क्रांतामतिर्यस्य पित्र्यर्थंदेवार्थंचव्रतंनियमोयस्य सोमपास्तत्रसोमंपीत्वेत्यर्थः ३ लोकेतिष्ठत्यपिपुण्यप
यान्यातमुक्तोलोकानामपिलयमाह यदावाअहःअहः प्रलये ४ भगवद्धर्मनिष्ठानांतत्त्वाप्तिमेवगतिमा

सचापिभगवद्धर्मात्काममूढः पराङ्मुखः यजतेक्रतुभिर्देवान्पितॄंश्च श्रद्धयान्वितः १
तच्छ्रद्धयाक्रांतमतिः पितृदेवव्रतः पुमान् गत्वाचांद्रमसंलोकंसोमपाः पुनरेष्यति ३
यदाचाहीन्द्रशय्यायांशेतेनंतासनोहरिः तदालोकालयंयांतियएतेगृहमेधिनां ४
5 येस्वधर्मान्नदुह्यंतिधीराः कामार्थहेतवे निःसंगान्यस्तकर्माणः प्रशांताः शुद्धचेतसः
निवृत्तिधर्मनिरतानिर्ममानिरहंकृताः स्वधर्माख्येनसत्त्वेनपरिशुद्धेनचेतसा ६ सूर्य
द्वारेणतेयांतिपुरुषंविश्वतोमुखं परावरेशंप्रकृतिमस्योत्पत्त्यंतभावनं ७

इतिविभिः येतुकामार्थप्रयोजनायस्वधर्मान्नदुह्यंति निःसंगाअनासक्ताः त्यक्तानिईश्वरेसमर्पितानिकर्मा॰
णियैः ५ ६ विश्वतोमुखंपरिपूर्णंपुरुषंयांति तथाचश्रुतिः सूर्यद्वारेणतेविरजाः प्रयांतियत्रामृतःपु १४२
रुषोह्यव्ययात्मेतिप्रकृतिमुपादानकारणं उत्पत्त्यंतभावनंनिमित्तकारणं ७

142A परमेश्वररतिरित्याद्धिरण्यगर्भोपासकानामपिक्रमेणतत्वाभिमाद्दविभिः परस्यहिरण्यगर्भस्यपरचिंतकाः
परमेश्वरस्यहत्याद्धिरण्यगर्भोपासकाः ८ क्ष्मादीनिपंचमहाभूतानि मनश्चेंद्रियाणिचअर्थाश्चशब्दादयःभू
तादिश्चाहंकारः एवमादिभिःपरिवृतेवुक्तंब्रह्मांडं प्रतिसंहर्तुमिच्छुःसन् अव्याकृतमीश्वरं परांख्यद्विपरा
र्धलक्षणंकालं ९ परेत्यहंगत्वाभगवंतंहिरण्यगर्भमनुप्रविशंतियेयोगिनः अमृतंपरमानंदरूपं प्रयान्ति

द्विपरार्धावसानेयः प्रलयोब्रह्मणस्तते तावद्ध्यासतेलोकंपरस्यपरचिंतकाः ८ क्ष्मांभोनलानि
लवियन्मनइंद्रियार्थभूतादिभिःपरिवृतंप्रतिसंजिहीर्षुः अव्याकृतंविशतियर्हिगुणत्रयात्माका
लंपराख्यमनुभूयपरःस्वयंभूः ९ एवंपरेत्यभगवंतमनुप्रविष्टायेयोगिनोजितमरुन्मनसोवि
रागाः तेनैवसाकममृतंपुरुषंपुराणंब्रह्मप्रधानमुपयांत्यगताभिमानाः १० अथतंसर्वभू
तानांहृत्पद्मेषुकृतालयं श्रुतानुभावंशरणंव्रजभावेनभामिनि ११

मुक्तइंब्रह्म तेनैवसह्नोपयांति ननुएवं यतस्तदाअगताभिमानाः तथाचश्रुतिः ब्रह्मणासहतेसर्वेसंप्रा
प्ते प्रतिसंचरे परस्यांतेकृतात्मानःप्रविशंतिपरंपदमिति १० भगवदुपासकास्तुसाक्षादेवतंप्राप्नुवंति नतु
क्रमेणअतस्त्वंसाक्षात्तमेवभजेत्याह अथतस्माद्भावेनप्रेमणा ११

श्री० भा० त० १४२ 143

एवं तावद्भगवद्भक्तानां निरंतरमेव तत्प्राप्तिः भगवदभेदेन हिरण्यगर्भोपासकानां क्रमेणेत्युक्तं भेदेनोपा
सनेन तु ब्रह्मादयोप्यावर्त्तंते किमुतान्ये इत्याह चतुर्भिः योवेदगर्भः सोपि गुणव्यतिकरे जाते पूर्वं यथा ब्रह्मप
धिकृतः सन् प्रजायते न केवलं स एवैकः किंतु ऋषिभिर्मरीच्यादिभिश्च सह १२ जन्मनि हेतुद्वयं भेददृष्ट्याभि

आद्यः स्थिरचराणां यो वेदगर्भः महर्षिभिः योगेश्वरैः कुमाराद्यैः सिद्धैर्यो
गप्रवर्तकैः १२ भेददृष्ट्याभिमानेन निःसंगेनापि कर्मणा कर्तृत्वात्सगु
णं ब्रह्म पुरुषं पुरुषर्षभः १३ स संसृत्य पुनः कालेकालेनेश्वरमूर्तिना जाते
गुणव्यतिकरे यथापूर्वं प्रजायते १४ ऐश्वर्यं पारमेष्ठ्यं च तेपि कर्मविनि
र्मितम् निषेव्य पुनरायांति गुणव्यतिकरे सति १५

मानेन कर्तृत्वादिति च यथापूर्वत्वे हेतुः निःसंगेन निष्कामेन कर्मणा १३ किं कृत्वा प्रजायते प्रथमं पारमेष्ठ्य
मैश्वर्यं निषेव्य पश्चात्प्रलये सगुणं गुणाधिष्ठातारं प्रथमावतारं पुरुषं संसृत्य प्राप्य १४ तेपि ऋषिप्रमुखाः १४२
स्वकर्मनिर्मितमैश्वर्यं निषेव्य पुरुषं च संसृत्य यथापूर्वं स्वाधिकारेण पुनरायांतीत्यन्वयः १५

143A

यदाब्रह्मोपासकानामपिभेददर्शनाभिमानाभ्यासेवावृत्तिस्तदाकाम्यकर्मणांकिंवक्तव्यमितितान्निंदमा
हषड्भिः येत्विहकर्मस्वासक्तमनसः संतः अप्रतिषिद्धानिकाम्यानि नित्यानिचकर्माणिकृत्स्नानिकुर्वंति अ
र्यम्णोदक्षिणेनपथाधूममार्गेणपितृलोकंव्रजंतीतिपंचमेनान्वयः मध्येतान्निंदन्नाह १६ १७ इतिसंसारंमे

येत्विहासक्तमनसः कर्मसुश्रद्धयान्विताः कुर्वंत्यप्रतिषिद्धानिनित्यान्यपिचकृत्स्नशः १६
रजसाकुंठमनसः कामात्मानोजितेंद्रियाः पितॄन्यजंत्यनुदिनंगृहेष्वभिरताशयाः १७ त्रै
वर्गिकास्तेपुरुषाविमुखाहरिमेधसः कथायांकथनीयोरुविक्रमस्यमधुद्विषः १८ नू
नंदैवेननिहतायेचाच्युतकथासुधां हित्वाशृण्वंत्यसद्गाथाः पुरीषमिवविड्भुजः १९ द
क्षिणेनपथार्यम्णः पितृलोकंव्रजंतिते प्रजामनुप्रजायंतेश्मशानांतक्रियाकृतः २०

पायस्यस कथनीयानुरवोविक्रमायस्य तस्यमधुद्विषः कथयांविमुखाः संतेयेत्रैवर्गिकाः १८ येचाच्युत
सकथामृतंहित्वाऽसतांगाथाः शृण्वंति तेनूनंदैवेननिहताइत्यन्वयः १९ पितृलोकात्स्वनः प्रजामनुपुत्र
त्रादिषुप्रजायंते गर्भाधानादारभ्यश्मशानांताः क्रियाः कृतवंतो यथोक्तकारिणइत्यर्थः २०

श्री॰ भा॰टी॰ १४४ 144

कथंप्रजायंतेतराह ततस्तेपुनरिमंलोकंप्रतिपतंति विभ्रंशितउदयोभोगसाधनंयेषां २१ परमेष्टिनेपरमेश्व
रेतस्युगुणानाश्रयतेयाभक्तिस्तया २२ भजनेचज्ञानवैराग्येसतएवभवतइत्याह २३ तदेवोपपादयति यदा
सभक्तिसचित्तंभगवद्गुणानुरागेतस्मिन्नेवनिश्चलंसदिंद्रियवृत्तिभिर्वैषम्यमर्थेष्वनगृह्णाति २४ तदेवात्म

ततस्तेक्षीणसुकृताःपुनःलोकमिमंप्रति पतंतिविवशादैवैःसद्योविभ्रंशितोदयाः २१ तस्मात्वं
सर्वभावेनभजस्वपरमेष्टिनं तद्गुणाश्रययाभक्त्याभजनीयपदांबुजं २२ वासुदेवेभगवतिभ
क्तियोगःप्रयोजितः जनयत्याशुवैराग्यंज्ञानंयद्ब्रह्मदर्शनं २३ यदास्यचित्तमर्थेषुसमेष्विंद्रिय
वृत्तिभिः नविगृह्णातिवैषम्यंप्रियमप्रियमप्युत २४ सतदैवात्मनात्मानंनिःसंगंसमदर्शनम्
हेयोपादेयरहितमारूढंपदमीक्षते २५ ज्ञानमात्रंपरंब्रह्मपरमात्मेश्वरःपुमान् दृश्यादिभिःपृ
थग्भावैर्भगवानेकईयते २६

नंस्वप्रकाशमीक्षते कथंभूतंसमंचतद्दर्शनंच तद्धेतोर्निः
संगंसंगाद्धिवैषम्यंभवति निःसंगत्वेहितः हेयोपादेयरहितंतद्धेतःपदंव्यवसितंआरूढंपरमानंदोह
मितितिनिश्चयंप्राप्तमित्यर्थः २५ समेष्वर्थेष्वितियत्तत्तदेवसाम्यंदर्शयति ज्ञानमात्रमेवपरंब्रह्मादिशब्दैःप्र १४४
सिद्धं दृश्यादिभिःदृश्यदृष्टकरणरूपेणपृथक्प्रतीयतेज्ञानमात्रत्वेनसमेष्वित्यर्थः २६

144A

नन्नुज्ञानमात्रंस्वात्मनःस्वरूपत्वान्नित्यप्राप्तमेवेति किमनेकसाधनसाध्येनयोगेनप्राप्यतेतत्राह युज्यते।
प्राप्यते प्रपंचसंगत्युदासएवयोगफलमित्यर्थः २७ ननुकथंप्रपत्यादिप्रतीतेः प्रपंचोत्युदासितुंशक्यते
प्रतीतेर्भ्रांतत्वादित्याह पराचीनैःपराङ्मुखैः शब्दादिधर्मायस्यतेनार्थरूपेणज्ञानरूपेनिर्गुणंब्रह्मैवभातिन
त्वर्थःद्वयमस्तीत्यर्थः २८ अर्थरूपत्वमेवोदाहत्सदर्शयति अहंरूपःअहंकारःसचत्रिवृत्तिगुणात्मकःपुन

एतावानेवयोगेनसमग्रेणेहयोगिनः युज्यतेभिमतोह्यर्थोयदसंगस्तुकृत्स्नशः २७
ज्ञानमेकंपराचीनैरिंद्रियैर्ब्रह्मनिर्गुणं अवभात्यर्थरूपेणभ्रांत्याशब्दादिधर्मिणा २८
यथामहदहंरूपस्त्रिवृत्पंचविधःस्वराट् एकादशविधस्तस्यवपुरंडंजगद्यतः २९
एतद्वैश्रद्धयाभक्त्यायोगाभ्यासेननित्यशः समाहितात्मानिःसंगोविरक्तःपरिपश्यति
३० इत्येतत्कथितंगुर्विज्ञानंतद्ब्रह्मदर्शनं येनावबुध्यतेतत्वंप्रकृतेःपुरुषस्यच ३१

स्वभूतरूपेणपंचविधःइंद्रियरूपेणैकादशविधःस्वराट्जीवरूपःतस्यजीवस्यैववपुरंडंजगत्स्वयततोयेभ्यः
महदादिभ्यस्तद्यथावभाति २९ ननुतर्हिजनैःकिमित्येवंनप्रत्येतितत्राह एतद्ब्रह्म ३० उक्तमेवार्थसर्व
नप्रतिपत्त्यर्थंसंक्षेपणानुवदति इतीतिहेगुर्विरज्ये ३१

श्री· अनेनचज्ञानयोगेनभगवानेवप्राप्योयथाभक्तियोगेनेत्याह नैर्गुण्योज्ञानयोगश्चमन्निष्ठोभक्तिलक्ष
भा·त· णश्चयोयोगः तयोर्द्वयोरप्येकएवार्थः प्रयोजनं कोसौभगवच्छब्दः उपलक्षणं ज्ञापकोयस्य तदुक्तं
१४५ गीतासु तेप्राप्नुवंतिमामेवसर्वभूतहितेरताइति ३२ ननुज्ञानयोगस्यात्मलाभः फलंशास्त्रेणावगम्यते
145 भक्तियोगस्यतुभजनीयेश्वरप्राप्तिः अतस्तयोरेकार्थत्वमित्याशंक्यदृष्टांतेनोपपादयति यथाबहूनांरूप

ज्ञानयोगश्चमन्निष्ठोनैर्गुण्योभक्तिलक्षणः द्वयोरप्येकएवार्थोभगवच्छब्दलक्षणः ३२
यथेंद्रियैः पृथग्द्वारैरर्थोबहुगुणाश्रयः एकोनानेयतेतद्वद्भगवान्शास्त्रवर्त्मभिः ३३
क्रिययाक्रतुभिर्दानैस्तपःस्वाध्यायमर्शनैः आत्मेंद्रियजयेनापिसंन्यासेनचकर्मणां ३४
योगेनविविधांगेनभक्तियोगेनचैवहि धर्मेणोभयचिह्नेनयःप्रवृत्तिनिवृत्तिमान् ३५

रसादीनांगुणानामाश्रयोगुडक्षीरादिः एकएवार्थोमार्गभेदप्रवृत्तिभिरिंद्रियैः नानाप्रतीयतेचक्षुषा
शुक्लइतिरसनेनमधुरइतिस्पर्शनेनशीतइति तथाभगवानेवतत्तद्रूपेणावगम्यते ३३ शास्त्रमार्गानेव
प्रपंचयति क्रिययेतित्रिभिः क्रिययापूर्तरूपयाक्रतुभिर्यागैः मर्शनेनमीमांसयाआत्मेंद्रियजयेन ३४ १४५
उभयचिह्नेनसकामनिष्कामलक्षणेन तमेवाह यइति ३५ ॥

145A

सकामधर्मप्राप्यंस्वर्गादिपिभगवतएवसगुणंस्वरूपमित्यर्थः एभिर्वर्त्मभिःस्वदृक्स्वप्रकाशः ३८ तदे
वंज्ञानयोगमुपसंहृत्यतस्यचभक्तियोगेनसमानार्थत्वमुक्त्वाभक्तियोगमुपसंहरति चतुर्विधंत्रिगुण
निर्गुणभेदेन अंतर्धावतिउत्पत्तिनिधानादिकरोति ३७ अथाहमातः ३८ उपदेशेनधिकारिणोदर्शया
आत्मतत्त्वावबोधेनवैराग्येणदृढेनच ईयतेभगवानेभिःसगुणोनिर्गुणःस्वदृक् ३६ आवोचंभक्ति
योगस्यस्वरूपंतेचतुर्विधं कालस्यचाव्यक्तगतेर्योन्तर्धावतिजंतुषु जीवस्यसंसृतीर्बह्वीरविद्या
कर्मनिर्मिताः यास्वंगप्रविशन्नात्मानवेदगतिमात्मनः नैतत्खलायोपदिशेन्नाविनीतायकर्हि
चित् नस्तब्धायनभिन्नायनैवधर्मध्वजायच ४१ नलोलुपायोपदिशेन्नगृहारूढचेतसे नाभक्ताय
मेजातुनमद्भक्तद्विषामपि ४० श्रद्दधानायभक्तायविनीतायानसूयवे भूतेषुकृतमैत्रायशुश्रूषा
भिरतायच बहिर्जातविरागायशांतचित्तायदीयते निर्मत्सरायशुचयेयस्याहंप्रेयसांप्रि
यः यइदंशृणुयादंबश्रद्धयापुरुषःसकृत योवाभिधत्तेमच्चित्तःसह्येतिपदवींचमे ४२ इतितृतीये
द्वात्रिंशः ३२ मैत्रेयः एवंनिशम्यकपिलस्यवचोजनित्रीसाकर्दमस्यदयिताकिलदेवहूतिः विस्रस्त
तिद्वाभ्यां खलायपरोद्वेजकाय भिन्नायदुराचाराय धर्मध्वजायदांभिकाय ३९ ४० अधिकारिणमाहद्वाभ्यां ४१ ४२
एतच्छ्रवणकीर्तनयोरस्याधिमत्पदप्राप्तिरेवफलमित्याह अथार्थेचकारः सोपिमत्पदवीमेतिहिनिश्चितं ४३

मोहपटलातमभिप्रणम्य ॥ तुष्णवतत्त्वविषयां
कितसिद्धिभूमिं १

इतितृतीयस्कंधेद्वात्रिंशोध्यायः ३२

श्री· त्रयस्त्रिंशेतत्रतस्यैवकपिलस्योपदेशातः ज्ञानलाभेनतन्मातुर्जीवन्मुक्तिरुदीर्यते विश्वस्तमोहरूपपटलंश्र
वणीयस्याः तत्वात्तत्वविषयस्तेनोक्तितासिद्धिः सांख्यज्ञानंतत्सभूमित्तंत्रप्रवर्तकं अथेतिवाक्यांतरे अ
भा·टी· जेनापितववपुः केवलंदध्यौनतदृष्टवान् सचस्वयंसाक्षाद्यस्यतवजठराब्जजातः सभवानेवविश्वस्यसर्गा
१५६ दिविधत्ते नतुतवसर्गादिकर्ताकश्चिदस्ति एवंभूतस्त्वमेमयाकथंजठरेधृतइतित्रयाणामन्वयः कथं
146 भूतंवपुःसद्यक्तं तत्राह अंतःसलिलेशयानं कीदृशंभूतानींद्रियाणिचार्थाश्चशब्दादयः आत्माच

देवहूतिरुवाच अथाप्यजोंतःसलिलेशयानंभूतेंद्रियार्थात्ममयंवपुस्ते गुणप्रवाहंसदशेषवी
जंदध्यौस्वयंयज्जठराब्जजातः २ सएवविश्वस्यभवान्विधत्तेगुणप्रवाहेणविभक्तवीर्यः सर्गा
द्यनीहोवितथाभिसंधिरात्मेश्वरोतर्क्यसहस्रशक्तिः ३

मनः एतन्मयमेतद्धाममित्यर्थः कुतःगुणानांप्रवाहोयस्मिन्तत्कुतः अशेषस्यकार्यकारणस्यबीजं
कारणम् २ कथंभूतोभवान्सर्गादिविधत्ते गुणप्रवाहरूपेणविभक्तंवीर्यंशक्तिर्येनसः शक्तिद्वारेण
विधत्तेनसाक्षादित्यर्थः यतअनीहोनिष्क्रियः तर्हिकथंशक्तिद्वारेणापिकथंसर्गादिविधत्ते अवितथाभि
संधिः सत्यसंकल्पः किमर्थंविधत्तेआत्मनांजीवानामीश्वरः जीवानांभोगार्थमित्यर्थः ननुकथमेक १५६
एवविचित्रान्भोगान्विदध्यात् अतर्क्याःसहस्रमपरिमिताःशक्तयोयस्य ३

146A

किंचप्रलयेयस्यउदरेपतद्विश्वमासीत्सत्वंमयाजठरेकथंधृतः नतुशिशोमयिकिमेतदुच्यते तत्राह वटपत्रइति
अंघ्रिंपाणिनांगुष्ठंपिबतीतिसंस्थितानः इदमपिशिशुत्वंतवहृदेवमायेतिभावः ४ अथवानत्वंमयापत्यात्स्वजठरेधृतः
किंतर्हिस्वयंस्वनारवदिच्छयैवाविर्भूतोसीत्याह त्वंदेवदेवेत्रः स्वीकृतमूर्तिरसि पापमनोदुष्टानां निदेशभाजांमाज्ञा
नुवर्तिनां विभूतयेसमृद्धये आत्मपर्योपलब्धयेज्ञानमार्गप्रदर्शनाय ५ अतस्त्वद्दर्शनात्कृतार्थोस्मीतिकैमुतस्यक
मतंधृतोमेजठरेणानाथकथंतवयस्योदरेपतदासीत विश्वंयुगांतेवटपत्रएकः शेतेस्ममायाशिशुरंघ्रि
पानः ४ त्वंदेवदेवेत्रः प्रशमायपापमनोनिदेशभाजांचसतांविभूतये यथावतारास्तवसूकरादयस्तथा ते १
यमप्यात्मपथोपलब्धये ५ यन्नामधेयश्रवणानुकीर्तनाद्यत्प्रह्वणाद्यत्स्मरणादपिक्वचित् श्वादोपिसद्यः
सवनायकल्पतेकुतः पुनस्तेभगवन्नुदर्शनात् ६ अहोबतश्वपचोतोगरीयान्यज्जिह्वाग्रेवर्ततेनामतुभ्यं मयुग्मेसिद्धे
न्यायेनाह यन्नामधेयस्यश्रवणमनुकीर्तनंच तस्मात्क्वचित्कदा ॥ तेपुस्तपस्तेजुहुवुः सस्नुरार्याब्रह्मानूचुर्नो
चिरपि स्वानमतीतिश्वादः सोपिसवनायसोमयागाय कल्पतेयोग्योभवति अनेनसद्यःपूतत्वंलक्ष्यते ६ तदुपपाद
यति अहोबतेत्याश्चर्ये यस्यजिह्वाग्रेतवनामवर्तते सश्वपचोप्यतः अस्मादेवहेतोः गरीयान्यद्यस्माद्धेतोः वर्तते
अतस्तेतिवा ज्ञातव्यस्तत्राह तेपूर्वतपस्तेपुः कृतवंतः जुहुवुः होमंकृतवंतः सस्नुः तीर्थेषुस्नाताः आर्याः सदाचाराः
ब्रह्मवेदमनूचुः अधीतवंतः तन्नामकीर्तनेतपआद्यंतर्भूतंअतस्तेपूर्णपतमात्रत्वर्थः यद्वा जन्मांतरेस्तैस्तपोहोमा।

सिक्षंकृतसिसिविलनामकीर्तिनमहात्म्योरगमहात्म्योस्सर्गः १

प्रत्यक्स्रोतसि प्रत्याहृते आत्मनि मनसि संविभाव्यं संचिंत्यं वेदोगर्भेयस्यसः ८ अविक्लवयागंभीरयावा
चा ९ स्वसेव्येन मेमयोदितेनास्थितेनानुष्टितेन परांकाष्टांजीवन्मुक्तिमवरोत्स्यसिप्राप्स्यसि १० अतद्विदः
मन्मतमविद्वांसः ११ अनुमतअनुज्ञातः १२ सरस्वत्याः आपीडेपुष्पमुकुटतुल्ये सरस्वत्येतिपाठे मुकुटेने
तं त्वामहं ब्रह्मपरंपुमांसंप्रत्यक्स्रोतस्यात्मनिसंविभाव्यं स्वतेजसाध्वस्तगुणप्रवाहं वंदे विष्णुंकपि
लंवेदगर्भं ८ मैत्रेयउवाच ईडितोभगवानेवंकपिलाख्यः परःपुमान् वाचाविक्लवयेत्याह
मातरंमातृवत्सलः ९ कपिलउवाच मार्गेणानेनमातस्तेसुसेव्येनोदितेनमे आस्थितेनपरांकाष्टा
मचिरादवरोत्स्यसि १० श्रद्धत्स्वैतन्मतंमह्यंजुष्टंयद्ब्रह्मवादिभिः येनमामभयंयायामृत्युमृच्छंत्यतद्वि
दः ११ मैत्रेयउवाच इतिप्रदर्श्यभगवान्सतीमात्मनोगतिं स्वमात्राब्रह्मवादिन्याकपिलोनुमतोय
यौ १२ साचापितनयोक्तेनयोगादेशेनयोगयुक् तस्मिन्नाश्रमआपीडेसरस्वत्याःसमाहिता १३
अभीक्ष्णावगाहकपिशान्जटिलान्कुटिलालकान् आत्मानंचोग्रतपसाबिभ्रतीचीरिणंकृशं १४
वसंवेष्टिते विंदुसरसिसमाहिताबभूव १३ कथंभूतासतीसमाहितातदाह अभीक्ष्णंत्रिषवणमवगाहःस्ना
नं तेनकपिशान् पिशङ्गान्स्वतएवकुटिलान् केशान् तथात्मानंदेहंचीरयाचीरिणंकृशंचबिभ्रतीसती वद
नंच किंचिदनिर्वाच्यशोकव्याकुलम् चकारेतिषष्टेनान्वयः १४

प्रजापतेःकर्दमस्यतपोयोगाभ्यामतिशयितं स्वगार्हस्थ्यंहित्वा पुत्रभूतेमय्यविद्यातुरासती १५ यत्रगार्हस्थ्येक्षीर
फेननिभामृदुशुभ्राः शय्याआस्तरणानिभांति दंतवर्त्तितामंचकाश्चस्वर्णमयपरिकराः आसनानिपीठादीनि
सुस्पर्शान्यास्तरणानियेषु १६ ७ बहुरम्यं १८ यत्रोद्यानेप्रविष्टमात्मानंदेवहूतिरिति १९ इंद्रस्त्रीणामपीप्सिततमं

प्रजापतेःकर्दमस्यतपोयोगविजृंभितं स्वगार्हस्थ्यमनौपम्यंप्रार्थ्यंवैमानिकैरपि १५ पयःफेननिभा
शय्यार्दंतारुक्मपरिच्छदाः आसनानिचहैमानिसुस्पर्शास्तरणानिच १६ स्वच्छस्फटिककुड्येषुमहामा
रकतेषुच रत्नप्रदीपाआभांतिललनारत्नसंयुताः ७ गृहोद्यानंकुसुमितैरम्यंबहुमरद्रुमैः कूजद्वि
हंगमिथुनंगायन्मत्तमधुव्रतं १८ यत्रप्रविष्टमात्मानंविबुधानुचराजगुः वाप्यामुत्पलगंधिन्यांकर्दमेनो
पलालितं १९ हित्वातदीप्सिततमंमप्याखंडलयोषितां किंचिच्चकारवदनंपुत्रविश्लेषणातुरं २० वनंप्रव
जितेपत्यावपत्यविरहातुरा ज्ञाततत्त्वाप्यभून्नष्टेवत्सेगोरिववत्सला २१ तमेवध्यायतीदेवमपत्यंक
पिलंहरिं बभूवाचिरतोवत्सनिःस्पृहातादृशेगृहे २२ ध्यायतीभगवद्रूपंयदाहुर्ध्यानगोचरं सुतःप्रसन्न वरदंसमस्तस्कंधतृतीया २३

प्राप्तुमिष्टतमं तद्धित्वाज्ञाभिमानंसस्का २० सुहृद्वियोगासद्वं सहतामाह नष्टेवत्सलागौरिवाभूत् २१ विरह
कृतध्यानफलमाह निःस्पृहानिर्वासना वत्सविहर २२ कपिलःसुतोयदाहतद्भगवतोरूपंध्यायती तदात्मा
नंविस्मृतोमुखंसर्वंगतंचध्यायती ब्रह्मण्यवस्थितमतिर्वभूवेतितृतीयेनान्वयः २३

श्री॰ केनध्यायतीविशुद्धेनमनसाविशुद्धौकारणान्याह भक्तिप्रवाहरूपेणयोगेनयुक्तानुष्ठानेनजातंज्ञानंतेनै
भा॰ टी॰ वयुक्ता अनुष्ठानंचगीतासूक्तं युक्ताहारविहारस्ययुक्तचेष्टस्यकर्मसु युक्तस्वमावबोधस्ययोगोभवतिदुः
खहेति ब्रह्महेतुनाब्रह्मत्वापादकेन २४ विश्वतोमुखंविहेतः स्वानुभूत्याप्रकाशेनतिरोभूतंमायागुणैर्विशेष
१४८ णैपरिच्छेदोयस्य २५ कथंभूतेब्रह्मणिजीवानामाश्रयेभगवति तथाजीवन्मुक्तिमाहसार्धैस्त्रिभिः तदाच।

भक्तिप्रवाहयोगेनवैराग्येणबलीयसा युक्तानुष्ठानजातेनज्ञानेनब्रह्महेतुना २४ विशुद्धेनत
दात्मानमात्मनाविश्वतोमुखं स्वानुभूत्यातिरोभूतमायागुणविशेषणं २५ ब्रह्मण्यवस्थितमतिर्भ
गवत्यात्मसंश्रये निवृत्तजीवापत्तित्वात्क्षीणक्लेशाप्तनिर्वृतिः २६ नित्यारूढसमाधित्वात्परा
वृत्तगुणभ्रमा नसंस्मरतदात्मानंस्वप्नेदृष्टमिवोत्थितः २७ तद्देहः परतः पोष्योप्यकृशश्चाध्य
॰संभवात् बभौमलैरवच्छन्नःसधूमइवपावकः २८

निवृत्ताजीवापत्तिर्जीवभावोयस्मात्तस्याभावस्त
त्वं तस्माद्विगतक्लेशाप्राप्तनिर्वृतिश्चात्मानंजीवेनसस्मारित्यन्वयः २६ ननुतथापिगुणानांविद्यमानत्वा
त्कथमस्मरणंतत्राह नित्यारूढोलब्धप्रतिष्ठः समाधिर्यस्याभावस्तत्वं तस्मात्परावृत्तः शांतोगुणनिमित्तो
भ्रमोयस्याःसा २७ परतःपराभिरेवकर्दमसृष्टविद्याधरीभिःपोषःपोषणंयस्य आधिर्मनोग्लानिस्तदसं १४८
भवात्कृशोमलैरवच्छन्नोपिबभौ २८

श्री॰
भा॰ टी॰
१४५
149

देवगुप्तं प्रारब्धकर्मपालितं २९ निर्वाणं नित्यमुक्तं ३० ३१ हे सौम्य तस्यास्तन्मर्त्यं शरीरं सरिदभूत् कथंभूतं योगेन विधु
तं विलीना मार्त्या दैहिका धातुमला यस्य ३२ कपिलो ययावित्युक्तं तदेव प्रपंचयति त्रिभिः समनुज्ञाप्य अनुज्ञामाज्ञां

स्नागं तपोयोगमयं मुक्तकेशं गतांबरं देवगुप्तं न बुबुधे वासुदेवप्रविष्टधीः २९ एवं सा कपिलोक्तेन मार्गे
णाचिरतः परं आत्मानं ब्रह्मनिर्वाणं भगवंतमवापह ३० तद्वीरासीत्पुण्यतमं क्षेत्रं त्रैलोक्यविश्रुतं ना
म्नासिद्धपदं यत्र सा संसिद्धिमुपेयुषी तस्यास्तद्योगविधुतमार्त्यं मर्त्यमभूत्सरित् स्रोतसां प्रवरा सौम्य सि
द्धिदा सिद्धसेविता ३२ कपिलोपि महायोगी भगवान्पितुराश्रमात् मातरं समनुज्ञाप्य प्रागुदीचीं दिशं ययौ
सिद्धचारणगंधर्वैर्मुनिभिश्चाप्सरोगणैः स्तूयमानः समुद्रेण दत्तार्हणनिकेतनः ३४ आस्ते योगं समास्था
य सांख्याचार्यैरभिष्टुतः त्रयाणामपि लोकानामुपशांत्यै समाहितः ३५ एतन्निगदितं तात यत्पृष्टोहं तवा
नघ कपिलस्य च संवादो देवहूत्याश्च पावनः ३६ य इदमनुशृणोति योभिधत्ते कपिलमुनेर्मतमात्मयो
गगुह्यं भगवति कृतधीः सुपर्णकेतावुपलभते भगवत्पदारविंदं ३७ इति श्रीभागवते तृतीयस्कंधे कापि
लदेवहूतिसंवादे त्रयस्त्रिंशोध्यायः ३३

संप्राप्य ३३ दत्तमर्हणं अर्घं निकेतनं च स्थानं यस्मै ३४ उपशांत्यर्थं समाहित आस्ते ३५ प्रकरणार्थमुपसंहरति ए
तदिति तवतया ३६ एतच्छ्रवणकीर्तनफलमाह य इति ३७ इति श्रीभावार्थे तृतीयस्कंधे त्रयस्त्रिंशत्तमोध्यायः ३३

१४५

Canto 3

3L